प्रतिसंस्कृत

गविनिश्चय :

कविराज
श्रीयामिनीभूषण राय कविरत्न
एम-ए, एम-वि, कृत:

मूल्यं रौप्यकद्वयम् ।

PRATI SANSKRITA ROGA BINISCHAYA

DISEASES—THEIR ORIGIN AND DIAGNOSIS.

BY

Kaviraj Jamini Bhushan Ray Kaviratna,

M.A., M.B., M.R.A.S.

Ex-President, All-India Ayurvedic Conference and Ayurveda Vidyapitha

(All-India Board of Ayurvedic Education)

Fellow of the Calcutta University, Etc.

Published by the

AYURVEDIC MEDICAL COLLEGE

29, Fariapukur Street,

CALCUTTA.

1920.

Price Rs. 2

प्रतिसंस्कृतो

रोगविनिश्चयः ।

"यस्तु रोगमविज्ञाय कर्म्माण्यारभते भिषक् ।
अप्यौषधविधानज्ञ स्तस्य सिद्धिर्यदृच्छया ॥"
चरकः ।

कलिकाताविश्वविद्यालयान्यतमसदस्याष्टाङ्गायुर्व्वेदविद्यालयाध्यक्ष-
कविराज-
श्रीयामिनीभूषण राय कविरत्न एम्, ए, एम्, बि,
इत्यनेन कृतः ।

कलिकाता २८ संख्याक-फड़ियापुकुरवर्त्म स्थिताष्टाङ्गायुर्व्वेद-
विद्यालयतः
श्रीसुरेन्द्रकुमार दासगुप्त काव्यतीर्थेन
प्रकाशितः

PRINTED BY
GOBARDHAN PAN
AT THE GOBARDHAN PRESS,
161, Muktaram Babu Street, Calcutta.

उत्सर्गपत्रम्

परम पूजनीय पादारविन्द माननीय डाक्तार—

श्रील श्रीयुक्त स्यर आशुतोष मुखोपाध्याय

के, टि, सि, एस्, आइ, एम्, ए, डि, एल,
डि, एस्, सि, पि, एइच, डि।

सरस्वती सम्बुद्धागम चक्रवर्त्ति शास्त्रवाचष्पति
महोदय महामहिमार्णवेषु—

महात्मन्

विद्वद्वृन्द वरेण्य! वङ्गावसुधा लङ्कार! चिन्तामणे
त्वत्कारुण्य कटाक्षवीक्षणमृते शश्वद्भुविश्रेयसे।
नोवाणीपदपङ्कजार्च्चन मिति ग्रन्थोऽयमल्पोऽपिमे
त्वत्पाणौ कमले सभक्त्युपहृतस्तद्गृह्यतां स्नेहतः॥

एकान्त वशंवद—
श्रीयामिनीभूषण राय कविरत्नस्य।

राजयक्ष्माधिकारः ।

धातुक्षयक्षतक्षीणाधिकारः ।

कासाधिकारः ।

मदात्ययधिकारः।

दाहाधिकारः।

उन्मादभूतोन्मादाधिकारः।

अपस्माराधिकारः ।

वातव्याध्यधिकारः ।

वातरक्ताधिकारः ।

ऊरुस्तम्भाधिकारः ।

आमवाताधिकारः ।

शूलाधिकार: ।

उदावर्त्तानाहाधिकार: ।

गुल्माधिकारः ।

हृद्रोगाधिकारः ।

मूत्रकृच्छ्राधिकारः ।

मूत्रघाताधिकारः ।

अश्मर्य्यधिकार: ।

प्रमेहाधिकार: ।

मेदोऽधिकार: ।

उदराधिकार: ।

शोथाधिकार: ।

वृद्ध्यधिकार: ।

गलगण्डाद्यधिकारः ।

श्लीपदाधिकारः ।

विद्रध्यधिकारः ।

भग्नाधिकारः।

नाड़ीव्रणाधिकारः।

भगन्दराधिकारः।

शीतपित्तोदर्दकोठाधिकार: ।

अम्लपित्ताधिकार: ।

विसर्पाधिकार: ।

विस्फोटाधिकार: ।

मसूरिकाधिकारः।

स्नायुकाधिकारः।

फिरङ्गाधिकारः।

शुक्रदोषाधिकारः।

क्लैब्याधिकारः।

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षुद्ररोगाधिकार: ।

शि:सं—शिरोनाम संख्या ।

रोगनामानुसारिणी सूची ।

(वर्णानुक्रमेण)

अ

आ

शुद्धिपत्रम् ।

पृष्ठा—पंक्तिः	अशुद्धम्	शुद्धम्
१९।१२	साध्यसाध्यत्वं	साध्यासाध्यत्वं
१९।२४	मृतु	मृत्यु
२०।१०	ज्वरविमुक्तिपूर्व्वरूपमाह	सुदारुणज्वरमुक्तिमाह
२०।१३	ज्वरमुक्तिलक्षणमाह	अदारुणज्वरमुक्तिमाह

तत्रैव पञ्चदशपंक्त्यनन्तर "सुदारुणमुक्तिर्यत्र-भवति तदाह इति पठनीयं ।

पृष्ठा—पंक्तिः	अशुद्धम्	शुद्धम्
२०।२०	उपद्रवाः	उपद्रवा
२०।२१	प्राधान्य	प्राधान्यं
२७।४	पक्व	पक्वा
२८।७	च्छर्द्दिं	छर्द्दिं
२८।२०	जीर्ष्यति	जीर्य्यति

२९ पृष्ठायां ९म पंक्त्यनन्तरं तस्य लक्षणमाहेति पठनीयम् ।

पृष्ठा—पंक्तिः	अशुद्धम्	शुद्धम्
३०।१६	चैलादि	चेलादि
३१।१८	द्वेधा	द्वेधा
३१।१९	शुष्क्	शुष्क
३७।१४	कण्डं	कण्डूं
३७।१५	कण्डयनात्	कण्डूयनात्
३७।१७	शोफा	शोफो

पृष्ठा—पंक्तिः	अशुद्धम्	शुद्धम्
३८।५	गुरुणाम्	गुरूणाम्
४३।१५	छद्यतीसार	छर्द्यतीसार
४५।१८	रक्तावाहि	रक्तवाहि
४६।११	वीजरूपख्याह	वीजरूपाख्याह

४८ पृष्ठायां आदावेव पठनीयं सामान्यरूपमाहेति

पृष्ठा—पंक्तिः	अशुद्धम्	शुद्धम्
४८।८	आयासो-	आयासै-
४८।२२	च्छूनानां	च्छूनानां

५१पृष्ठायां अष्टम पंक्तेरनन्तरं—कामलाया असाध्यालक्ष माहेति पाठनीयम्। तत्रैव द्वादश पंक्तेरनन्तरं कुम्भकामलाया असाध्यलक्षण माहेति पठनीयम्।

पृष्ठा—पंक्तिः	अशुद्धम्	शुद्धम्
५१।१०	छर्दि	च्छर्दि
५५।७	लब्धा	लब्ध्वा
५६।१८	तानेकादश	तान्येकादश
५८।२	रुद्धा	रुद्ध्वा
६४।२१	कासमानश्च	कासमानश्च
६६।६	नरौ	नवौ
६६।२०	पाण्डरोगा	पाण्डुरोगा
७२।१८	याद्गलेन	ब्रूयाद्गलेन
७५।१	छर्द्याधिकारः	छर्द्यधिकारः
७७।१	दर्ह्याधिकारः	छर्द्यधिकारः
७७।५	हृष्ट	दृष्ट

पृष्ठा—पंक्तिः	अशुद्धम्	शुद्धम्
७८।१८	कार्कश्यँ	कार्कश्यं
८८।२३	त्रीण	त्रीन्
८९।८	शरीर	शारीर
९०।६	दाहष्ठाह	दाहमाह
९०।१२	सुः	स्युः
९२।२०	दर्शमम्	दर्शनम्
९२।२१	स्वयथुः	श्वयथुः
९३।४	सम्पर्ण	सम्पूर्ण
९४।५	निस्तन्द्रो	निस्तन्द्रि
९६।९	छाया	च्छाया
९।१६	अपम्भारोत्पत्ति	अपस्मारोत्पत्ति
९७।४	स्वेदा	स्वेदो
९९।२१	अव्यक्तलक्षणं	अव्यक्तं लक्षणं
१०१।२०	सुप्तास्त्वग्रा	सुप्तास्त्वग्रो
१०३।१९	समीरणः समीरणात्	समीरणसमीरणात्
१०४।१०	शिरास्नायु विशोष्य	शिरा-स्नायू विशोष्य
१०५।३	कार्म्मक	कार्म्मुक
१०९।१७	मासान्तरजो	मांसान्तरजो
१०९।१९	पीड़काः	पिड़काः
११०।४	अस्थावृतस्य	अस्थ्यावृतस्य
११०।१०	लिङ्गमाह	लिङ्गमाह

पृष्ठा—पंक्तिः	अशुद्धम्	शुद्धम्
११०।२२	मदनं	सदनं
१११।१	पित्ताकफा	पित्तकफा
१११।३	स्त्रापश्च योनि मोहन	स्त्रापश्च योनि मेहन
१११।७	विन्मत्रे	विण्मूत्रे
१११।८	कफावृतल्यस्यापानवयो	कफावृतस्यापानवायो
१११।९	दह्यौष्णात्यं	दाहौष्ण्यं
१११।१३	गुम्भनो	स्तम्भनो
१११।१४	-मन्यान्यावरण-	-मन्योन्यावरण-
१११।१५	मन्यान्यावरणे	मन्योन्यावरणे
१११।१८	स्तथान्यान्यम्	स्तथान्योन्यम्
११२।३	-नुपक्रमः	नुपक्रमाः
११२।९	सिद्धन्ति	सिध्यन्ति
११२।२१	गतिर्थ्यस्य	गतिर्यस्य
११३।१८	पीड़कोद्गमः	पिड़कोद्गमः
११४।७	स्फारण	स्फुरण
११४।२०	न्यङ्गुलीसन्धीनां	न्यङ्गुलिसन्धीनां
१२०।१७	शस्कुलीभि	शष्कुलीभि
१२९।१५	पित्तगुल्महेतुमाह	पित्तगुल्मलक्षणमाह—
१२९।१८	पित्तगुल्मलक्षणमाह	पित्तगुल्महेतुमाह—
१३५।१।३।४।५	मूत्रघाता	मूत्राघाता
१४०।५	वस्त्वसगन्धत्वं	वस्तसगन्धत्वं

पृष्ठा—पंक्तिः	अशुद्धम्	शुद्धम्
१४१।११	मुष्क्रयो	मुष्कयो—
१४१।१३	मुष्क्रश्वयथु-	मुष्कश्वयथु-
१४१।१४	मुपगस्थ	मुपगम्य
१४३।१६	मासेत्तु-	माषेत्तु-
१४४।१५	कृत्सं	कृत्स्नं
१४७।१८	विड़भेद	विड़्भेद
१४८।१५	निन्नमध्या	निम्नमध्या
१४८।२०	पीड़का	पिड़का
१५०।४	स्नेहाम्भेद	स्नेहान्भेद
१५०।७	तन्माद्	तस्माद्-
१५५।९	पच्चबाले-	पक्ष्मबाले-
१६०।१८	मूत्रान्तवृद्धि	मूत्रान्त्र वृद्धि
१६१।२१	श्वयथं	श्वयथुं
१६३।८	पाण्डर	पाण्डूर
१६४।१८	पीनप्याक	पिण्याक
१६६।२	अर्व्वद	अर्व्वुद
१६६।११	तातज	वातज
१६७।८	भूयिष्ठा	भूयिष्ठाः
१६९।८	अतिव्यवायाव्याल	अतिव्यवायव्यायाम
१६९।१२	प्लीहि	पोह्लि
१६९।१५	लच्चणेः	लच्चणैः

पृष्ठा—पंक्तिः	अशुद्धम्	शुद्धम्
१७०।१	सर्व्वाङ्गप्रग्रस्तीव्रो	सर्व्वाङ्गप्रग्रहस्तीव्रो
१७०।४	यान्तूर्द्ध—	यान्त्यूर्द्ध—
१७०।६	स्रुतेष्वर्द्धम्	स्रुतेषूर्द्धम्
१७०।१०	यथाहितैः	तयाहितैः
१७१।१२	अभिधास्यम्पे	अभिधास्यन्ते
१७२।१२	स्यादङ्गल्येव	स्यादङ्ग ल्येव
१७२।१५	ज्वरत्टष्णा	ज्वरस्तृष्णा
१७३।३	तस्याद्धि	तस्माद्धि
१७३।५	ग्रसह्यः	प्रसह्य
१७३।६	मासं	मांसं
१७५।६	समाग्रूढ़म्	सम्यग्रूढ़म्
१७६।२०	प्राणमांमत्त्वय	प्राणमांसत्त्वय
१७८।२१	शरीरा-	शरीरा—
१७९।१	रुजच्च	रुजश्च
१८०।३	तीव्रः	तीव्राः
१८१।५	नस्यस्ते	नस्यन्ते
१८४।२	व्रणैस्तटुन्मार्गि	व्रणैस्तसुन्मार्गि
१८९।१३	क्रच्छ्रु	कच्छ्रु
१९०।११	लणच्च	लच्चण
१९१।२	कुष्ठवाहुल्याद्दष्ट	कुष्ठवाहुल्याद्दुष्ट
१९२।७	विशेषेधात्वाश्रयत्वं	विशेषधात्वाश्रयत्वं

पृष्ठा—पंक्तिः	अशुद्धम्	शुद्धम्
१८३।१२	उदर्द्दस्य	उदर्दस्य
१८३।१३	सोत्सङ्गस्व	सोत्सङ्गैस्व
१८६।२२	स्ताभ्रहरित	स्ताम्रहरित
१८८।१६	असितनिलोरक्त	असितनीलोरक्त
१८८।१६	सुषन्ति	सुशन्ति
१८८।१८	सरक्तपित्तमीरयन्	सरक्तं पित्तमीरयन्
२०१।१८	मुखोपाक	मुखपाक।
२०४।११	कुर्व्वंत्यस्थोनि	कुर्व्वन्त्यस्थोनि।
२०५।१३	यस्सैतानि	यस्यैतानि।
२०६।१०	प्रकादेन क्रुत्यते	प्रमादेन त्रुत्यते।
	छिन्नतरुडुः	छिन्नतुरुडं
२०७।८	वाह्यफिरङ्ग	वाह्यःफिरङ्गः।
२०८।३	वच्यमि	वच्यामि।
२०८।२१	कालान्तरेनाव्यक्तिं	कालान्तरेनाभिव्यक्तिं
२११।३	वीजोपवाजजं	वीजोपघातजं
२१२।२	क्लैव्यंमिति	क्लैव्यमिति।
२१२।१५	स्तेस्यो	स्तेभ्यो।
२१३।६	स्वारतात्मनः	पुराकृतैः।
८	शोषयन्त्यास्त	शोषयन्त्यथ
—१०	व्याखाताः	व्याख्याताः
२१३।११	निरुजा	नीरुजा।

पृष्ठा—पंक्तिः	अशुद्धम्	शुद्धम्
२१५।२१	प्रचच्यति	प्रचचते ।
२१६।२	मांसदारुणाः	मांसदारणाः
—।७	वायु	वायुः
—।१८	सिरस्नायूः	सिरास्नायूः
२१७।१	पाददरी	पाददारी
२१८।२	शाल्मलीकण्ठक	शाल्मलीकण्टक
—।१०	भावेदनं	अवेदनं
—।१०	आगात्य	मागत्य ।
२१९।६	वातोपपृष्ठत्वात्	वातोपसृष्टत्वात्
।१७।१९	निरुद्धप्रकाशे	निरुद्धप्रकशे ।
	निरुद्धप्रकाशं	निरुप्रकशं
२२०।८	विद्याद्दिपूतनं	विद्याद्दिपूतनम्
२२०।१७	वराहदंष्ट्रनिङ्ग	वराहदंष्ट्रालिङ्ग ।

दोषदूष्यनिरूपणम् ।

नित्याः प्राणभृतां देहे वातपित्तकफास्त्रयः ।
बिकृताः प्रकृतिस्था वा तान् बुभुत्सेत पण्डितः ।

सर्व्वशरीरचरास्तु वातपित्तश्लेष्माणो हि सर्व्वस्मिन् शरीरे कुपिताकुपिताः शुभाशुभानि कुर्व्वन्ति । प्रकृतिभूताः शुभानि उपचयबलवर्णप्रसादादीनि, अशुभानि पुनर्विकृतिमापन्नानि विकारसंज्ञानि ।

प्रथमः परिच्छेदः ।

अथ प्रकृतिभूतानां वातपित्तकफानां स्थानकर्म्मगुणाः ।

वातपित्तश्लेष्मनां निरुक्तिमाह—

तत्र वा गतिगन्धनयोरिति धातुः, तप सन्तापे, श्लिष आलिङ्गने, एतेषां कृद्विहितैः प्रत्ययैर्व्वातः पित्तं श्लेष्मेति च रूपाणि भवन्ति ।

अव्यापन्नस्य वायोः स्थानान्याह—

वस्तिः पुरीषाधानं कटिः सक्थिनी पादावस्थीनि च वातस्थानानि । अत्रापि पक्वाशयो विशेषेण वातस्थानम् ।

सामान्यतस्तस्यैव कर्म्माण्याह—

दोषधात्वग्निसमतां संप्राप्तिं विषयेषु च ।
क्रियाणामानुलोम्यञ्च करोत्यकुपितोऽनिलः ।

उत्साहोच्छ्वासनिःश्वासचेष्टाधातुगतिः समा ।
समो मोक्षो गतिमतां वायोः कर्म्माविकारजम् ।

वायोर्नामान्याह—

प्राणोदानौ समानश्च व्यानश्चापान एव च ।
स्थानस्था मारुताः पञ्च यापयन्ति शरीरिणम् ।

प्रकृतिस्थानां प्राणादीनां स्थानकर्म्मण्याह—

वायुर्यो वक्त्रसञ्चारी स 'प्राणो' नाम देहधृक् ।
सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते ।
'उदानो' नाम यस्तूर्द्ध्वमुपैति पवनोत्तमः ।
तेन भाषितगीतादिविशेषोऽभिप्रवर्त्तते ।
आमपक्वाशयचरः 'समानो' वह्निसङ्गतः ।
सोऽन्नं पचति तज्जांश्च विशेषान् विविनक्ति हि ।
कृत्स्नदेहचरो 'व्यानो' रससम्वहनोद्यतः ।
स्वेदोऽसृक्स्रावणो वापि पञ्चधा चेष्टयत्यपि ।
पक्वाधानालयो'ऽपानः' काले कर्षति चाप्ययम् ।
समीरणः शकृन्मूत्रशुक्रगर्भार्त्तवान्यधः ।*

वातगुणानाह—

रूक्षः शीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः ।
अव्यक्तो व्यक्तकर्म्मा च रजोबहुल एव च ।

---

* प्रस्पन्दनोद्वहनपूरणविवेकधारणलक्षणो वायुः व्यानोदानप्राणसमानापानभेदेन पञ्चधा प्रविभक्तः शरीरं धारयति ।

अव्यापन्नस्य पित्तस्य स्थानकर्म्मगुणाः ।

आदौ अग्निपित्तयोर्भेदविचारः क्रियते—

तत्र जिज्ञास्यं किं पित्तव्यतिरेकादन्योऽग्निः ? आहो-स्वित् पित्तमेवाग्निरिति । अत्रोच्यते न खलु पित्तव्यतिरेका-दन्योऽग्निरुपलभ्यते । आग्नेयत्वात् पित्ते दहनपचनादिष्वभि वर्त्तमानेऽग्निवदुपचारः क्रियतेऽन्तराग्निरिति । क्षीणेह्यग्नि-गुणे तत्समानद्रव्योपयोगादतिप्रवृद्धे शीतक्रियोपयोगादागमाच्च पश्यामो न खलु पित्तव्यतिरेकादन्योऽग्निरिति ।

प्रकृतिस्थपित्तस्य स्थानमाह—

स्वेदो रसो लसीका रुधिर मामाशयश्च पित्तस्थानानि । अत्राप्यामाशयो (१) विशेषेण पित्तस्थानम् ।

सामान्यतस्तस्यैव कर्म्माण्याह—

दर्शनं पक्तिरूष्मा च क्षुत् तृष्णा देहमार्द्दवम् ।
प्रभा प्रसादो मेधा च पित्तकर्म्माविकारजम् ।

पाचकादीनां पञ्चानां पित्तानां क्रमेण स्थानकर्म्मण्याह—

तच्चादृष्टहेतुकेन विशेषेण पक्वामाशयमध्यस्थं पित्तं चतुर्विध मन्नपानं पचति विवेचयति च दोषरसमूत्रपुरीषाणि । तत्रस्थ मेव चात्मशक्त्या शेषाणां पित्तस्थानानां शरीरस्य चाग्निकर्म्म-णानुग्रहं करोति । तस्मिन् पित्ते 'पाचको'ऽग्निरिति संज्ञा ।

यत्तु यकृत्प्लीह्नोः पित्तं तस्मिन् 'रञ्जको'ऽग्निरिति संज्ञा । स रसस्य रागकृदुक्तः ।

(१) पित्तस्थाने आमाशय इति आमाशयाऽधोभागः ।

यत्तु पित्तं हृदयस्थितं तस्मिन् 'साधको'ऽग्निरिति संज्ञा। सोऽभिप्रार्थितमनोरथसाधनकृदुक्त:।

यद् दृष्ट्यां पित्तं तस्मिन् 'आलोचको' ऽग्निरिति संज्ञा। स रूपग्रहणेऽधिकृत:।

यत्तु त्वचि पित्तं तस्मिन् 'भ्राजको'ऽग्निरिति संज्ञा। सोऽभ्यङ्गपरिषेकावगाहावलेपनादीनां क्रियाद्रव्याणां पक्ता छायानाञ्च प्रकाशक:।

पित्तगुणानाह—

सस्नेहमुष्णं तीक्ष्णञ्च द्रवमम्लं सरं कटु।

* * * *

प्रकृतिस्थस्य श्लेष्मण:स्थानकर्म्मगुणा:।

उर: शिरोग्रीवापर्व्वाण्यामाशयो(२) मेदश्च श्लेष्मण: स्थानानि। अत्राप्युरो विशेषेण श्लेष्मस्थानम्।

औदकश्लेष्मण: स्थानकर्मण्याह—

तत्रामाशय: पित्ताशयस्योपरिष्टात्तत्प्रत्यनीकत्वादूर्द्ध्वगतित्वात्तेजसश्चन्द्र इवादित्यस्य। स चतुर्विधाहारस्याधार:। स च तत्रौदकैर्गुणैराहार: प्रक्लिन्नो भिन्नसङ्घात: सुखजरश्च भवति।

माधुर्य्यात् पिच्छिलत्वाच्च प्रक्लेदित्वात्तथैव च।
आमाशये सम्भवति श्लेष्मा मधुरशीतल:।

---

(२) श्लेष्मस्थानेष्वामाशय इति आमाशयोर्द्ध्वभाग:।

स तत्रस्थ एव स्वशक्त्या शेषाणां श्लेष्मस्थानानां शरीरस्य चोदककर्म्मणानुग्रहं करोति।

अवलम्बकस्य श्लेष्मणः स्थानकर्मण्याह—

उरस्थस्त्रिकसन्धारणमात्मवीर्य्येणान्नरससहितेन हृदयावलम्बनं करोति।

रसनस्य श्लेष्मणः स्थानकर्मण्याह—

जिह्वामूलकण्ठस्थो जिह्वेन्द्रियस्य सौम्यत्वात् सम्यक् रसज्ञाने वर्त्तते।

स्नेहनस्य श्लेष्मणः स्थानकर्मण्याह—

शिरस्थः स्नेहतर्पणाधिकृतत्वादिन्द्रियाणामात्मवीर्य्येणानुग्रहं करोति।

श्लेषणस्य श्लेष्मणः स्थानकर्मन्याह—

सन्धिस्थस्तु श्लेष्मा सर्व्वसन्धिसंश्लेषात् सर्व्वसन्ध्यनुग्रहं करोति।*

स्नेहोबन्धः स्थिरत्वञ्च गौरवं वृषता वलम्।
क्षमा धृतिरलोभश्च कफकर्म्माविकारजम्।

श्लेष्म-गुणानाह—

गुरुशीत-मृदुस्निग्ध-मधुरस्थिरपिच्छिलाः।

---

* सन्धिसंश्लेषण-स्नेहन-रोपण-पूरण-वृंहण-तर्पण-वलस्थैर्य्यकृत् श्लेष्मा पञ्चधा प्रविभक्त उदककर्म्मणानुग्रहं करोति।

द्वितीयः परिच्छेदः ।

अथ वातपित्तकफानां विकृतौ हेतुर्विकृतानाञ्च कर्म्माणि ।

वायोः प्रकोपनान्याह—

तत्र बलवद्विग्रहातिव्यायाम-व्यवायाध्ययन-प्रपतन-प्रधावन-प्रपीड़नाभिघात-लङ्घन-प्लवनतरण-रात्रिजागरण-भारहरण-गजतुरङ्ग--रथ--पदातिचर्य्या--कटु--तिक्तकषाय-रुक्ष-लघु--शीत-वीर्य्य-शुष्कशाकवल्लूर--वरकोद्दालक-कोरदूष--श्यामाक--नीवार-मुद्ग-मसूराढ़कीहरेणु कलाय-निष्पावानशन-विषमाशनाध्यशन-वात मूत्र-पुरीष-शुक्र-च्छर्द्दि-क्षवथूद्गार-वाष्प--वेगविघातादिभिर्व्विशेषैर्व्वायुः प्रकोपमापद्यते ।

स शीताभ्रप्रवातेषु घर्म्मान्ते च विशेषतः ।
प्रत्यूषस्यपराह्णे तु जीर्णेऽन्ने च प्रकुप्यति ।

वायोरात्मरूपाणि कुपितस्य कर्म्माणिचाह—

रौक्ष्यं लाघवं वैषद्यं शैत्यङ्गतिरमूर्त्तत्वञ्चेति वायोरात्मरूपाणि भवन्ति । एवंविधत्वाच्च कर्म्मणः स्वालक्षण्य मिदमस्य भवति—

तं तं शरीरावयवमाविशतः स्रंसभ्रंशव्यासभेदसादहर्षतर्ष-कम्पवर्त्तचालतोदव्यथा-चेष्टाद्यास्तथा खरपरुषविशदशुषिरारुण-वर्णकषाय-विरस मुखशोषशूलसुप्ति--संकुचनस्तम्भनखञ्जतादीनि वायोः कर्म्माणि (क) तैरन्वितं वातविकारमेवाध्यवस्येत् ।

(क) आध्मानस्तम्भ-रौक्ष्य-स्फुटन-विमथन-क्षोभ-कम्पप्रतोदाः । कण्ठध्वंसावसादौ श्रमकविलपनं स्रंसशूलप्रभेदाः । पारुष्यं कर्णनादो विषयपरिणति भ्रंशदृष्टिप्रमोहाः । विस्पन्दोद्वघट्टनानि ग्लपनमशयनं ताड़नं पीड़नञ्च । नामोन्नामौ विषादो भ्रमपरिपतने

कुपितस्य प्राणवायोः कर्म्माण्याह—

प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान् ।

कुपितस्योदानवायोः कर्म्माण्याह—

ऊर्द्धजत्रुगतान् रोगान् करोति च विशेषतः ।

कुपितस्य समानवायोः कर्म्माण्याह—

गुल्माग्निसङ्गातिसारप्रभृतीन् कुरुते गदान् ।

कुपितस्य व्यानवायोः कर्म्माण्याह—

क्रुद्धश्च कुरुते रोगान् प्रायशः सर्व्वदेहगान् ।

कुपितस्यापानवायोः कर्म्माण्याह—

क्रुद्धश्च कुरुते रोगान् घोरान् वस्तिगुदाश्रयान् ।

कुपितयोर्व्यानापानयोः कर्म्माण्याह—

शुक्रदोषप्रमेहास्तु व्यानापानप्रकोपजाः ।

युगपत् कुपिताश्चापि देहं भिन्द्युरसंशयम् ।

वातविकाराश्च—पादशूलं, पिण्डिकोद्वेष्टनं, गुदार्त्तिः वृषणोत्क्षेपः, ऊरुसादः, शेफस्तम्भः, विड्भेदः, पार्श्वावमर्द्दः, हृन्मोहः, हृद्द्रावः, वक्ष उद्धर्षः, वक्षउपरोधः, दन्तशैथिल्यं, वाक्सङ्गः, कषायास्यता, मुखशोषः अरसज्ञता, अगन्धज्ञता, घ्राणनाशः, अशब्दश्रवणं, उच्चैःश्रुतिः, वाधिर्य्यं, अक्षिशूलं, केशभूमिस्फुटनञ्च ।

हृष्भनं रोमहर्षौ । विक्षेपाक्षेपशोषग्रहणशुषिरताच्छेदनं वेष्टनञ्च । वर्णःश्यावोऽरुणो वा त्वडपिच महती स्वापविश्लेषसङ्गा । विद्यात् कर्म्माण्यमूनि प्रकुपितमरुतः स्यात् कषायो रसश्च ।

पित्तस्य प्रकोपनान्याह—

क्रोध-शोक-भयायासोपवास-विदग्ध-मैथुनोपगमन--कट्वम्ल-लवण-तीक्ष्णोष्ण-लघुविदाहि-तिलतैलपिण्याककुलत्थ-सर्षपातसी-हरितक-शाक-गोधा-मत्स्याजाविक-मांस-दधि-तक्र--कुर्च्चिका-मस्तु-सौवीरक-सुराविकाराम्लफलकट्वराकप्रभृतिभिः पित्तं प्रकोपमापद्यते।

तदुष्णैरुष्णकाले च मेघान्ते च विशेषतः।
मध्याह्ने चार्द्धरात्रे च जीर्य्यत्यन्ने च कुप्यति।

पित्तस्यात्मरूपाणि कुपितस्य च कर्म्माण्याह—

औष्ण्यं तैक्ष्ण्यं लाघवमनतिस्नेहो वर्णश्चशुक्लारुणवर्ज्जो गन्धश्च विस्रो रसौ कटुकाम्लौ पित्तस्यात्मरूपाण्येवंविधत्वाच्च कर्म्मणः स्वालक्षण्यमिदमस्य भवति।

तं तं शरीरावयवमाविशतो दाहौष्ण्यपाकस्वेदक्लेदकोथ-कण्डूस्रावरागाः यथास्वञ्च गन्धवर्णरसाभिनिर्वर्त्तनं पित्तस्य कर्म्माणि (१)। तैरन्वितं पित्तविकारमेवाध्यवस्येत्।

पित्तविकाराश्च—ओषः, प्लोषः, दवथुः, विदाहः, अन्तर्दाहः, अङ्गदाहः, ऊष्मण आधिक्यम्, अतिस्वेदः, अङ्गगन्धः, शोणितक्लेदः, मांसक्लेदः, त्वग्दाहः, मांसदाहः, त्वङ्मांसावदरणं, चर्म्मदरणं, रक्तकोठकाः, रक्तमण्डलानि, तिक्तास्यता,

(१) विस्फोटाम्लकधूमकाः प्रलपनं स्वेदस्तुतिमूर्च्छनम्। दौर्गन्ध्यम् दरणं मदो विसरणं पाकोऽरतिस्तृड्भ्रमौ। उष्मा तृप्तितमः-प्रवेशदहनं कट्वम्लतिक्ता रसाः। वर्णः पाण्डुविवर्ज्जितः कथितता कर्म्माणि पित्तस्य वै।

पूतिमुखता, तृष्णाया आधिक्यं, आस्यविपाकः, गलपाकः, अक्षिपाकः, जीवादानम् ।

श्लेष्मणः प्रकोपनान्याह—

दिवास्वप्नाव्यायामालस्य-मधुराम्ल-लवण-स्निग्ध-गुरु-पिच्छिलाभिष्यन्दि-हायनक-यवक-नैषधेत्कट-माष--महामाष-गोधूम-तिलपिष्टविकृति-दधि-दुग्ध-कृशरापायसेक्षुविकारानुपौदकमांस-वसा-बिस-मृणाल-कशेरुक-शृङ्गाटक-मधुर-वल्लीफल--समाशनाध्यशन-प्रभृतिभिः श्लेष्मा प्रकोप मापद्यते ।

स शीतैः शीतकाले च वसन्ते च विशेषतः ।
पूर्व्वाह्णे च प्रदोषे च भुक्तमात्रे प्रकुप्यति ।

श्लेष्मण आत्मरूपाणि कुपितस्य च कर्म्माण्याह—

स्नेहशैत्यशौक्ल्यगौरवमाधुर्य्यमात्स्नानि श्लेष्मण आत्मरूपाण्येवंविधत्वाच्च कर्म्मणः स्वालक्षण्य मिदमस्य भवति ।

तं तं शरीरावयवमाविशतः श्वैत्यशैत्यकण्डूस्थैर्य्य-गौरव-स्नेहस्तम्भसुप्तिक्लेदोपदेहबन्धमाधुर्य्य चिरकारित्वानि श्लेष्मणः कर्म्माणि (२) । तैरन्वितं श्लेष्मविकार मेवाध्यवस्येत् ।

श्लेष्मविकाराश्च—मुखमाधुर्य्यं, मुखस्रावः, श्लेष्मोद्गीरणं, हृदयोपलेपः, कण्ठोपलेपः, धमनीप्रतिचयः, अतिस्थौल्यं, मन्दाग्निता च ।

(२) तृप्तिस्तन्द्रागुरुतास्तैमित्यं कठिनता मलाधिक्यं । स्नेहापक्त्युपलेपाः शैत्यं कण्डूः प्रसेकश्च । चिरकर्तृत्वं शोथो निद्राधिक्यं रसौ पटुस्वादू । वर्णः श्वेतोऽलसता कर्म्माणि कफस्य जानीयात् ।

वातादीनां चयवृद्धिलक्षणमाह—

तत्र 'वातक्षये'—मन्दचेष्टता, अल्पवाक्त्वं, अप्रहर्षः, मूढ़संज्ञता। 'वातवृद्धौ'—त्वक्पारुष्यं, कार्श्यं कार्ष्ण्यं, गात्रस्फुरणं, उष्णकामिता, निद्रानाशः, अल्पबलत्वं, गाढ़वर्चस्त्वम् ।

'पित्तक्षये'—मन्दोष्माग्निता, निष्प्रभत्वञ्च। 'पित्तवृद्धौ' पीतावभासता, सन्तापः, शीतकामित्वं, अल्पनिद्रता, मूर्च्छा, बलहानिः, इन्द्रियदौर्बल्यम्, पीतविण्मूत्रनेत्रत्वम् ।

'श्लेष्मक्षये'—रूक्षता, अन्तर्दाहः, आमाशयेतराशयानां शून्यता, सन्धिशैथिल्यं, तृष्णा, दौर्बल्यं, प्रजागरणञ्च। 'श्लेष्मवृद्धौ'—शौक्ल्यं, शैत्यं, स्थैर्य्यं, गौरवं, अवसादः, तन्द्रा, निद्रा सन्धिविश्लेषश्च ।

आमलक्षणनिर्द्देशपूर्व्वकं सामानां निरामानाञ्च वातपित्तकफानां लक्षणमाह—

ऊष्मणोऽल्पबलत्वेन धातुमाद्यमपाचितम् ।
दुष्टमामाशयगतं रसमामं प्रचक्षते ।
आमेन तेन संयुक्ता दोषा दुष्याश्च दूषिताः ।
सामा इत्युपदिश्यन्ते ये च रोगास्तदुद्भवाः ।
स्रोतोरोधबलभ्रंशगौरवानिलमूढ़ताः ।
आलस्यापक्तिनिष्ठीवमलभेदारुचिक्लमाः ।
लिङ्गं मलानां सामानां निरामाणां विपर्य्ययः ।

साम निरामवायोर्लक्षणमाह—

वायुः 'सामो' विबन्धाग्निसादतन्द्रान्त्रकूजनैः ।
वेदनाशोथनिस्तोदैः क्रमशोऽङ्गानि पीड़येत् ।

विचरेद् युगपच्चापि गृह्णाति कूपितो भृशम् ।
स्नेहाद्यै र्वृद्धिमाप्नोति सूर्य्यमेघोदये निशि ।
'निरामो' विशदो रुक्षः निर्विबन्धोऽल्पवेदनः ।
विपरीतगुणैः शान्तिं स्निग्धैर्याति विशेषतः ।

सामनिरामपित्तस्य लक्षणमाह—

दुर्गन्धं हरितं श्यावं पित्तमम्लं स्थिरं गुरु ।
अम्लिकाकण्ठहृद्दाहकरं 'सामं' विनिर्द्दिशेत् ।
आताम्रं पीतमत्युष्णं रसे कटुक मस्थिरं ।
'पक्व' विगन्धं विज्ञेयं रुचिपक्तृबलप्रदम् ।

सामनिरामश्लेष्मणो लक्षणमाह—

आविलस्तन्तुलस्त्यानः कण्ठदेशेऽवतिष्ठते ।
'सामो' बलासो दुर्गन्धः क्षुदुद्गारविघातकृत् ।
फेनवान् पिण्डितः पाण्डुर्निःसारोऽगन्ध एव च ।
'पक्वः' स एव विज्ञेयश्छेदवान् वक्त्रशुद्धिकृत् ।

तृतीयः परिच्छेदः ।

अव्यापन्नानां रसादिधातूनां कर्म्माणि ।

रसं कारणक्रमोत्पत्तिलक्षणस्थानकार्य्यैर्निर्द्दिशन्नाह—

तत्र पाञ्चभौतिकस्य चतुर्विधस्य षड्रसस्य द्विविधवीर्य्यस्य अष्टविधवीर्य्यस्य वा अनेकगुणयुक्तस्य आहारस्य सम्यक् परिणतस्य यस्तेजोभूतसारः परमसूक्ष्मः स रस इत्युच्यते ।

रस गतौ धातुरहरहर्गच्छतीत्यतोरसः। स शब्दार्च्चिर्ज्जल-सन्तानवदणुना विशेषेणानुधावत्येवं शरीरं केवलं तस्य स्थानं हृदयं, स हृदयाच्चतुर्विंशतिर्धमनी रनुप्रविश्य ऊर्द्ध्वगा दश दश चाधोगामिन्यश्चतस्रस्तिर्य्यग्गाः कृत्स्नं शरीर महरह स्तर्पयति धारयति यापयति जीवयति चादृष्टहेतुकेन कर्म्मणा।

तस्मिन् सर्व्वशरीरावयवदोषधातुमलाशयानुसारिणि रसे जिज्ञासा किमयं सौम्य स्तैजस इति अत्रोच्यते स खलु द्रवानुसारी स्नेहन-जीवन-तर्पण-धारणादिभिर्विशेषैः सौम्य इत्यवगम्यते।

तत्रैषां सर्व्वधातूनामन्नपानरसः प्रीणयिता। स एवान्नरसो वृद्धानां परिपक्वशरीरत्वादप्रीणनो भवति। रसस्तुष्टिं प्रीणनं रक्तपुष्टिञ्च करोति।

रसजं पुरुषं विद्या द्रसं रक्षेत् प्रयत्नतः।
अन्नात् पानाच्च मतिमानाचाराच्चाप्यतन्द्रितः।

रसस्याप्यत्वं व्युत्पाद्य रक्तहेतुतां दर्शयन्नाह—

स खल्वप्यो रसो यकृत्प्लीहानौ प्राप्य रागमुपैति।
रञ्जितास्तेजसा त्वापः शरीरस्थेन देहिनाम्।
अव्यापन्नाः प्रसन्नेन रक्तमित्यभिधीयते।

रक्तस्य पञ्चभूतात्मकलक्षणान्याह—

विस्रता द्रवता रागः स्पन्दनं लघुता तथा।
भूम्यादीनां गुणा ह्येते दृश्यन्ते चात्र शोणिते।

रक्तगुणानाह—

अनुष्णशीतं मधुरं स्निग्धं रक्तञ्च वर्णतः ।
शोणितं गुरु विस्रं स्यात् ।

विशुद्धरक्तलक्षणमाह—

तपनीयेन्द्रगोपाभं पद्मालक्तकसन्निभम् ।
गुञ्जाफलसवर्णञ्च विशुद्धं विद्धि शोणितम् ।
रक्तं वर्णप्रसादं मांसपुष्टिं जीवयति च ।
तद्विशुद्धं हि रुधिरं बलवर्णसुखायुषा ।
युनक्ति प्राणिनं प्राणः शोणितं ह्यनुवर्त्तते ।

अव्यापन्नानां मांसादिधातूनां आर्त्तवस्य च कर्म्माण्याह—

'मांसं' शरीरपुष्टिं मेदसश्च । 'मेदः' स्नेहस्वेदौ दृढ़त्वं पुष्टिमस्थ्नाञ्च । 'अस्थि' देहधारणं मज्ज्ञः पुष्टिं च । 'मज्जा' प्रीतिं स्नेहं बलं शुक्रपुष्टिं पूरणमस्थ्नाञ्च करोति । 'शुक्रं' धैर्य्यं च्यवनं प्रीतिं देहबलं हर्षं वीजार्थञ्च । रक्तलक्षण 'मार्त्तवं' यथोक्तं अकृत्रिमम् गर्भकृच्च । रसादेव स्त्रिया रक्तं रजः संज्ञं प्रपद्यते । तद्वर्षाद् द्वादशादूर्द्ध्वं याति पञ्चाशतः क्षयं । आर्त्तवं शोणितं त्वाग्नेयं अग्निसोमीयत्वाद् गर्भस्य ।

चतुर्थः परिच्छेदः।

व्यापन्नानां रसादिधातूनां कर्म्माणि।
'रसक्षये' हृत्पीड़ा कम्पः शून्यता तृष्णा च।

रक्तस्य प्रकोपनानि वक्ष्यति—

पित्तप्रकोपनैरेव चाभीक्ष्णं द्रवस्निग्धगुरुभिश्चाहारै र्दिवा-स्वप्न-क्रोधानलातप-श्रमाभिघाता-जीर्णविरुद्धाध्यशनादिभिर-सृक् प्रकोप मापंद्यते।

यस्माद्रक्तं विना दोषैर्नकदाचित् प्रकुप्यति।
तस्मात्तस्य यथादोषं कालं विद्यात् प्रकोपने।

वातादिदुष्टस्य रक्तस्य लक्षणमाह—

तत्र फेनिलं, अरुणं, कृष्णं, परुषं, तनु शीघ्रमवस्कन्दि च 'वातेन दुष्टम्'। नीलं पीतं हरितं श्यावं विस्रं अनिष्टं पिपीलिकामक्षिकानां अवस्कन्दि च 'पित्तदुष्टम्'। गैरिकोदक-प्रतीकाशं स्निग्धं शीतलं बहलं पिच्छिलं चिरस्रावि, मांस-पेशीप्रभम् 'श्लेष्मदुष्टञ्च'। सर्व्वलक्षणसंयुक्तं काञ्जिकाभं विशेषतो दुर्गन्धि च 'सन्निपातदुष्टम्'। द्विदोषलिङ्गं संसृष्टं। 'शोणितक्षये' त्वक्पारुष्यं अम्लशीतप्रार्थना, सिराशैथिल्यञ्च। 'मांसक्षये' स्फिग्गण्डौष्ठोपस्थोरुवक्षःकक्षापिण्डिकोदर-ग्रीवा-शुष्कता रौक्ष्यतोदौ गात्राणां सदनं धमनीशैथिल्यञ्च। 'मेदःक्षये' प्लीहाभिवृद्धिः सन्धिशून्यता रौक्ष्यं मेदुरमांसप्रार्थना च। 'अस्थिक्षये' अस्थितोदः दन्तनखभङ्गः रौक्ष्यञ्च। 'मज्ज-

क्षये'ऽल्पशुक्रता, पर्व्वभेदोऽस्थिनिस्तोदः अस्थिशून्यता च। 'शुक्र-क्षये' मेढ्रवृषणवेदना, अशक्तिर्मैथुने, चिराद्वा प्रसेकः प्रसेके चाल्परक्तशुक्रदर्शनञ्च। *

'रसोऽतिवृद्धः' हृदयोत्क्लेशं, प्रसेकञ्चापादयति। 'अति वृद्धं रक्तं' रक्ताङ्गाक्षतां सिरापूर्णत्वञ्च। 'अतिवृद्धं मांसं' स्फिग् गण्डौष्ठोपस्थोरुबाहुजङ्घासु वृद्धिं गुरुगात्रताञ्च। 'मेदः' स्निग्धा-

---

* दोषधात्वादिक्षयविनाशार्थं देयमन्नादिकं यथा—

यवान् मुद्गान् हरेणूंश्च रूक्षञ्च लघुभोजनम्। कषायं कटुतिक्तञ्च 'वातक्षीणो'ऽभिकाङ्क्षति। तिलमाषकुलत्थादिपिष्टान्नविकृतिं तथा। मस्तु शुक्ताम्लतक्राणि 'पित्त-क्षीण'स्तथा दधि। मांसं माहिषं वाराहमाजं गुड़गुरूणि च। श्लेष्मक्षीणो'ऽभिलषति क्षीरस्तब्धदधीनि च। इक्षुमांसरसं मद्यं मधुसर्पिर्गुड़ोदकम्। षडङ्ग् मांसं यवागूञ्च 'रसक्षीणो'ऽभिकाङ्क्षति। द्राक्षादाड़िमयुक्तानि सस्नेहलवणानि च। रक्त-सिद्धानि मांसानि 'रक्तक्षीणो'ऽभिकाङ्क्षति। अम्लानि दधिसिद्धानि तथा षाड़वकानि च। स्थूलक्रव्यादमांसानि 'मांसक्षीणो'ऽभिकाङ्क्षति। मेदःसिद्धानि मांसानि ग्राम्या-नूपौदकानि च। सक्षाराणि विशेषेण 'मेदःक्षीणो'ऽभिकाङ्क्षति। रसान् सुसिद्धान् सास्थीनि मांसानीहाभिकाङ्क्षति। 'अस्थिक्षीणः' श्लयं मांसं मज्जास्थिस्नेहसंयुक्तम्। स्वप्नमास संयुक्तं द्रव्यं 'मज्जक्षीणो'ऽभिकाङ्क्षति। मयूरकुक्कुटाण्डानि हंससारसयो-स्तथा। ग्राम्यानूपौदकानाञ्च 'शुक्रक्षीणो'ऽभिकाङ्क्षति। यमानी यवकाम्लानि शाकानि विविधानि च। मायूरं मांसयूषञ्च 'वर्च्चःक्षीणो'ऽभिकाङ्क्षति। पेयमिक्षुरसं क्षीरं सगुड़ं वदरोदकं। 'मूत्रक्षीणो'ऽभिलषति एपुसैर्व्वारुकाणि च। अभ्यङ्गं मर्द्दनं यच्च निवातशयनासनम्। गुरुप्रावरणञ्चैव 'स्वेदक्षीणो'भिकाङ्क्षति। कटुस्नलवणाम्लानि विदाहीनि गुरूणि च। फलशाकानुपानानि स्त्री वाञ्छत्यार्त्तवक्षयात्। मृगाजा-विवराहानां गर्भान् वाञ्छति संस्कृतान्। वसामूल्यप्रकारादीन् भोक्तुं गर्भपरिक्षये। यषशाल्यन्नमांसानि गोक्षीरं शर्करास्तथा आसवं दधि हृद्यानि 'क्षयेस्तन्यस्य' वाञ्छति।

ङ्गतां उदरपार्श्ववृद्धिं कासश्वासादीन् दौर्गन्ध्यञ्च। 'अतिवृद्धं अस्थि' अध्यस्थीन्यधिदन्तांश्च। 'अतिवृद्धः मज्जा' सर्व्वाङ्गनेत्र-गौरवं। 'अतिवृद्धं शुक्रं शुक्राश्मरी मतिप्रादुर्भावञ्च। 'अति-वृद्धं आर्त्तवं' अङ्गमर्द्दं अतिप्रवृत्तिं दौर्गन्ध्यञ्च।

वृद्धानां क्षीणानाञ्च पुरीषादीनां कर्म्माख्याह—

'पुरीषक्षये' हृदयपार्श्वपीड़ा सशब्दस्य च वायोरूर्द्ध्वगमनं कुक्षौ सञ्चरणञ्च। 'मूत्रक्षये' वस्तितोदः, अल्पमूत्रता च। 'स्वेदक्षये' स्तब्धरोमकूपता, त्वक्शोषः स्पर्शवैगुण्यं स्वेद-नाशश्च।

'अतिवृद्धं पुरीषं' आटोपं कुक्षिशूलञ्च। 'अतिवृद्धं मूत्रं' मूत्रवृद्धिं मुहुर्मुहुः प्रवृत्तिं वस्तितोदं आध्मानञ्च। 'अतिवृद्धः स्वेदः'—त्वचो दौर्गन्ध्यं कण्डूञ्च।

अथ निदानपञ्चकम्।

निदान-पूर्व्वरूप-रूपोपशय-संप्राप्तितश्च व्याधेरुपलब्धि-र्भवति। तत्र निदानेन भविष्यंश्च भवंश्च भूतश्च व्याधिरनु-मीयते। पूर्व्वरूपेण भविष्यन्नेव व्याधिः। लिङ्गेन भूत एव व्याधिः। उपशयेन भविष्यंश्च भवंश्च भूतश्च व्याधिः। संप्राप्ति-तस्तु भवंश्च भूतश्च व्याधिः।

निदानादिभ्यः पञ्चभ्यः कार्त्स्न्येन व्याधिज्ञानं भवति। न ह्येकेन ज्ञाते व्याधौ पुनरपरेण ज्ञाते कृतकरत्वं। निदानेन हि

व्याधिर्भविष्यतीति ज्ञायते। बहूना मेकनिदानकानां व्याधीनां को व्याधिर्भविष्यतीति न निश्चयेन ज्ञायते। तस्मात् पूर्व्वरूपादीनि वक्तव्यानि भवन्ति। पूर्व्वरूपमात्रेऽभिहिते न वातजादि-विशेषेण ज्ञायते। तस्माद्रूपादीनि वक्तव्यानि भवन्ति। रूपमात्रे-ऽभिहिते भाविव्याधि र्न प्रतीयते, साध्यासाध्यत्वविशेषश्च न ज्ञायते यदुक्तं "पूर्व्वरूपाणि सर्व्वाणि ज्वरोक्तान्यतिमात्रया यं विशन्ति विशत्येनं मृत्युर्ज्वरपुरःसरः। अन्यस्यापि च रोगस्य पूर्व्व-रूपाणि यं नरं। विशन्त्यनेन कल्पेन तस्यापि मरणं ध्रुवं"। पूर्व्वरूपरूपयोर्द्वयोरेवाभिधाने गूढ़लिङ्गव्याधिज्ञानं न भवति, तस्मादुपशयो वक्तव्यो भवति। उक्तं हि "गूढ़लिङ्गं व्याधिमुप-शयानुपशयाभ्यां परीक्षेत"। पूर्व्वरूपरूपोपशयेष्वभिहितेषु सङ्ख्यादिभिर्विना दोषाणां मंशांशादितः कोपाद्यवधारणं न भवति। तस्मात् संप्राप्तिश्च वक्तव्या भवति। चतसृषु पूर्व्व-रूपरूपोपशयसंप्राप्तिष्वभिहितासु निदानेऽनभिहिते निदान-विशेषजत्वेन न व्याधिर्ज्ञायते। सन्तर्पणोत्थेऽपतर्पणं प्रयोजन मपतर्पणोत्थे सन्तर्पणमित्येवं निदानपरिवर्ज्जनञ्चेति। तस्मात् पञ्चैव निदानादीनि कार्त्स्न्येन व्याधिज्ञानार्थं विज्ञानानि वक्त-व्यानि भवन्ति। (भास्करोदये श्रीमद्‌गङ्गाधरः)।

तत्र निदानमाह।

सेतिकर्त्तव्यताको रोगोत्पत्तिहेतुर्निदानं। यन्मते दोषति कर्त्तव्यतारूपा संप्राप्तिरिष्यते तन्मते संप्राप्तिव्युदासार्थं सेति-

कर्त्तव्यातक इति पदं । तस्या दोषेति कर्त्तव्यतारूपाया इति-कर्त्तव्यतान्तराभावात् । यन्मते व्याधिजन्म संप्राप्ति स्तन्मते व्याध्युत्पत्तिहेतु र्निदानमिति लक्षणं । उभयत्रापि उत्पत्तिपदं ज्ञप्तिहेतुपूर्वरूपादिव्यवच्छेदार्थम् । *

स च हेतुरनेकधा । तत्र (१) सन्निकृष्टो यथा—नक्तंदिनर्त्तुभुक्तांशा दोषप्रकोपस्य हेतवः, न ते चयादिकमपेक्षन्ते । (२) विप्रकृष्टो यथा—'हेमन्ते निचितः श्लेष्मा वसन्ते कफरोगकृत् किम्वा सन्निकृष्टो ज्वरस्य रूक्षादिसेवा विप्रकृष्टो रुद्रकोपः । (३) व्यभिचारी यथा—यो दुर्व्वलत्वाद् व्याधिकरणासमर्थः । (४) प्राधानिको यथा विषादिः ।

(५) असात्म्येन्द्रियार्थसंयोग-प्रज्ञापराध-परिणामभेदात् त्रिविधः—तत्र असात्म्येन्द्रियार्थसंयोगः अयोगातियोगमिथ्यायोगयुक्ताः शब्दरूपरसादयः ऐन्द्रियकव्याधिहेतवो भवन्ति ।

तत्र श्रवणार्थातियोगः अतिमात्रस्तनितपटहोत्क्रुष्टादीनां शब्दानां अतिमात्रश्रवणं 'श्रवणातियोगः' । सर्व्वशोऽश्रवणं

---

* नच दोषेतिकर्त्तव्यता निदानं त्रिविधेषूक्तत्वाभावात् । व्याध्युत्पत्तिहेतुर्निदानं । दोषेतिकर्त्तव्यताया उत्पत्तित्वेन तस्या उत्पत्ते र्न हेतुः सा भवति ; ततो न निदानम् । यदि सेतिकर्त्तव्यताको रोगोत्पत्तिहेतुर्निदानमित्युक्ता सेतिकर्त्तव्यताकपदेन दोषेतिकर्त्तव्यतारूपसंप्राप्ति र्व्यवच्छिद्यते तदा वाह्यहेतूनामाहारादीनामपि चेतिकर्त्तव्यताया इतिकर्त्तव्यतान्तराभावादनिदानत्वप्रसङ्गः । हेतुत्वं हि सव्यापारस्यैव भवतीति हेतुपदेन हेतो र्व्यापारस्य संग्रहात् व्याध्युत्पत्तिहेतुर्निदानम् । दोषास्तु विषमा व्याधय एवेति तद्व्यापारा न निदानमिति । **भास्करोदये श्रीमद्गङ्गाधरः ।**

'अयोग:'। परुषेष्टविनाशोपघातप्रधर्षणभीषणादिशब्दश्रवणं 'श्रवणमिथ्यायोग:'।

अतिप्रभावतां दृश्यानां दर्शनं दृश्यानां अतिमात्रदर्शनं 'दर्शनातियोग:' सर्व्वशोऽदर्शनं 'दर्शनायोग:'। अतिसूक्ष्मातिविप्रकृष्टरौद्रभैरवाद्भुतद्विष्टवीभत्सविकृतादिरूपदर्शनं 'दर्शनमिथ्यायोग:'।

तथा रसानामत्यादानं 'रसनातियोग:'। अनादानं 'रसनायोग:'। आहारविधिविशेषायतनानि प्रकृतिकरणसंयोगराशिदेशकालोपयोगसंस्थापयोक्तृष्टमानि। तेषां राशिवर्ज्जमन्यथात्वेनाहारोपयोग: 'रसनमिथ्यायोग:'।

तथातितीक्ष्णोग्राभिष्यन्दीनां गन्धानामतिमात्रघ्राणं 'घ्राणातियोग:'। सर्व्वशोऽघ्राणं 'घ्राणायोग:'। पूतिद्विष्टाभिध्यक्लिन्नविषपवनकुणपगन्धादिघ्राणं 'घ्राणमिथ्यायोग:'।

तथातिशीतोष्णानां स्पृश्यानां स्नानाभ्यङ्गोत्सादनादीनाञ्चात्युपसेवनं 'स्पर्शनातियोग:'। सर्व्वशोऽस्पर्शनं 'स्पर्शनायोग:' विषमस्थानाभिघाताशुचिसंस्पर्शादयश्च 'स्पर्शनमिथ्यायोग:'।

(६) अथ बुद्धेरयोगातियोगमिथ्यायोगास्तु धीधृतिस्मृतिविभ्रंश: 'प्रज्ञापराध:' उक्त:। तत्र धीधृतिस्मृतीनां अयोगातियोगमिथ्यायोगे अशुभानि कर्म्माणि आरभते, समयोगेन शुभानि। तत् कर्म्म वाङ्मन:शरीरप्रवृत्ति:। तत्र धीधृतिस्मृतीनां समयोगाद् या वाङ्मन:शरीरप्रवृत्ति स्तत् कर्म्म शुभं स्वास्थ्यहेतु:, या चातियोगायोगमिथ्यायोगैस्तत्कर्म्माशुभं

रोगहेतुः । (७) शीतोष्णवर्षलक्षणः पुनर्हेमन्तग्रीष्मवर्षः संवत्सरः कालः । तत्रातिमात्रस्वलक्षणः कालः 'कालातियोगः', हीनस्वलक्षणः कालः 'कालायोगः', यथास्वलक्षण-विपरीतलक्षणस्तु कालः 'कालमिथ्यायोगः' । कालः पुनः परिणाम उच्यते । (८) दोषहेतुर्यथा—चयप्रकोपप्रशमनिमित्ता यथर्त्तूत्पन्ना मधुरादयः। (९) व्याधिहेतुर्यथा—मृद्भक्षणं पाण्डुरोगस्य कारणं । यद्यपि मृदपि दोषं प्रकोपयत्येव यदुक्तं चरके—'कषाया मारुतं पित्तमूषरा मधुरा कफं' इति तथापि तज्जैर्दोषैः पाण्डुरोग एवारभ्यते नत्वन्यो विकार इति व्याधिहेतुता भवति । (१०) उभयहेतुर्यथा वातरक्ते "हस्त्यश्वोष्ट्रैर्गच्छतश्चाश्नतश्च" इत्यादि । तत्र यद्यपि दोषप्रकोपपूर्व्वकमेव व्याधिजननं तथापि दोषवद्दूष्यावपि तस्य कारणत्वमिति बोधयति । तेन तत्र न व्याधिहरमात्रं भेषजं प्रयोज्यं किन्तूभयप्रत्यनीकं । (११) उत्पादको हेतुर्यथा—हेमन्तजो मधुररसः कफस्य । (१२) व्यञ्जको हेतुर्यथा—तस्यैव कफस्य व्यञ्जको वसन्ते सूर्य्यसन्तापः । (१३) वाह्य हेतुर्यथा आहाराचारकालादिः । (१४) आभ्यन्तरहेतुर्यथा—दोषाः दूष्याश्च । (१५) प्राकृतोहेतुर्यथा—वसन्ते श्लेष्मा, शरदि पित्तं, वर्षासु वायुः । (१६) विकृतोयथा—वसन्ते पित्तं वायुर्वा, वर्षासु कफः पित्तंवा, शरदि कफो वायुर्व्वा । अस्य प्रयोजनं सुखसाध्यत्वादि । यदुक्तं—"प्राकृतः सुखसाध्यस्तु वसन्तशरदुद्भवः" । (१७) अनुवन्ध्यः प्रधानं (१८) अनुवन्धः अप्रधानं । यदाह चरकः—"स्वतन्त्रो व्यक्तलिङ्गो यथोक्तसमुत्थानोपशमो भवत्यनु-

वन्ध्यः, तद्विपरीतलक्षणस्त्वनुवन्धः”। अस्य प्रयोजनं संसर्गजे व्याधौ अनुवन्ध्यो विशेषेण चिकित्स्यः, अनुवन्धाऽविरोधेन। (१९) प्रकृतिविकृतितो यथा—वातप्रकृतेर्वातरोगः कष्टसाध्यो भवति। कफपित्तप्रकृतेस्तु सुखसाध्यः। (२०) आशयापकर्षतो यथा—यदा स्वमानस्थितमेव दोषं स्वाशयादाकृष्य वायुः स्थानान्तरं गमयति तदा समानस्थोऽपि स विकारं जनयति। यदाह चरकः—“प्रकृतिस्थं” यदा पित्तं मारुतः श्लेष्मणः चये। स्थानादादाय गात्रेषु यत्र यत्र विसर्पति” इत्यादि। अस्य प्रयोजनं वातस्यैव तत्र विगुणस्य स्वस्थानानयनं कार्य्यं नतु पित्तस्य ह्रासनं। ये त्वेनां पित्तस्य स्थानाकृष्टिं न विदन्ति ते दाहोपलम्भेन पित्तवृद्धिं मन्यमानाः पित्तं ह्रासयन्तः पित्तक्षयलक्षणं रोगान्तर मेवोत्पादयन्त आतुरमतिपातयन्तीति भट्टारहरिचन्द्रः।

पूर्व्वरूपमाह।

भाविव्याधिबोधक मेव लिङ्गं पूर्व्वरूपमिति। एव-कारेण निदानोपशययोः संप्राप्तेश्च दोषेतिकर्त्तव्यतारूपाया व्यवच्छेदः। भाविपदेन रूपस्य, लिङ्गपदेन चक्षुरादेर्व्युदास स्तस्य घटज्ञानादेः साधारणत्वेनालिङ्गत्वात्। असाधारणं हि लिङ्गं भवति। एतच्च पूर्व्वरूपमविद्यमानस्य व्याधे लिङ्गं भवत्येव। यथा विशिष्टमेघोदयो वृष्टेः।*

* पूर्व्वरूपस्य लक्षणमाह चरकः—“पूर्वरूपं प्रागुत्पत्तिलक्षणं व्याधेः”। प्रागुत्पत्तेर्लक्षणं व्याधेरनुमितिकरणं लिङ्गं पूर्वरूपम्। प्राक्पदेन व्याधेरुत्पत्तिकालिकलक्षणमुत्पन्नस्य

रूपमाह । *

उत्पन्नव्याधिबोधकमेव लिङ्गं रूपमिति लक्षणम्। उत्पन्नपदं पूर्वरूपव्यवच्छेदार्थं। एवकारेण निदानसंप्राप्त्युपशया व्यव-

---

च लक्षणं न पूर्वरूपमिति। उत्पत्तिश्च त्रिकाला, प्रागुत्पत्तिर्वर्त्तमानोत्पत्तिरतीतोत्पत्तिश्च। प्रागुत्पत्तिस्तु यावान् व्यापार उत्पत्तौ भवत्यनुकूलस्तावतां व्यापाराणामुत्पत्त्यारम्भसमाप्तिपर्य्यन्तव्यापारात् पूर्व्वं यावद्व्यापार उत्पत्त्यनुकूलः सा प्रागुत्पत्तिर्भविष्यदुत्पत्तिस्तल्लक्षणं पूर्व्वरूपम्। स्थानसंश्रये तल्लक्षणं भवति यद्व्याविभावित्वानुमानं, नतु यावदेव पूर्वं व्यापारजातं तावदेव प्रागुत्पत्तिर्भवति, उत्पत्तिफलेऽनुकूलत्वाभावात्। यथा तण्डुलपाके चेत्रकर्षण वीजवपन-तण्डुलकरणादिव्यापारो न पाकप्रागवस्था-व्यापारः। तण्डुलैर्यावत्कर्म निष्पाद्यं तावतां कर्मणामनुकूलत्वेन सामान्यत्वात्। पाकार्थन्तु यत्तण्डुलानयनप्रचालनस्थाल्यारोपणादि व्यापारजातं स भाविपाकानुकूलव्यापारः, भविष्यत्पाकः। विक्लित्ति-फलारम्भसमाप्तिपर्य्यन्त-व्यापारो वर्त्तमानपाकव्यापारः। विक्लित्तिनिष्पत्तिसमाप्त्युत्तरं निवृत्तिव्यापारोऽतीतपाकव्यापारः। यदा तण्डुलानयन-प्रचालनादिकं करोति तदानुमीयते तण्डुलान् पक्ष्यतीति। यदा तु क्रयाक्रयादिकं करोति तदा नानुमीयते पक्ष्यतीति, क्रियावधारणाभावात्। दास्यति चूर्णयिष्यति चेत्येवमादयोऽनवधार्य्यक्रियासम्भवात्। तथा दोषाणां स्थानसंश्रये यल्लक्षणं भवति तेनानुमीयतेऽसौ व्याधिर्भविष्यतीति। यदा तु चयप्रकोपप्रसरलक्षणानि भवन्ति तदा नानुमीयते भविष्यत्यसौ व्याधिरिति, अवधार्य्यव्याधिज्ञानाजनकत्वात् चयादिलक्षणानाम्।

(भास्करोदये श्रीमद्गङ्गाधरः)।

* रूपस्य लक्षणमाह चरकः—'व्याधेः प्रादुर्भूतलक्षणं रूपम्'। तत्र प्रादुर्भूतेति क्तान्तप्रयोगेनोत्पन्नव्याधिलक्षणं रूपमित्युक्तं, नतूत्पद्यमानस्य भविष्यतो वा। न च यस्य व्याधेर्यद्रूपं तत् सर्व्वमेव जायमानस्याव्यक्तं वर्त्तते, यदेव व्यक्ततां यातं रूपमुच्यते प्रमादिभिरिति। तस्मा" ल्लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तद्यथायथम्। तदेक

च्छियन्ते। तेषां उत्पन्नानुत्पन्नव्याधिबोधकत्वात्। लिङ्ग-पदेन चक्षुरादेर्व्यदासः। यन्मते व्याधिजन्यरूपा संप्राप्तिस्तन्मते तस्या लिङ्गपदेन व्यवच्छेदः। नहि सा व्याधिज्ञाने लिङ्गं किन्तु कारणमात्रं। ननु रूपेण व्याधिर्ज्ञायते नच रूपव्यति-रेकेण व्याधिरुपलभ्यते, यतो मिलिता अरुच्यादय एव ज्वरः, कासाद्येकादशरूपाण्येव राजयक्ष्मा उच्यते। नैवं तथाविध-दोषदूष्यसंमूर्च्छनाविशेषो ज्वरादिरूपोव्याधि स्तत्कार्य्याश्चा-रुच्यादयः। किम्बा अरुच्यादय एव प्रत्येकशो रूपाणि तत्-समुदायो व्याधिः। यतः समुदायिभ्योऽन्य एव समुदायः,

---

व्यक्ततां यातं रूपमित्यभिधीयते" इति रूपस्य लक्षणं यदाह तन्नयुक्तम्। सर्व्वविध-रूपोपसंग्रहाभावाच्च। योहि भावो यथारूपेण प्रादुर्भूत स्तस्य तद्रूपस्य लक्षणं रूपम्। तेन यथा सञ्चितो दोषस्तया तस्य सञ्चितस्य दोषस्य लक्षणं रूपं। एवं यथा प्रकुपितो दोषस्तया प्रकुपितस्य लक्षणं तस्य रूपम्। एवं यथा प्रसृतो दोषस्तया प्रसृतदोषस्य लक्षणं तस्य रूपमिति। तर्हि च स्थानसंश्रयी च दोषो यथा तस्य लक्षणं तस्य रूपं। किन्तु भाविज्वरादीनां पूर्व्वरूपं नतु रूपं प्रादुर्भूतत्वाभावाज्ज्वरादीनां। एवं जायमाने व्याधौ यथाभूतस्य लक्षणं तत्तस्य तथाभूतस्य रूपं। एवं जातस्य यथाभूतस्य यल्लक्षणं तत्तथाभूतस्य रूपमिति सर्व्वत्र रूपं सङ्गतम्। नतु "तदेव व्यक्ततां यातं रूपमित्यभिधीयते" इति लक्षणं सर्व्वत्र सङ्गच्छते तस्मादयुक्तं। नन्वेवं चेत् उपद्रवारिष्टयोरपि सङ्गतं स्यादिति। स्यादेव, उपद्रवोऽपि कृच्छ्रसाध्यासाध्यव्याधे रूपमेव। अरिष्टञ्च भविष्यतो मरणस्य रूपमेव। प्रादुर्भूतलक्षणमिति यः प्रादुर्भूतः स लक्ष्यतेऽनेन तत् प्रादुर्भूतलक्षणम्। लक्षणं चतुर्विधं (१) स्वरूपलक्षणं (२) पूर्व्ववल्लक्षणं (३) शेषवल्लक्षणं (४) सामान्यतोदृष्टं च लक्षणं। (१) यथा तेजोमयमूर्त्तिं वह्नि र्द्रवमयमूर्त्तिं र्जलं खरमूर्त्तिः पृथिवी। तथा स्वेदावरोधसन्तापसर्व्वाङ्गग्रहणयोगपद्य-लक्षणोज्वरः। देहेन्द्रियमनःसन्तापलक्षणो वा। गोस्तनकदम्बपुष्पसिद्धार्थकाद्यनेक-

यथा—खदिरतरूणां वनं। अन्ये तु राहोः शिरः शिलापुत्रस्य शरीरमितिवत्, असत्यपि भेदे भेदविवक्षया समर्थयन्ति। ननु विकारो दुःखमेवेति चरकवचनात् दुःखस्यात्मगुणस्य कथमरुच्यादिसमुदायत्वं, नैवं, दुःखयतीतिदुःखमिति व्युत्पत्त्या दुःखहेतोर्धातुवैषम्यादे र्व्याधित्वस्वीकारात्। अरुच्यादयस्तु स्वरूपेण विकारा एव, यदा अन्यप्रतिपादका स्तदा लिङ्गानुऽच्यन्ते। यदाह चरकः—ज्ञानार्थं यानि चोक्तानि व्याधिलिङ्गानि संग्रहे। व्याधयस्ते तदात्वे तु लिङ्गानीष्टानि नाऽऽमया इति।

रूपमांसाङ्कुरोऽर्शः गुड़कमूर्त्तिर्गुल्मः। इत्येवमादि ज्वरादीनां स्वरूपं रूपम्। (२) स स पूर्व्वप्रसिद्धः खेदावरोधादिस्वरूपो ज्वरादिर्यथोक्तनिदानकुपितवातादिना जन्यमान स्तद्वातादिसहित एव देहे वेपथ्वादिलक्षणानि करोति। ननु केवलो वातादिर्ज्वरादि र्वा। * ज्वरादिर्वातजादिरूपेण वेपथ्वादिना कार्य्येन लिङ्गेनानुमीयते इति पूर्व्ववत् कारणवत् कार्य्यमनुमितिलिङ्गमनुमानम्। (३) शेषवत् कार्य्यवत् कारणं कार्य्यानुमितिलिङ्गम्। यथा वीजेन भविष्यत् फलमनुमीयते। तथा निदानेन भविष्यद्व्याधिरनुमीयते। तच्च प्रादुर्भूतस्य न लक्षणं। यथा चैतद्वीजत्तं वारिसमुदायादङ्कुरो जायते। तैरनुमीयते यादृशोवृक्षो भविष्यति। स चाङ्कुरश्चेद् यथावद्वारिषिक्तः स्यात् तदाशु वर्द्धते विनश्यति वा। तथा जातो व्याधि र्येन निदानेन तेन पुनरुपसेवितेनाशु वर्द्धते अन्यथा चिरेण वा वर्द्धते विनश्यति वा। इति शेषवदनुमानञ्च कारणं वर्त्तमानव्याधे लिङ्गम्। (४) यथायं आदित्यो गतिमान् स्थानान्तरस्थितिदर्शनात् पुरुषवत्। यथा पुरुषो नैकस्थानस्थायी गतिमान् तथादित्योऽपि उदयादिक्रमेण स्थानान्तरस्थायित्वेन दृश्यते तस्माद्गतिमान्। एवमेव यो धनुर्वन्नमयति गात्रं क्रोड़तो वा पृष्ठतो वा स धनुस्तम्भो वातरोगः। यश्च दण्डवत् स दण्डको वातरोगः। इति सामान्यतो दृष्टं लिङ्गमिति। तत् स्वं रूपं स्वरूपं यल्लक्षणं तदपि वर्त्तमानव्याधिवोधकं न च स्वात्मनि क्रियाविरोधः। व्याख्यान्तरञ्च भास्करोदये द्रष्टव्यम्।

उपशयमाह ।

हेतुव्याधिविपर्य्यस्तविपर्य्यस्तार्थकारिणाम्
औषधान्नविहाराणामुपयोगं सुखावहम्
विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतः ।

हेतुर्बाह्यः आभ्यन्तरश्च, व्याधि ज्वरादिः, एतयो हेतुरोगयो र्व्यस्तसमस्तयो विपर्य्यस्ता विपरीताः एतयोरेव व्यस्तसमस्तयो र्विपर्य्यस्तार्थकारिणो निदानसमानधर्म्मिणोऽपि प्रभावाद्रोगप्रशमकारिणः एवंविधा ये औषधान्नविहारा भेषजाहाराचारा स्तेषामुपयोग माचरणं सुखावहं सुखकरं उपशयं विद्यात्।

सम्यग्व्याधिजदुःखोपशम हेतुरुपशयः। सात्म्यमुपशय इति वा लक्षणं। चरके आहाराचारदेशकाललङ्घनादीनां द्रव्याद्रव्यभूतानां औषधत्वेनाभिधानात्। एषामुदाहरणानि—

तत्र 'हेतुविपरीतमौषधं' यथा—शीतकफज्वरे शुण्ठाद्युष्णं भेषजं। अन्नं यथा—श्रमानिलजे ज्वरे रसौदनं। विहारो यथा—दिवास्वप्नोत्थे कफे रात्रौ जागरणमिति।

अथ 'व्याधिविपरीतमौषधं' यथा—अतिसारे स्तम्भनं पाठादि। तथा शिरीषो विषं हन्ति, खदिरं कुष्ठं, हरिद्रा प्रमेहमिति। नैते दोषमपेक्षन्ते प्रभावाद्रोगप्रशमकारिण इति। अन्न यथा—अतिसारे स्तम्भनं मसूरादि। विहारा यथा—उदावर्त्ते प्रवाहणम्। मन्त्रौषधिधारण-वस्तुपहार नियम-प्रायश्चित्त-होम-गुरु-देवताशुश्रूषादयोऽपि व्याधिविपरीता विहारा इति वाप्यचन्द्रः।

अथ 'हेतुव्याधिविपरीतमौषधं' यथा—वातशोथे दशमूलं वातहरं सर्व्वशोथहरञ्च। अन्नं यथा—वातकफग्रहण्यां तक्रं, शीतवातोत्थे ज्वरे पेया, सा हि उष्णवीर्य्यत्वात् वातं हन्ति प्रभावाज्ज्वरञ्च। विहारो यथा—स्निग्धदिवास्वप्नप्रजातायां कफतन्द्रायां रुत्तं कफतन्द्राविपरीतं रात्रिजागरणमिति।

अथ 'हेतुविपरीतार्थकारीणि'।—औषधं यथा—पित्तप्रधाने पच्यमाने व्रणशोथे पित्तकर उष्ण उपनाहः। अन्नं यथा—अत्रैव व्रणशोथे अन्नं विदाहि। विहारो यथा—वातोन्मादे त्रासनमिति।

अथ 'व्याधिविपरीतार्थकारीणि'।—औषधं यथा—छर्द्यां वमनकारकं मदनफलम्। अन्नं यथा—अतिसारे विरेचनार्थं विरेचनं चीरम्। विहारो यथा—छर्द्यां वमनार्थं प्रवाहणम्।

अथ 'हेतुव्याधिविपरीतार्थकारीणि'।—औषधं यथा—अग्नि-प्लुष्टे उष्णोऽगुर्व्वादिलेपः, विषे विषं वा। अन्नं यथा—मद्यपानोत्थे मदात्यये मदकारकं मद्यम्। विहारो यथा—व्यायामजनितसंमूढ़वाते जलप्रतरणरूपो व्यायाम इति। (१)

---

(१) हेतुविपरीतमौषधं यथा—ग्रीष्मे सूर्य्यसन्तापजे शरीरदाहे शीतोशीरादि-भेषजम्। आहारो—हिमवारिशर्करोदकवार्य्यन्नादि। विहारो—भूगृहे छायादिसेवनम्। हेमन्ते शीतकृतशीतवेपथुस्तम्भेषु वह्न्यातपसेवनम्। आहार—मांसौदनादिः। विहारो—वह्न्यादिकृतोष्णगृहेऽवस्थानादिः। व्याधिविपरीतमौषधं दोषजव्याधिचिकित्सिते यत् सर्वमुक्तं कषाय-चूर्ण गुड़घृतादिकं। आहारो—यावत् पथ्यं शालिषष्टिकादिकं। विहारो—यावानुक्त व्यायामादिः। उभयविपरीतमौषधं—शोकादिजे ज्वरे शोकापहरण

संप्राप्तिमाह ।

दोषेतिकर्त्तव्यतोपलक्षितं व्याधिजन्म संप्राप्तिः । *

दोषाणां चयप्रकोपप्रसरस्थानसंश्रयाः ।

सञ्चयञ्च प्रकोपञ्च प्रसरं स्थानसंश्रयम् ।
व्यक्तिं भेदञ्च यो वेत्ति दोषाणां स भवेद् भिषक् ।

मौषधं तत्सदृशद्रव्यप्रदानादि । लोभजे व्याधौ—ईप्सिताहारः उभयहरः, रात्रिजागरणजे व्याधौ—दिवा-निद्राविहारः, उभयहरः । अथ हेतुविपरीतार्थकारि औषधं अग्निप्लुष्टे उष्णोऽगुर्व्वादिलेपः । आहारः—उन्मादे श्वेतोन्मत्तस्योत्तरदिङ्मूलसिद्धस्तु पायसः । विहारस्तु—व्यायामजे उरुस्तम्भे जलप्रतरणरूपो व्यायामः । व्याधिविपरीतार्थकारि औषधं बहुकफजच्छर्द्दां मदनफलं वमनकरं । व्याधिसमानधर्मं तत्प्रभावाद्रोगप्रशमनम् । आहारस्तु—अतीसारे वातजे क्षीरं विरेचनार्थम् । विहारश्च—छर्द्यां वमनकरं प्रवाहणम् । उभयविपरीतार्थकारि औषधं यथा—प्रियद्रव्यादर्शनजे चिन्ताज्वरे तत्सदृशद्रव्यदर्शनं । आहारश्च अतीसारे मुद्गादिरिति **भास्करोदये श्रीमद्गङ्गाधरः ।**

* अथ भाविव्याधिबोधकं पूर्व्वरूपं, प्रादुर्भूतवर्त्तमानव्याधिबोधकं रूपं, भविष्यद्व्याधिबोधकं निदानं, उत्पन्नव्याधिबोधकः उपशयो भवति । भवद्व्याधि-बोधकन्तु किं भवति ? अतीतव्याधिबोधकञ्च किं स्यादित्यतो भवद्व्याधिबोधिकां सम्प्राप्तिमाह—"संप्राप्तिर्जातिरागतिरित्यनर्थान्तरं व्याधेः सा संख्याप्राधान्यविधिविकल्प-बलकालविशेषैर्भिद्यते" (चः निः १मः) । संख्यादिव्यापारात्मिका संप्राप्ति वर्त्तमान-व्याधेर्विशेषधर्म्मं ज्ञापयति । सत्ताख्यफलात्मिका संप्राप्तिश्चोत्पन्नं वर्त्तमानं व्याधिं स्वरूपेण बोधयति । देहेन्द्रियमनःसन्तापलक्षणो ज्वरः । स्वेदावरोधसन्ताप-सर्व्वाङ्गग्रहणयौगपद्यलक्षणो ज्वर इति । हृन्नाभ्योरन्तरे वृत्तश्चयापचयवान् ग्रन्थि गुल्म इति । अपानादिषु मांसाङ्कुरोऽर्श इति । तथा यादृशलक्षणश्च व्याधिस्तादृशत्वेन तं व्याधिं सत्ताख्यया: संप्राप्तितश्च विजानाति । असत्तावांस्तु व्याधिः पूर्व्वरूपनिदानोपशये

प्राक्ृतं चयं प्रकोपश्चाह—

वर्षास्वोषधयस्तरुण्योऽल्पवीर्य्या, आपश्चाप्रसन्ना, चितिर्मल-प्राया। ता उपयुज्यमाना नभसि मेघावतते जलप्रक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातविष्टम्भिताग्नीनां विदह्यन्ते, विदाहात् पित्तसञ्चयमापादयन्ति। स सञ्चयः शरदि प्रविरल-मेघे वियत्युपशुष्यति पङ्केऽर्ककिरणप्रविलापितः पैत्तिकान् व्याधीन् जनयति।

ता एवौषधयः कालपरिणामात् परिणतवीर्य्या बलवत्यो हेमन्ते भवन्ति। आपश्च प्रसन्नाः स्निग्धा अत्यर्थं गुर्व्यः, ता उपयुज्यमाना मन्दकिरणत्वाद्भानोः सतुषारपवनोपस्तम्भित-देहानां देहिना मविदग्धाः स्नेहाच्छैत्याद् गौरवादुपलेपाच्च श्लेष्मणः सञ्चयमापादयन्ति। स सञ्चयो वसन्तेऽर्करश्मिप्रविलापित ईषत्स्तब्धदेहानां देहिनां श्लैष्मिकान् व्याधीन् जनयति।

ता एवौषधयो निदाघे निःसारा रूक्षा अतिमात्रं लघ्वो भवन्त्यापश्च, ता उपयुज्यमानाः सूर्य्यप्रतापोपशोषितदेहानां

ज्ञायते। इत्येवं व्याधे ज्ञानविशेषे जाते चिकित्साविशेषो भवति। तस्माद्दोषेति कर्त्तव्यताजन्यसमवायिकारणैकीभावहेतुसमवायः सम्प्राप्ति र्नतु दोषेतिकर्त्तव्यतिरिक्तां केवलं सत्तारूपं व्याधिजन्म संप्राप्तिः। संख्यादिभि र्ज्ञाप्यानां ज्ञानस्य तथाविधजन्म-भावतोऽनुत्पत्तेः। कश्चित्तु "यथा दुष्टेन दोषेण यथाचानुविसर्पता। निर्वृत्तिरामय-स्यासौ संप्राप्तिर्जातिरागतिः" इत्याह, तन्नाऽऽगन्तुव्याधिषु न्यूनत्वात्। नहि दोषाणां दुष्टिप्रसर्पणादिकं आगन्तुजेष्वस्ति। जातिस्तु संप्राप्तिरित्यनेन सर्व्वत्र रोगेषु समन्वयान्ना-व्याप्तिरिति। **भास्करोदये श्रीमद्गङ्गाधरः।**

देहिनां रौक्ष्याल्लघुत्वाद्वैशद्याच्च वायोः सञ्चयमापादयन्ति। स सञ्चयः प्रावृषि चात्यर्थं जलोपक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातवर्षेरितो वातिकान् व्याधीन् जनयति। एव मेष दोषाणां सञ्चयप्रकोपहेतु रुक्तः।

प्राकृतमुपशयमाह—

तत्र पैत्तिकानां व्याधीना मुपशयो हेमन्ते, श्लैष्मिकानां निदाघे, वातिकानां शरदि, स्वभावत एव।

साम्वत्सरिकं विधिं दिवसेऽप्यतिदिशन्नाह—

तत्र पूर्व्वाह्ने वासन्तिकं लिङ्गं, मध्याह्ने ग्रैष्मिकं, अपराह्ने प्रावृषेण्यं, प्रदोषे वार्षिकं, शारदमर्द्ध रात्रे, प्रत्युषसि हैमन्त मुपलक्षयेत्। एव महोरात्रमपि वर्षमिव शीतोष्ण वर्षलक्षणं दोषोपचयप्रकोपोपशमैर्जानीयात्।

क्रमप्राप्तं प्रसरमाह—

वातादीनां प्रकोपनान्यन्युक्तान्येव। तेषां प्रकोपात् कोष्ठ-तोदसञ्चरणाम्लिकापिपासापरिदाहान्नद्वेषहृदयोत्क्लेदाश्च जायन्ते (१) तत्र द्वितीयः क्रियाकालः।

अत ऊर्द्धं प्रसरं वक्ष्यामः। तेषामेभिरातङ्कविशेषैः प्रकुपितानां पर्य्युषितकिण्वोदकपिष्टसमवाय इवोद्रिक्तानां प्रसरो

---

(१) यद्यप्यत्र सामान्यतो वातादिप्रकोपलिङ्गान्युक्तानि तथाप्येतानि दोषविशेषतो विभज्य प्रकोपलिङ्गानि विद्यात्। तत्र वातप्रकोपात् कोष्ठतोदसञ्चरणे भवतः। पित्तप्रकोपादम्लिकापिपासापरिदाहा भवन्ति शोणितप्रकोपाच्च। श्लेष्मप्रकोपादन्नद्वेषहृदयोत्क्लेदाविति। श्रीमद् गङ्गाधरः।

भवति। तेषां वायु र्गतिमत्त्वात् प्रसरणे हेतुः। सत्यप्यचैतन्ये स हि रजोभूयिष्ठो रजश्च प्रवर्त्तकं सर्व्वभावानाम्। यथा महानुदकसञ्चयोऽतिवृद्धः सेतु मवदार्य्यापरेणोदकेन व्यामिश्रः सर्व्वतः प्रधावत्येवं दोषाः कदाचिदेकशो द्विशः समस्ताः शोणितसहिता वानेकधा प्रसरन्ति। एवं प्रकुपितानां प्रसरताञ्च वायोर्विमार्गगमनाटोपौ, ओषचोषपरिदाहधूमायनानि पित्तस्य, अरोचकाविपाकाङ्गसादच्छर्द्दिश्चेति श्लेष्मणो लिङ्गानि भवन्ति। तत्र तृतीयः क्रियाकालः।

अतः ऊर्द्ध्वं स्थानसंश्रयं वक्ष्यामः—

एवं कुपितास्तां स्तान् शरीरप्रदेशानागत्य तां स्तान् व्याधीन् जनयन्ति। ते 'यदोदरसन्निवेशं' (क) कुर्व्वन्ति तदा गुल्म-विद्रध्युदराग्निसङ्गानाहविसूचिकातिसारप्रभृतीन् जनयन्ति। 'वस्तिगताः' प्रमेहाश्मरीमूत्राघातमूत्रदोषप्रभृतीन्। 'मेढ्रगता' निरुद्धप्रकशोपदंशशूकदोषप्रभृतीन्। 'गुदगताः' भगन्दरार्शप्रभृतीन्। 'वृषणगता' वृद्धीः। 'ऊर्द्ध्वजत्रुगता' स्तूर्द्ध्वजान्। 'त्वङ्-मांसशोणितस्थाः' क्षुद्ररोगान् कुष्ठानि विसर्पांश्च। 'मेदोगता' ग्रन्थ्यपच्यर्व्वुदगलगण्डालजीप्रभृतीन्। 'पादगताः' श्लीपदवात-शोणितवातकण्टकप्रभृतीन्। 'सर्व्वाङ्गगता' ज्वर—सर्व्वाङ्गरोग-

---

(क) "उदरसन्निवेशे साधारणेऽपि विद्रध्यादिकार्य्यभेदा, अत्रापि स्थानसंश्रयभेदः सूक्ष्मो ज्ञेयः। नह्येकस्मात् स्थानसंश्रयात् एकजातिदोषकृतात् भिन्ना रोगा भवितु मर्हन्ति। एवमन्यत्रापि व्याख्येयम्"। चक्रपाणिः।

प्रभृतीन्। तेषां मेवमतिसन्निविष्टानां पूर्व्वरूपप्रादुर्भावः, तत्प्रतिरागं वक्ष्यामः। तत्र पूर्व्वरूपगतेषु चतुर्थः क्रियाकालः।

क्रमागतं व्याधिव्यक्तिमाह—

अत ऊर्द्धं व्याधिदर्शनं वक्ष्यामः। शोफार्व्वुदग्रन्थिविद्रधिविसर्पप्रभृतीनां प्रव्यक्तलक्षणता ज्वरातीसारप्रभृतीनाञ्च। तत्र पञ्चमः क्रियाकालः।

व्यक्तिमभिधाय भेदमाह—

अत ऊर्द्धमेतेषा मवदीर्णानां व्रणभावमापन्नानां षष्ठः क्रियाकालः। ज्वरातिसारप्रभृतीनाञ्च दीर्घकालानुवन्धः। अत्राप्रतिक्रियमानेऽसाध्यता मुपयान्ति।

अथ व्याधि व्याधिपरीक्षा।

तथाच व्याधिलक्षणं—'विकारो धातुवैषम्यं', तद्दुःखसंयोगो व्याधि रिति वा। तच्च दुखं त्रिविधम्,—आध्यात्मिकं, आधिभौतिकं आधिदैविकं इति। तत्तु सप्तविधे व्याधावुपनिपतति। ते पुनः सप्तविधा व्याधयः। तदयथा—(१) आदिवलप्रवृत्ताः, (२) जन्मवलप्रवृत्ताः (३) दोषवलप्रवृत्ताः (४) सङ्घातवलप्रवृत्ताः, (५) कालवलप्रवृत्ताः, (६) दैववलप्रवृत्ताः (७) स्वभाववलप्रवृत्ता इति।

तत्र (१) 'आदिवलप्रवृत्ता' ये शुक्रशोणितदोषान्वयाः कुष्ठार्शःप्रभृतयः। तेऽपि द्विविधा मातृजाः पितृजाश्च (२) 'जन्मवलप्रवृत्ता' ये मातुरपचारात् पङ्गुजात्यन्धवधिरमूकमिम्मिनवामनप्रभृतयो जायन्ते। तेऽपि द्विविधा रसकृता

दौहृदापचारकृताश्च। (३) 'दोषबलप्रवृत्ता य आतङ्कसमुत्पन्ना मिथ्याहाराचारजनाश्च। तेऽपि द्विविधा आमाशयसमुत्थाः पक्वाशयसमुत्थाश्च। पुनश्च द्विविधा शारीरा मानसाश्च। त एत आध्यात्मिकाः। (४) 'सङ्घातबलप्रवृत्ताः' य आगन्तवो दुर्ब्बलस्य बलवद्विग्रहात् तेऽपि द्विविधाः शस्त्रकृता व्यालादिकृताश्च। एते आधिभौतिकाः। (५) 'कालबलप्रवृत्ताः' ये शीतोष्णवातवर्षाप्रभृतिनिमित्ताः; तेऽपि द्विविधा व्यापन्नर्तुकृता अव्यापन्नर्तुकृताश्च। (६) दैवबलप्रवृत्ता' ये देवद्रोहादभिशप्तका अथर्व्वनकृता उपसर्गकृताश्च। तेऽपि द्विविधा—विद्युदशनिकृताः पिशाचादिकृताश्च। पुनश्च द्विविधा संसर्गजा आकस्मिकाश्च। (७) 'स्वभावबलप्रवृत्ताः क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयः। तेऽपि द्विविधा कालकृता अकालकृताश्च। तत्र परिरक्षणकृताः कालकृता अपरिरक्षणकृता अकालकृता। एते आधिदैविकाः। तत्र सर्व्वव्याध्यवरोधः।

सर्व्वेषाञ्च व्याधीनां वातपित्तश्लेष्माण एव मूलं। तल्लिङ्गत्वात् दृष्टफलत्वात् आगमाच्च। यथाहि कृत्स्नं विकारजातं विश्वरूपेणावस्थितं सत्त्वरजस्तमांसि न व्यतिरिच्यन्ते। एव मेव कृत्स्नं विकारजातं विश्वरूपेणावस्थितमव्यतिरिच्य वातपित्तश्लेष्माणो वर्त्तन्ते। दोषधातुमलसंसर्गादायतनविशेषान्निमित्ततश्चैषां विकल्पा भवन्ति। दोषदूषितेष्वत्यर्थं धातुषु संज्ञा क्रियते रसजोऽयं शोणितजोऽयं मांसजोऽयं मेदोजोऽयं मज्जजोऽयं शुक्रजोऽयं व्याधिरिति।

तत्रान्नाश्रद्धारोचकाविपाकाङ्गमर्द्द-ज्वर-हृल्लास-तृप्ति-गौरव-हृत्पाण्डुरोग-मार्गोपरोध-कार्श्य-वैरस्याङ्गसादाकालवलिपलित-दर्शनप्रभृतयो 'रसदोषजा' विकाराः ।

कुष्ठ-विसर्प-पिड़का-मशक-नीलिका-तिलकालक न्यच्छ-व्यङ्गेन्द्रलुप्त-प्लीह-विद्रधि-गुल्म-वातशोणितार्शोऽर्व्वुदाङ्गमर्द्दासृग्दररक्तपित्त-प्रभृतयो 'रक्तदोषजा' गुदमुखमेढ्रपाकाश्च ।

अधिमांसार्व्वुदार्शोऽधिजिह्वापजिह्वोपकुशगलशुण्ठिकालजी-मांससङ्घातौष्ठ-प्रकोप-गलगण्डगण्डमालाप्रभृतयो-मांसदोषजाः ।

ग्रन्थिवृद्धिगलगण्डार्व्वुदमेदोजौष्ठप्रकोप-मधुमेहातिस्थौल्याति-स्वेदप्रभृतयो 'मेदोदोषजाः' ।

अध्यस्थ्यधिदन्तास्थितोद-शूलकुनखप्रभृतयो 'ऽस्थिदोषजाः' । तमोदर्शन-मूर्च्छा-भ्रम पर्व्वस्थूलमूलारुर्जन्मनेत्राभिष्यन्दप्रभृतयो 'मज्जदोषजाः' । क्लैब्याप्रहर्ष-शुक्राश्मरी शुक्रमेहशुक्रदोषादयश्च तद्दोषजाः । त्वग्दोषाः सङ्गोऽतिप्रवृत्तिर्व्वामलायतनदोषाः । इन्द्रियाणामप्रवृत्तिर्वेन्द्रियायतनदोषाः । इत्येवं समास उक्तः ।

ज्वरादिना सह वातादीनां सम्बन्ध माह—

भूयोऽत्र जिज्ञास्यं, किं वातादीनां ज्वरादीनाञ्च नित्यः संश्लेषः परिच्छेदो वा इति । यदि नित्यः संश्लेषः स्यात् तर्हि नित्यातुराः सर्व्व एव प्राणिनः स्युः । अथाप्यन्यथा वातादीनां ज्वरादीनाञ्चान्यत्र वर्त्तमानाना मन्यत्र लिङ्ग' न भवतीति कृत्वा यदुच्यते वातादयो ज्वरादीनां मूलानीति तन्न । अत्रोच्यते । दोषान् प्रत्या ख्याय ज्वरादयो न भवन्ति । अथ च न नित्यः

सम्बन्धो, यथाहि विद्युद्वाताशनिवर्षाणि आकाशं प्रत्याख्याय न भवन्ति। सत्यप्याकाशे कदाचिन्न भवन्ति। अथच निमित्ततस्तत एवोत्पत्तिरिति। तरङ्गवुद्वुदादयश्चोदकविशेषा एव। वातादीनां ज्वरादीनाञ्च नाप्येवं संश्लेषो न परिच्छेदः शाश्वतिकः, अथच निमित्तत एवोत्पत्तिरिति।

षड् विधोहि रोगानां विज्ञानोपायः। तद्यथा—पञ्चभिः श्रोत्रादिभिः प्रश्नेन चेति। तत्र श्रोत्रेन्द्रियविज्ञेया विशेषा रोगेषु व्रणास्रावविज्ञानीयादिषु वक्ष्यन्ते सफेनं रक्तमीरयन्ननिलः सशब्दो निर्गच्छतीत्येवमादयः। स्पर्शनेन्द्रियविज्ञेयाः शीतोष्णश्लक्ष्णकर्कशमृदुकठिनत्वादयः स्पर्शविशेषा ज्वरशोफादिषु। चक्षुरिन्द्रियविज्ञेयाः शरीरोपचयापचयायुर्लक्षणवलवर्णविकारादयः। रसनेन्द्रियविज्ञेयाः प्रमेहादिषु रसविशेषाः। घ्राणेन्द्रयविज्ञेया अरिष्टलिङ्गादिषु व्रणानामव्रणानाञ्च गन्धविशेषाः। प्रश्नेन च जानीयाद्देशं कालं जातिं सात्म्यं आतङ्कसमुत्पत्तिं वेदनासमुच्छ्रायं वलं दीप्ताग्नितां वातमूत्रपुरीषाणां प्रवृत्त्यप्रवृत्ती कालप्रकर्षादींश्च विशेषान्। आत्मसद्दशेषु विज्ञानाभ्युपायेषु तत्स्थानीयैर्ज्जानीयात्।

अथ प्रकृतिनिरूपणम्।

शुक्रशोणितप्रकृतिं कालगर्भाशयप्रकृतिं मातुराहारविहारप्रकृतिं महाभूतविकारप्रकृतिञ्च गर्भशरीर मवेक्ष्यते। एता हि येन येन दोषेणाधिकतमेनैकेनानेकतमेन वा समनुवध्यन्ते

तेन तेन दोषेण गर्भोऽनुबध्यते। ततः सा सा दोषप्रकृतिरुच्यते मनुष्याणां गर्भादिप्रवृत्ता। तस्माद् वातलाः प्रकृत्या केचित् पित्तलाः केचित् श्लेष्मलाः केचित् संसृष्टाः केचित् समधातवः प्रकृत्या केचिद् भवन्ति।

वातप्रकृतिलक्षणं—चलदृष्टिः, जागरूकः, स्फुटिताङ्गावयवः, सिराततगात्रः, अतिरूक्षश्मश्रुनखकेशः, अदृढसौहृदः, कृशपरुषः, द्रुतगतिरटनः, अनवस्थितात्मा, प्रततरूक्षक्षामभिन्नसक्तजर्जरस्वरः, शीघ्रसमारम्भक्षोभविकारः, शीघ्रोत्त्रासरागविरागः, अल्पस्मृतिः, शीतासहिष्णुः, अल्पापत्यः, अम्लादिकभोजनेच्छुः, संस्वेदनेनातिविमर्दनेन सौख्यं समागच्छति, सुप्ते नेत्राण्येषां 'वृत्तान्यचारूणि मृतोपमान्युन्मीलितानीव भवन्ति 'शैलद्रुमांस्ते गगनञ्च यान्ति'।

पित्तप्रकृतिलक्षणं—बहुभुक्, उष्णद्वेषी, क्षिप्रकोपप्रसादः, मेधावी, निपुणमतिः, विगृह्य वक्ता, प्रभूतव्यङ्गतिलकपिड़कालकः, क्षिप्रवलिपलितखालित्यदोषः, मृद्वल्पकपिलश्मश्रुलोमकेशः, तीक्ष्णाग्निः, क्लेशासहिष्णुः, प्रभूतसृष्टस्वेदमूत्रपुरीषः, अल्पशुक्रव्यवायापत्यः, तिक्तरसानुभोजी, 'क्रोधेन मद्येन रवेश्च भासा रागं व्रजन्त्याशु विलोचनानि', सुप्तः सन् कनकपलाशकर्णिकारान् सम्पश्येदपि च हुताशविद्युदुल्काः।

श्लेष्मप्रकृतिलक्षणं—मधुरप्रियः, सहिष्णुः, अलोलुपः, 'अल्पं स भुङ्क्ते बलवांस्तथापि', दृढ़वैरः, बलवान्, प्रभूतशुक्र-

व्यवायापत्यः, मन्दचेष्टाहारविहारः, अशीघ्रारम्भक्षोभविकारः, अल्पक्षुत्तृष्णासन्तापखेददोषः, प्रसन्नदर्शनाननः, प्रसन्नस्निग्ध-वर्णस्वरः, निद्रातन्द्राप्रियः, तिक्तकटूष्णभोजी। 'न च बाल्ये-प्यतिरोदनो न लोलः', 'प्रकृतीर्द्वयसर्व्वौथा द्वन्द्वसर्व्वगुणादये'।

सुश्रुतस्त्वाह—

प्रकृतिमिह नराणां भौतिकीं केचिदाहुः
पवनदहनतोयैः कीर्त्तित स्तास्तु तिस्रः।

अथ वयोनिरूपणम्।

कालप्रमाणविशेषापेक्षिणी हि शरीरावस्था वयोऽभि-धीयते। तद्वय स्त्रिविधं बाल्यं, मध्यं वृद्धमिति। तत्रोनषोड़श-वर्षा बालास्तेऽपि त्रिविधाः क्षीरपाः क्षीरान्नादा अन्नादा इति। तेषु सम्वत्सरपराः क्षीरपाः, द्विसम्वत्सरपराः क्षीरान्नादाः, परतोऽन्नादा इति षोड़शसप्तत्योरन्तरे मध्यं वयः तस्य विकल्पो वृद्धिर्यौवनं सम्पूर्णता हानिरिति। तत्राविंशतेर्वृद्धि रात्रिंशतो यौवनं, आचत्वारिंशतः सर्वधात्विन्द्रियबलवीर्य्यसम्पूर्णता। अत ऊर्द्धमीषत् परिहानि र्यावत् सप्ततिरिति। सप्ततेरूर्द्ध्वं क्षीयमान-धात्विन्द्रियबलवीर्य्योत्साह महन्यहनि वलीपलितखालित्यजुष्टं श्वासकासप्रभृतिभिरुपद्रवैरभिभूयमानं सर्वक्रियास्वसमर्थं जीर्णागारमिवाभिवृष्टमवसीदन्तं वृद्धमाचक्षते।

बाले विवर्द्धते श्लेष्मा मध्यमे पित्तमेवतु।
भूयिष्ठं वर्द्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत्।

अथ सात्म्यनिरूपणम् ।

सात्म्यानि तु देशजात्यृतुरोगव्यायामोदकदिवास्वप्न-रसप्रभृतीनि प्रकृतिविरुद्धान्यपि यान्यबाधकराणि भवन्ति ।

यो रसः कल्पते यस्य सुखायैव निषेवितः ।
व्यायामजातमन्यद्वा तत् सात्म्यमिति निर्दिशेत् ।

तच्च सात्म्यं सङ्क्षेपतः पञ्चप्रकारं—(१) देशसात्म्यं (२) रोग-सात्म्यं, (३) ऋतुसात्म्यं, (४) ओकसात्म्यं, (५) जाति-सात्म्यञ्चेति ।

देशसात्म्यं रोगसात्म्यञ्च यथा—

देशानामामयानाञ्च विपरीतगुणं गुणैः ।
सात्म्यमिच्छन्ति सात्म्यज्ञा श्चेष्टितञ्चाद्यमेव च ।
ऋतुसात्म्यन्तूक्तमेव चरकेण तस्याशितीये ।

ओकसात्म्यमाह—

उपशेते यदौचित्यादोकसात्म्यं तदुच्यते ।

जातिसात्म्यमाह—

औचित्याद् यस्य यत् सात्म्यं देशस्य पुरुषस्य च ।
अपथ्यमपि नैकान्तंत्तत् त्यजन् लभते सुखम् ।
वाह्लीकाः पह्लवाश्चीनाः शूलीका यवनाः शकाः ।
मांसगोधूममाध्वीकशस्त्रवैश्वानरोचिताः
क्षीरसात्म्यास्तथा प्राच्या मत्स्यसात्म्याश्च सैन्धवाः ।
अश्मकावन्तिकानान्तु तैलाज्यं सात्म्यमुच्यते ।
कन्दमूलफलं सात्म्यं विद्यान्मलयवासिनां

सात्म्यं दक्षिणतः पेया मन्यश्चोत्तरपश्चिमे ।
मध्यदेशे भवेत् सात्म्यं यवगोधूमगोरसाः ।
तेषां तत् सात्म्ययुक्तानि भैषज्यान्यवचारयेत् ।
सात्म्यं ह्याशुबलं धत्ते नातिदोषञ्च बह्वपि ।

अथ देशनिरूपणम् ।

देशस्त्वानूपो जाङ्गलः साधारण इति तत्र बहूदकनिम्नोन्नत नदीवर्षगहनो मृदुशीतानिलो बहुमहापर्वतवृक्षो मृदुसुकुमारोपचितशरीरमनुष्यप्रायः कफवातरोगभूयिष्ठश्चानूपः । आकाशसमः प्रविरलाल्पकण्टकिवृक्षप्रायोऽल्पवर्षप्रस्रवणोदपानोदकप्राय उष्णदारुणवातः प्रविरलाल्पशैलः स्थिरकृशशरीरमनुष्यप्रायो वातपित्तरोगभूयिष्ठश्च जाङ्गलः । उभयदेशलक्षणः साधरण इति ।

भवन्तिचात्र—

विविधे देशे सोपपत्तिकं साधारणस्य श्रेष्ठत्वमाह—

समाः साधारणे यस्माच्छीतवर्षोष्णमारुताः ।
दोषाणां समता जन्तोस्तस्मात् साधारणोमतः ।

इदानी मनुगुणदोषदेशजरोगस्य तद्विगुणदेशसम्बन्धे चिकित्सितमाह—

न तथा बलवन्तः स्यु र्जलजा वा स्थलाहृताः ।
स्वदेशे निचिता दोषा अन्यस्मिन् कोपमागताः ।

देशसम्बन्धस्याप्यस्थिरतया तज्जन्यरोगशङ्कायां देशसात्म्यसेवया अभयं दर्शयन्नाह—

उचिते वर्त्तमानस्य नास्ति देशकृतं भयं ।
आहारस्वप्नचेष्टादौ तद्देशस्य गुणे सति ।

अथाङ्गोपाङ्गनिरूपणम् ।

शरीरं षड़ङ्गं । तच्च षड़ङ्गं शाखाश्चतस्रो मध्यं पञ्चमं षष्ठं शिरः इति । शाखाश्चतस्र इति द्वौ वाहू द्वे सक्थिनी च ।

तत्र वाह्वोः प्रत्यङ्गानि यथा—अंसः, कक्षा, प्रगण्डः, कफोणिः प्रकोष्ठः मणिवन्धः, करभः, प्रपाणिः, पाणितलं, पाणिपृष्ठ मङ्गुलयश्च ।

सक्थ्नः प्रत्यङ्गानि यथा—वङ्क्षणः, ऊरुः, जानु, जङ्घा, गुल्फौ, पादः, पादावयवास्तु—पार्ष्णिः, पादतलं, पादपृष्ठं प्रपद मङ्गुलयश्च ।

मध्यस्यान्तराधेर्वा प्रत्यङ्गानि यथा—जत्रुणी, स्तनौ, वक्षः, पार्श्वे, सपृष्ठवंशं पृष्ठं, उदरं, कुक्षिः, नाभिः, वस्तिः, कटिः, त्रिकं, मेढ्रं नारीनाञ्चयोनिरिति ।

शिरसः प्रत्यङ्गानि यथा—तस्यान्तर्मस्तुलुङ्गं, ललाटं, भ्रुवौ, शङ्खौ, चक्षुषी, नासा, कर्णौ, गण्डौ, हनू, ओष्ठाधरौ चिवुकं मुखं, ग्रीवेति । मुखावयवास्तु—दन्ताः, दन्तवेष्टाः, तालु, रसना, गलशुण्डिका, सूक्ष्मजिह्वा उपजिह्विका च । नेत्रावयवास्तु—वर्त्म, पक्ष्माणि, अपाङ्गः, कालीनिकः नेत्रवद्गुटं (अक्षिगोलकम्), श्वेतभागः, दृष्टिः, कनीनिका, मण्डलानि, सन्धयः, पटलानि च ।

वक्षस उपाङ्गानि यथा—हृदयं, पुरीतत् फुप्फुसः, क्लोम, अपस्तम्भौ च ।

उदरस्योपाङ्गानि यथा—महास्रोतः, प्लीहा, यकृत्, अग्न्याशयः, वृक्कौ, वस्तिः (मूत्राशयः), गर्भाशयः स्त्रीणाञ्च ।

महास्रोतसोऽवयवाः—गलः, अन्ननाड़ी, आमाशयः, ग्रहणी (पित्तधराकला, पच्यमानाशयः), पक्वाशयः (उण्डुकः पुरीषोण्डुको वा) गुदश्च ।

तत्र 'अंसः' भुजशिरः । अंसभुजयोः सन्धिः 'कक्षा' । अंसात् कूर्परं यावत् 'प्रगण्डः' । प्रगण्डप्रकोष्ठयोः सन्धिपृष्ठं 'कफोणिः' कूर्परापरनाम । मणिबन्धादूर्ध्वं कफोणिं यावत् 'प्रकोष्ठः' । करप्रकोष्ठयोः सन्धि 'मणिबन्धः' । मणिबन्धादाकनिष्ठं करस्य बहिर्भागः 'करभः' । मणिबन्धात् अङ्गुल्यग्रं यावत् 'पाणिः' करापरनाम । करस्याग्रं 'प्रपाणिः' । करस्योर्ध्वं रेखाङ्कितं 'पाणितलं' । तत्पश्चाद्भागो 'पाणिपृष्ठं' । (१) अङ्गुष्ठस्तर्जनीचैव मध्यमाऽनामिका तथा । कनिष्ठा चेति पञ्च स्युः क्रमेणाङ्गुलयः स्मृताः ।

तत्र श्रोणिसक्थ्नोः सन्धि 'वंक्षणः' । वङ्क्षणजानुसन्धेर्मध्य 'मूरुः' । ऊरुजङ्घयोः सन्धि 'जानु' । जानुना गुल्फं यावत् 'जङ्घा' । जङ्घांघ्रिसन्धिग्रन्थी 'गुल्फौ' । जङ्घाचरणयोः सन्धि गुल्फसन्धिः' । गुल्फसन्धेरधः पादः । गुल्फस्याधः

---

(१) करमूले मणिबन्धो भुजमध्ये कुर्परः कफोणिश्च । तस्मादधः प्रकोष्ठः प्रगण्डकः कूर्परांसमध्यं स्यात् । परःस्यादङ्गुलीसन्धिः पर्व्वसन्धिश्च कथ्यते । करस्याधः प्रपाणिः स्यादूर्ध्वं करतलं स्मृतम् । राजनिघण्टुः ।

पादपश्चिमो भागः 'पार्ष्णिः'। पादाग्रं 'प्रपदम्'। रेखाङ्कितो देशः 'पादतलम्'। तत्पश्चाद्भागो 'पादपृष्ठम्'।

कक्षयोर्वक्षसः सन्धौ 'जत्रुणी' समुदाहृते। पार्श्वास्थिनि तु पर्शुका, पर्शुकाभिस्तृतं 'पार्श्वम्'। 'नाभिः' स्यादुदरावर्त्तस्ततोऽधः 'वस्ति'रुच्यते। उदरस्य दक्षिणवामभागौ 'कुक्षी'। पृष्ठवंशाधरे 'त्रिकं'। शङ्खनाभ्याकृति'र्योनि'स्त्र्यावर्त्ता सा च कीर्त्तिता। तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता। शेषं स्पष्टं।

'शङ्खः' कर्णसमीपः स्यात्। अधस्तादधरोष्ठस्य 'चिबुः' स्याच्चिबुकं तथा। गण्डस्याधोभागो 'हनुः'। तालूर्द्ध्वं सूक्ष्मजिह्वा घण्टिका लम्बिका च सा। अस्याधो मूलजिह्वा स्यात् प्रतिजिह्वोपजिह्विका। नयनगोलकावरकं निमेषोन्मेषाश्रयं पटलद्वयं 'वर्त्म' उच्यते। विद्याद्द्व्यङ्गुलबाहुल्यं स्वाङ्गुष्ठोदरसम्मितम्। द्व्यङ्गुलं सर्व्वतः सार्द्धं भिषङ् नयनबुद्बुदं। सुवृत्तं गोस्तनाकारं सर्व्वभूतगुणोद्भवम्॥ वर्त्मरोमानि 'पक्ष्माणि'। चक्षुःपुच्छस्याधो नेत्रान्तोऽपाङ्गः' नासासमीपनेत्रान्तः 'कालीनिकः' पञ्चभूतात्मिका 'दृष्टि' र्मसूरार्द्धदलोन्मिता।

हृदयं निरूपयति—

स्तनयोर्मध्यमधिष्ठायोरस्यामाशयद्वारं सत्वरजस्तमसामधिष्ठानं 'हृदयं' नाम।

मांसपेशीचयो रक्तपद्माकारमधोमुखं।
हृदयं तद्विजानीयात्।

दशमूलसिराः हृत्स्थास्ताः सर्व्वं सर्व्वतो वपुः।
रसात्मकं वहन्त्योजः।
'पुरीतत्' हृदयाच्छादकं मांसखण्डम्।

प्लीहानं निरूपयति।

शोणिताज्जायते 'प्लीहा' वामतो हृदयादधः।
रक्तवाहिसिरानां स मूलं ख्यातो महर्षिभिः।

फुप्फुसस्य स्थानमाह—

हृदयाद् वामतोऽधश्च 'फुप्फुसो' रक्तफेनजः।
उदानवायोराधारः फुफ्फुसः प्रोच्यते बुधैः।

यकृतं निरूपयति—

अधो दक्षिणतश्चापि हृदयाद् 'यकृतः' स्थितिः।
तत्तु रञ्जकपित्तस्य स्थानं शोणितजं मतम्।

क्लोमस्थानमाह—

हृदयपार्श्ववर्त्ती मांसखण्ड' क्लोम (सायणः)
अधस्तु दक्षिणे भागे हृदयात् 'क्लोम' तिष्ठति।
जलवाहिसिरामूलं तृष्णाच्छादनकंबातम्।

अपस्तम्भावाह—

उभयतोरसो नाड्यौ वातवहे 'अपस्तम्भौ' नाम।

वृक्कौ वर्णयति—

'वृक्कौ' कुक्षिस्थौ गोलकौ महदामलकतुल्यौ
आम्रफलाकृती इति धूर्त्तस्वामी।

वस्ति' निरूपयति—

नाभिपृष्ठकटीमुष्कगुदवङ्क्षणशेफसां
एकद्वारस्तनुतको मध्ये 'वस्ति'रधोमुखः।

अलाव्वा इव रूपेण सिरास्नायुपरिग्रहः ।
अधोमुखोऽपि वस्तिर्हि मूत्रवाहिसिरामुखैः ।
जाग्रतः स्वपतश्चैव स निस्यन्देन पूर्य्यते ।
आमुखात् सलिले न्यस्तः पार्श्वेभ्यः पूर्य्यते नवः ।
घटोयथा तथा विद्धि वस्ति मूत्रेण पूर्य्यते ।

गर्भाशयं वर्णयति—

स्त्रीणान्तु वस्तिपार्श्वगतो 'गर्भाशयः' ।
यथारोहितमत्स्यस्य मुखं भवति रूपतः ।
तत् संस्थानां तथारूपां गर्भशय्यां विदुर्बुधाः ।

परिवर्द्धितगर्भाया गर्भाशयपरिवृद्धिकोटिं दर्शयन्नाह—

पित्तपक्वाशयमध्ये गर्भाशयो यत्र गर्भस्तिष्ठति ।

ग्रहणीं निरूपयन्नाह—

अन्नस्य पक्तृ पित्तन्तु पाचकाख्यं पुरेरितम् ।
दोषधातुमलादीनामुष्मेत्यात्रेयशासनम् ।
तदधिष्ठानमन्नस्य ग्रहणाद् ग्रहणी मता ।
सैव धन्वन्तरिमते कला पित्तधराह्वया ।
आयुरारोग्यवीर्य्यौजोभूतधात्वग्निपुष्टये ।
स्थिता पक्वाशयद्वारि भुक्तमार्गार्गलेव सा ।
भुक्तमामाशये रुद्ध्वा सा विपाच्य नयत्यधः ।
बलवत्यबलात्वन्न मामसेव विमुञ्चति ।
ग्रहण्या बलमग्नि र्हि स चापि ग्रहणीबलः ।
दूषितेऽग्नावतो दुष्टा ग्रहणी रोगकारिणी ।

महास्रोतसोऽवयवानाह—

एकमेव महास्रोतो मुखाद्गुदं यावत् तिष्ठति। रूपावस्थान-विशेषान्नामान्तरञ्च लभते आमाशयादिकम्। तत्र तालुनो-ऽन्ननाड़ीं यावद् 'गलः'। गलादधस्तादामाशयोर्द्ध्वं यावत् 'अन्न-नाड़ी'। अन्ननाड्या अधस्ताद् ग्रहण्यूर्द्ध्वं यावत् 'आमाशयः'। आमाशयादधस्तात् पक्वाशयोर्द्ध्वं यावद् 'ग्रहणी'। पित्तधराकला पच्यमानाशयः क्षुद्रान्त्र इत्यनर्थान्तरम्। पच्यमानाशयादधस्तात् गुदोर्द्ध्वं यावत् 'पक्वाशयः'। उण्डूकः स्थूलान्त्रः पुरीषोण्डूको-मलाशय इत्यार्थान्तरम्। स्थूलान्त्रप्रतिबद्धो 'गुदो'नाम—

गुदस्यावयवानाह—

गुदस्य मानं सर्व्वस्य सार्द्धं स्याच्चतुरङ्गुलम्।
तत्र स्युर्व्वलयस्तिस्त्रः शङ्खावर्त्तनिभास्तुताः।
प्रवाहणी भवेत् पूर्व्वा सार्द्धाङ्गुलमिता मता।
उत्सर्जनी तु तदधः सा सार्द्धाङ्गुलसम्मिता।
तस्याधः सम्बरणीस्यादेकाङ्गुलसमा मता।
अर्द्धाङ्गुलप्रमाणं तु बुधैर्गुदमुखं मतम्।
मलोत्सर्गस्य मार्गोऽयं पायुर्देहे विनिर्म्मितः।

दोषदूष्यनिरूपणे एतदपि पठनीयम्—

वायुः पित्तं कफश्चेत्ति त्रयोदोषाः समासतः।
धातवश्च मलाश्चापि दुष्यन्त्येभिर्यतस्ततः।
वातपित्तकफा एते त्रयोदोषा इति स्मृतः।
ते धातवोऽपि विद्वद्भिर्गदिता देहधारणात्।
मलाश्च ते रसादीनां मलिनीकरणान्मताः।

रोगविनिश्चयः ।

विश्वेशमष्टमूर्त्तिञ्च सशिष्यञ्च पुनर्वसुम् ।
जनकं जनयित्रीञ्च शास्त्रादौ प्रणमाम्यहम् ॥
रुजां विनिश्चये श्रीमन्माधवेन विनिर्म्मिते ।
उपयुक्त मनुक्तं यन्निदानं तन्मयाऽऽकरम् ।
विलोक्य क्षुद्ररोगान्तमापूर्य्यते यथामति ।
तदैव सफलायासो गच्छेयु र्विबुधा यदि ।
सम्प्राप्त-प्रतिसंस्कारमिमं रोगविनिश्चयम् ॥

ज्वराधिकारः ।

ज्वरनिदामाह—

मिथ्याहारविहारैश्च मिथ्यायुक्तै रसायनैः ।
मिथ्यातियुक्तैरपि च स्नेहाद्यैः कर्म्मभिर्नृणाम् ।
विविधादभिघाताच्च रोगोत्थानात् प्रपाकतः ।
श्रमात् क्षयादजीर्णाच्च विषात् सात्म्यर्त्तुपर्य्ययात् ।
ओषधीपुष्पगन्धाच्च शोकान्नक्षत्रपीड़नात् ।
अभिचाराभिशापाभ्यां मनोभूताभिशङ्कया ।
स्त्रीणामपप्रजातानां प्रजातानां तथाऽहितैः ।
स्तन्यावतरणे चैव स्तन्यदोषैः शिशोरपि ।

सर्व्वज्वरसाधारणसंप्राप्तिमाह—

संसृष्टाः सन्निपतिताः पृथग्वा कुपिता मलाः ।

रसाख्यं धातुमन्वेत्य पक्तिं स्थानान्निरस्य च ।
स्वेन तेनोष्मणा चैव कृत्वा देहोष्मणो वलम् ।
स्रोतांसि रुद्धा संप्राप्ताः केवलं देहमुल्वणाः ।
सन्तापमधिकं देहे जनयन्ति नरस्तदा ।
भवत्यत्युष्णसर्व्वाङ्गो ज्वरितस्तेन चोच्यते ।
स्रोतसां सन्निरुद्धत्वात् स्वेदं ना नाधिगच्छति ।
स्वस्थानात् प्रच्युते चाग्नौ प्रायश्च स्तरुणे ज्वरे ।

सन्तापकारित्वेन सर्व्वज्वराणामेकत्वं दर्शयति—

एक एव ज्वरो ज्ञेयो यश्च सन्तापलक्षणः ।

अभिप्रायविशेषाज्ज्वरभेदमाह—

पुनश्च द्विविधो दृष्टो निजश्चागन्तुरेव च ।
भिन्नः कारणभेदेन निजः सप्तविधोमतः । (१)
आगन्तुरेक एव स्यात् व्यथासामान्यलक्षणः ।
पुनः कारणभेदेन स विज्ञेय श्चतुर्विधः ।
पुनः पञ्चविधोदृष्टो दोषकालवलावलात् ।
सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ ।
पुनराश्रयभेदेन धातूनां सप्तधा मतः ।
अन्तर्व्वेगो वहिर्व्वेगो द्विविधः पुनरुच्यते ।
प्राकृतोवैकृतः साध्योऽसाध्यः सामो निरामकः ।
द्विविधो विधिभेदेन ज्वरः शारीरमानसः ।
पुनश्च द्विविधोदृष्टः सौम्यश्चाग्नेय एव च ।

---

(१) ज्वरोऽष्टधा पृथग्द्वन्द्वसंघातागन्तुजः स्मृतः ।

ज्वरस्याऽऽत्मलक्षणमाह—

ज्वरप्रत्यात्मिकं लिङ्गं सन्तापो देहमानसः । (१)
वैचित्त्य मरतिर्ग्लानि र्मनसस्तापलक्षणम् ।
इन्द्रियाणाञ्च वैकृत्यं देहसन्तापलक्षणम् ।

सर्व्वज्वराणां सामान्यपूर्व्वरूपमाह—

श्रमोऽरतिर्विवर्णत्वं वैरस्यं नयनप्लवः ।
इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु ।
जृम्भाऽङ्गमर्द्दौ गुरुता रोमहर्षोऽरुचिस्तमः ।
अप्रहर्षश्च शीतञ्च भवत्युत्पत्स्यति ज्वरे ।
सामान्यतो (क)

वातादिज्वराणां विशिष्टपूर्व्वरूपमाह—

विशेषात्तु जृम्भात्यर्थं समीरणात् ।
पित्तान्नयनयोर्दाहः कफादन्नारुचिर्भवेत् ।
रूपैरन्यतराभ्यान्तु संसृष्टे द्वन्द्वजं विदुः ।
सर्व्वलिङ्गसमवायः सर्व्वदोषप्रकोपजे ।

---

(१) स्वेदावरोधः सन्तापः सर्व्वाङ्गग्रहणन्तथा । युगपद्द यत्र रोगे च स ज्वरो व्यपदिश्यते ।

रोगविनिश्चय-प्रपूर्त्तिः—(क) चरकवाग्भटोक्तानि प्राक् सन्तापात् दृष्टानि अवानुक्तानि 'सामान्यपूर्व्वरूपाणि' यथा—अनन्नाभिलाषः, निद्राधिक्यम्, वेपथुः भ्रमः, जागरणम्, दन्तहर्षः, शब्दगीतासहत्वम्, अविपाकः, दौर्व्वल्यम्, भृशं तृट्, पिण्डिकोद्वेष्टनम्, अल्पप्राणता, आलस्यम्, दीर्घसूत्रता, गुरुवाक्येषु अभ्यसूया, बालद्वेषः, माल्यानुलेपनभोजनक्लेशः, मधुरभोज्यप्रद्वेषः, अम्ललवणकटुप्रियता ।

वातज्वरलक्षणमाह—

(क) वेपथुर्विषमो वेगः कण्ठौष्ठपरिशोषणम् ।
निद्रानाशः क्षवस्तम्भो गात्राणां रौक्ष्यमेव च ।
शिरोहृद्गात्ररुग्वक्त्रवैरस्यं गाढ़विट्कता ।
शूलाध्माने जृम्भणञ्च भवत्यनिलजे ज्वरे ।

वातपित्तज्वरलक्षणमाह—

वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः ।
कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते ।
प्रलापो वक्त्रकटुता मूर्च्छादाहौ मदस्तृषा ।
पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च ।

वातश्लेष्मज्वरलक्षणमाह—

स्तैमित्यं स्तिमितोवेग आलस्यं मधुराऽऽस्यता ।
शुक्लमूत्रपूरीषत्वं स्तम्भस्तृप्ति रथापि च ।
गौरवं शीतमुत्क्लेदो रोमहर्षोऽतिनिद्रता ।
प्रतिश्यायोऽरुचिः कासः कफजेऽक्ष्णोश्च शुक्लता ।

प्रपूर्त्तिः—(क) अत्रानुक्तं 'वातज्वरनिदानम्'—व्यायामः, वेगसन्धारणम्, व्यवायः, उद्वेगः, शोकः, शोणितस्रावः, जागरणम्, विषमशरीरन्यासः। ज्वरस्याभ्यागमनमभिवृद्धिर्वा जरणान्ते, दिवसान्ते, घर्म्मान्ते। चरकवाग्भटोक्तानि 'वातज्वरलक्षणानि' अत्रानुक्तानि—पादसुप्तता, पिण्डिकोद्वेष्टनम्, सन्धिविश्लेषणम्, ऊरुसादः हन्वोरशक्तिः, कर्णस्वनः, शङ्खनिस्तोदः, कषायास्यत्वम्, पिपासा, शुष्कच्छर्दिः शुष्ककासः, उद्गारविनिग्रहः, अरोचकः, अविपाकः, भ्रमः, प्रलापः, रोमहर्षः, दन्तहर्षः, उष्णाभिप्रायता च। अत्रानुक्तं पित्तज्वरनिदानम्—कटुकलवणाम्लक्षाराणा मतिसेवनम्,

तृष्णा मूर्च्छा भ्रमो दाहः स्वप्ननाशः शिरोरुजा।
कण्ठास्यशोषो वमथूरोमहर्षोऽरुचिस्तमः।
पर्व्वभेदोऽतिवाक् जृम्भा वातपित्तज्वराकृतिः।

वातश्लेष्मज्वरलक्षणमाह—

स्तैमित्यं पर्व्वणाम्भेदो निद्रागौरवमेव च।
शिरोग्रहः प्रतिश्यायः कासः स्वेदाऽऽप्रवर्त्तनम्।
सन्तापो मध्यवेगश्च वातश्लेष्मज्वराकृतिः।

पित्तश्लेष्मज्वरलक्षणमाह—

लिप्ततिक्ताऽऽस्यता तन्द्रा मोहः कासोऽरुचिस्तृषा।
मुहुर्मुहुः स्तम्भस्वेदौ श्लेष्मपित्तप्रवर्त्तनम्।
मुहुर्दाहो मुहुः शीतं पित्तश्लेष्मज्वराकृतिः।
सन्निपातज्वरस्यात स्त्रयोदशविधस्य हि। *
लक्षणं प्रायशो दृष्टं वक्ष्यामि वै पृथक् पृथक्।

भोजनस्याजीर्णे, तीक्ष्णाऽऽतपसेवा, अग्निसन्तापः, विषमाऽऽहारः, अतिश्रमः ज्वरस्याऽभ्यागमनमभिवृद्धिर्व्वा—भुक्तस्य विदाहकाले, मध्यन्दिनेऽर्द्धरात्रे वा शरदि विशेषेण। पित्तज्वरस्य 'अनुक्तलक्षणम्'—शीताभिप्रायता, रक्तष्ठीवनम्, रक्तकोठोद्गमः, निःश्वासवैगन्ध्यम्, अम्लकः। 'कफज्वरनिदानम्'—स्निग्धगुरुमधुरपिच्छिलशीताम्ललवणाना मतिसेवनम्, अव्यायामः। ज्वरस्याभ्यागमनमभिवृद्धिर्व्वा—भुक्तमात्रे, पूर्व्वाह्णे, पूर्व्वरात्रे, वसन्तकाले च विशेषेण। 'कफज्वरस्य अनुक्तलक्षणम्'—हृल्लासः, हृदयोपलेपः' छर्द्दिः, तन्द्रा, शीतपीड़का भृशमङ्गे उत्तिष्ठन्ति, उष्णाभिप्रायता।

* द्व्युल्वणैकोल्वणैः षट्स्युर्हीनमध्याधिकैश्च षट्। समश्चैको विकारास्ते सन्निपातास्त्रयोदशः।

द्व्युल्वणैकोल्वणादीनाञ्च द्वादशानां सन्निपातज्वराणां लक्षणमाह—

(क) भ्रमः पिपासा दाहश्च गौरवं शिरसोऽतिरुक्।
वातपित्तोल्वणे विद्याल्लिङ्गं मन्दकफे ज्वरे।
शैत्यं कासोऽरुचिस्तन्द्रा पिपासादाहरुग्व्यथा।
वातश्लेष्मोल्वणे व्याधौ लिङ्गं पित्तावरे विदुः।
छर्द्दिः शैत्यं मुहुर्द्दाहस्तृष्णा मोहोऽस्थिवेदना।
मन्दवाते व्यवस्यन्ते लिङ्गं पित्तकफोल्वणे।
सन्ध्यस्थिशिरसःशूलं प्रलापो गौरवं भ्रमः।
वातोल्वणे स्याद् द्व्यनुगे तृष्णा कण्ठाऽऽस्यशोषता।
रक्तविण्मूत्रता दाहः स्वेदस्तृड् बलसंक्षयः।
मूर्च्छा चेति त्रिदोषे स्याल्लिङ्गं पित्तगरीयसि।
आलस्याऽरुचिहृल्लासदाहवम्यरतिभ्रमैः।
कफोल्वणं सन्निपातं तन्द्राकासेन चादिशेत्।
प्रतिश्या छर्द्दिरालस्यं तन्द्रारुच्यग्निमार्द्दवं।
हीनवाते पित्तमध्ये लिङ्गं श्लेष्माऽधिके मतम्।
हारिद्रमूत्रनेत्रत्वं दाहस्तृष्णा भ्रमोऽरुचिः।
हीनवाते मध्यकफे लिङ्गं पित्ताऽधिके मतम्।
शिरोरुग्वेपथुश्वासप्रलापच्छर्द्यरोचकाः।

प्रपूर्त्तिः—(क) संसृष्टस्य सन्निपातस्य च ज्वरस्य अत्रानुक्तं निदानं यथा—विषमाशनम्, अनशनम्, ऋतुपरिवर्त्तनम्, ऋतुव्यापत्तिः, असात्म्यगन्धोपघ्राणं विषोपहतस्य उदकस्य पानम्, शिलोच्चयसलिलम्, शुष्कामिषशाकं, अनुचितभेषजगन्धाघ्राणम्, दुर्द्दिने पुरोवातः, अन्नपरिवर्त्तनम्।

हीनपित्ते मध्यकफे लिङ्गं वाताऽधिके मतम्।
शीतता गौरवं तन्द्रा प्रलापोऽस्थिशिरोऽतिरुक्।
हीनपित्ते मध्यवाते लिङ्गं श्लेष्माऽधिके विदुः।
वर्च्चोभेदोऽग्निदौर्व्वल्यं तृष्णा दाहोऽरुचिर्भ्रमः।
कफहीने वातमध्ये लिङ्गं पित्ताधिके विदुः।
श्वासः कासः प्रतिश्यायो मुखशोषोऽतिपार्श्वरुक्।
कफहीने पित्तमध्ये लिङ्गं वाताधिके मतम्। (क)

त्रयोदशसन्निपातेषु समानवृद्धैर्दोषैस्तुल्यैरारब्धस्य ज्वरस्य लक्षणमाह—

क्षणे दाहः क्षणे शीतमस्थिसन्धिशिरोरुजा।
सास्रावे कलुषे रक्ते निर्भुग्ने चापि लोचने।
सस्वनौ सरुजौ कर्णौ कण्ठःशूकैरिवाऽऽवृतः।
तन्द्रा मोहः प्रलापश्च कासःश्वासोऽरुचिर्भ्रमः।
परिदग्धा खरस्पर्शा जिह्वा स्रस्ताऽङ्गता परम्।
ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च।
शिरसो लोठनं तृष्णा निद्रानाशो हृदि व्यथा।
स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः।
कृशत्वं नातिगात्राणां प्रततं कण्ठकूजनम्।
कोठानां श्यावरक्तानां मण्डलानाञ्च दर्शनम्।
मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च।

(क) प्रपूर्त्तिः—दोषतारतम्येन धात्ववयवभेदेन च सन्निपातज्वरभेदानामानन्त्यादिह भालुकितन्त्रोक्तानां शीघ्रकारिविस्फुरकमर्करीकप्फणविधुफल्गुभेदाना मन्यथा पठितं दुःखणादिलक्षणं नोक्तम्।

चिरात् पाकश्च दोषाणां सन्निपातज्वराकृतिः । (क)

सन्निपातस्याऽसाध्यताकृच्छ्रसाध्यतालक्षणमाह—

दोषे विवद्धे नष्टेऽग्नौ सर्व्वसंपूर्णलक्षणः ।

सन्निपातज्वरोऽसाध्यः कृच्छ्रसाध्यस्ततोऽन्यथा ।

मोक्षवधज्ञापिकां त्रिदोषमर्य्यादामाह—

सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा ।

पुनर्घोरतरो भूत्वा प्रशमं याति हन्ति वा ।

(ख) सप्तमी द्विगुणा चैव नवम्येकादशी तथा ।

एषा त्रिदोषमर्य्यादा मोक्षाय च वधाय च ।

सन्निपातोपद्रवमाह—

सन्निपातज्वरस्याऽन्ते कर्णमूले सुदारुणः ।

शोथः सञ्जायते तेन कश्चिदेव प्रमुच्यते ।

अभिन्यासज्वरमाह—

त्रयः प्रकुपिता दोषा उरःस्रोतोऽनुगामिनः ।

आमाऽभिवृद्धा ग्रथिता बुद्धीन्द्रियमनोगताः ।

जनयन्ति महाघोरमभिन्यासं ज्वरं दृढ़म् ।

श्रुती नेत्रे प्रसुप्तिः स्यान्न चेष्टां काञ्चिदीहते ।

नच दृष्टिर्भवेत्तस्य समर्था रूपदर्शने ।

न घ्राणं नच संस्पर्शं शब्दं वा नैव बुध्यते ।

(क) प्रपूर्त्तिः—दिवा महानिद्रा, निशि जागरणम्, महास्वं दोऽति नैव वा, गीतनर्त्तनहास्यादिविकृतेहाप्रवर्त्तणम्, पिण्डिकापार्श्वमूर्द्धपर्व्वास्थिरुक, मूत्रपुरोषयोरल्पशः अहन्ति रति वा, स्निग्धाऽऽस्यता, स्वरसाद श्चेत्यवानुक्तं सन्निपातज्वरलक्षणम् ।

ग्रपूर्त्तिः—(ख) पित्तकफानिलवृद्धा दशदिवसद्वादशाहसप्ताहात् हन्ति विमुञ्चति

शिरोलोठयतेऽभीक्ष्ण माहारं नाभिनन्दति।
कूजति तुद्यते चैव परिवर्त्तन मोहते।
अल्पं प्रभाषते किञ्चिदभिन्यासः स उच्यते। (क)

अभिन्यासज्वरस्य साध्यासाध्यत्वमाह—

प्रत्याख्यातः स भूयिष्ठः कश्चिदेवात्र सिध्यति।

आगन्तुं चतुर्विधं विभजन्नाह—

आगन्तुरष्टमो यस्तु स विज्ञेयश्चतुर्विधः।
अभिघाताभिषङ्गाभ्यामभिचाराभिशापतः।

अभिघातज्वरनिदानमाह—

शस्त्रलोष्ट्रकशाकाष्ठमुष्ट्यरत्नितलद्विजैः।
तद्विधैश्च हते गात्रे ज्वरः स्यादभिघातजः।

वायु त्रिदोषजो धातुमलपाकात्। धातुपाकाद्धन्ति मलपाकाद्विमुच्यतीति व्यवस्थित-विकल्पः। उत्तरोत्तररोगवृद्धिबलहानिभ्यां शुक्रादिधातुमहितमूत्रादिना च धातुपाको ज्ञेयः। अन्यथा मलपाकः। तयोर्लक्षणम्—निद्रानाशो हृदि स्तम्भा विष्टम्भा गौरवा-ऽरुचिः। अरतिर्बलहानिश्च धातूनां पाकलक्षणम्। दोषप्रकृतिवैचित्त्यं लघुता ज्वर-दोषयोः। इन्द्रियाणाञ्च वैमल्यं दोषाणां पाकलक्षणम्।

प्रपूर्त्तिः—(क)"सन्निपातमभिन्यासं तं ब्रूयाच्च हतौजस"मिति वाग्भटवचनात् अभिन्यासहतौजसौ सन्निपातादभिन्नौ, सुश्रुतेन तु अनयोर्लक्षणं पृथक् लिखितम् तथाच—"नात्युष्णशीतोऽल्पसंज्ञो भ्रान्तप्रेक्षी हतस्वरः। खरजिह्वः शुष्ककण्ठः स्वेदविण्मूत्रवर्ज्जितः साश्रुनिर्भुग्ननयनो भक्तद्वेषी हतप्रभः। श्वसन् निपतितः शेते प्रलापोपद्रवायुतः। तमभिन्यासमित्याहु र्हतौजसमथापरे। "ओजो विस्रंसते यस्य पित्तानिलसमुच्छ्रयात्। स गात्रस्तम्भशीताभ्यां शयने स्यादचेतनः। अपि जाग्रत् स्वपन् जन्तुस्तन्द्रालुश्च प्रलापवान्। संहृष्टरोमा स्रस्ताङ्गोमन्दसन्तापवेदनः। ओजोनिरोधजं तस्य जानीयात् कुशलो भिषक्।" माधवेन तु कस्यचित् तन्त्रस्य अभिन्यासज्वरलक्षणं लिखितम्।

अभिघातज्वरस्य संप्राप्तिमाह—

तत्राभिघातजो वायुः प्रायो रक्तं प्रदूषयन्।
सव्यथाशोथवैवर्ण्यं करोति सरुजं ज्वरम्।

अभिषङ्गज्वरमाह—

कामशोकभयक्रोधैरभिषक्तस्य यो ज्वरः।
सोऽभिषङ्गो ज्वरो ज्ञेयो यश्च भूताभिषङ्गजः।

विषाभिषङ्गज्वरमाह—

विषवृक्षानिलस्पर्शात्तथान्यैर्विषसम्भवैः।
अभिषक्तस्य चाप्याहुर्ज्वरमेकेऽभिषङ्गजम्।

अभिचाराभिशापजज्वरमाह—

(क) अभिचाराभिशापाभ्यां सिद्धानां यः प्रवर्त्तते।
सन्निपातो ज्वरो घोरः स विज्ञेयः सुदुःसहः।

कामादिज्वरानाह—

कामजे चित्तविभ्रंश स्तन्द्राऽऽलस्यमभोजनम्।
शोकजे वाष्पबहुलं त्रासप्रायं भयज्वरे।
क्रोधजे बाहुसंरम्भं भूताऽऽवेशेत्वसानुषम्।

विषकृतमागन्तुज्वरमाह—

श्यावाऽऽस्यता विषकृते तथाऽतिसार एव च।
भक्ताऽरुचिः पिपासा च तोदश्च च सह मूर्च्छया।

आगन्तुज्वरेषु नियतदोषानुबन्धदर्शनायाह—

कामशोकभयाद्वायुः क्रोधात् पित्तं त्रयोमलाः।

प्रपूर्त्तिः—(क) अभिचारजस्य ज्वरस्य वाग्भटोक्तं लक्षणम्—तत्राभिचारिकैर्मन्त्रैर्हूयमानस्य तप्यते। पूर्व्वञ्च तस्ततो देहस्ततो विस्फोटतृड्भ्रमैः। सदाहमूर्च्छैर्ग्रस्तस्य प्रत्यहं बर्द्धते ज्वरः।

भूताऽभिषङ्गात् कुप्यन्ति भूतसामान्यलक्षणाः ।

कामादिजानामन्येषां रोगानां लक्षणमतिदिशन्नाह—

कामादिजानामुद्दिष्टं ज्वराणां यद्विशेषणम् ।
कामादिजानामन्येषां रोगानामपि तत् स्मृतम् ।

निजादागन्तोर्भेदकं धर्म्ममाह—

ते पूर्व्वं केवलाः पश्चान्निजै र्व्यामिश्रलक्षणाः ।
हेत्वौषधविशिष्टाश्च भवन्त्यागन्तवो ज्वराः ।

शारीरमानसज्वरभेदोपदर्शने यद्यपि शारीरस्य देहमात्राश्रयत्वं मानसस्य च मनोमात्राश्रयत्वं दर्शितं तथाप्यनन्तरोत्पद्यमानोभयतापित्वधर्म्मापेक्षया तयोर्देहमनस्तापकत्वं उपपन्नमिति दर्शयितुमाह—

मनस्यभिहते पूर्वं कामाद्यै र्न तथाबलम् ।
ज्वरः प्राप्नोति वाताद्यै र्देहो यावन्न दूष्यति ।
देहे वाभिहते पूर्व्वं वाताद्यै र्न तथाबलम् ।
ज्वरः प्राप्नोति कामाद्यै र्मनो यावन्न दूष्यति ।

सन्ततज्वरस्य सनिदानां संप्राप्तिमाह—

स्रोतोभिर्विसृता दोषा गुरवो रसवाहिभिः ।
सर्व्वगात्रानुगास्तब्धा ज्वरं कुर्व्वन्ति सन्ततम् ।

सन्ततज्वरे त्रिदोषीमर्य्यादामाह—

दशाहं द्वादशाहं वा सप्ताहं वा सुदुःसहः ।
स शीघ्रं शीघ्रकारित्वात् प्रशमं याति हन्ति वा ।

सन्ततज्वरस्य सुदुःसहत्वे हेतुमाह—

कालदूष्यप्रकृतिभि र्दोषस्तुल्यो हि सन्ततम् ।
निष्प्रत्यनीकं कुरुते तस्माज्ज्ञेयः सुदुःसहः ।

सन्ततस्य द्वादशाऽश्रयत्वं दर्शयति—

यथा धातुं तथा मूत्रं पुरीषञ्चानिलादयः ।
युगपच्चानुपद्यन्ते नियमात् सन्तते ज्वरे ।

हननमोचनविकल्पस्तु रसादीनामप्यशुद्ध्याशुद्ध्या चेति दर्शयितुमाह—

स शुद्ध्या वा प्यशुद्ध्या वा रसादीनामशेषतः ।
सप्ताहादिषु कालेषु प्रशमं याति हन्ति वा ।

यदा तु नोक्ता शुद्धिस्तदा का विधिरित्याह—

यदा तु नातिशुध्यन्ति न वा शुध्यन्ति सर्व्वशः ।
द्वादशैते समुद्दिष्टाः सन्ततस्याऽऽश्रयास्तदा ।

सन्ततस्य विसर्गस्वरूपमाह—

विसर्गं द्वादशे कृत्वा दिवसेऽव्यक्तलक्षणम् ।
दुर्लभोपशमः कालं दीर्घमप्यनुवर्त्तते ।

विषमो विषमाऽऽरम्भक्रियाकालोऽनुषङ्गवानिति वाक्यार्थं भङ्ग्यन्तरेणाह—

यः स्यादनियतात् कालात् शीतोष्णाभ्यां तथैव च ।
आरम्भतश्च विषमः ज्वरः स विषमः स्मृतः ।
कृशानां व्याधिमुक्तानां मिथ्याऽऽहारविहारिणाम् ।
अल्पोऽपि दोषो दूष्यादेर्लब्ध्वाऽन्यतमतो बलम् ।
सविपक्षो ज्वरं कुर्य्याद्विषमं क्षयवृद्धिभाक् ।
दोषः प्रवर्त्तते तेषां स्वे काले ज्वरयन् बली ।
निवर्त्तते पुनश्चैष प्रत्यनीकबलाबलः ।

सततज्वरमाह—

रक्तधात्वाश्रयः प्रायो दोषः सततकं ज्वरम् ।
स प्रत्यनीकः कुरुते कालवृद्धिक्षयाऽऽत्मकम् ।
अहोरात्रे सततको द्वौ कालावनुवर्त्तते ।

अन्येद्युष्कं ज्वरमाह—

कालप्रकृतिदूष्याणां प्राप्यैवाऽन्यतमाद्बलम् ।
दोषो मेदोवहा रुद्ध्वा नाड़ीरन्येद्युकं ज्वरम् ।
सप्रत्यनीकः कुरुत एककाल महर्निशम् ।

तृतीयकचतुर्थकज्वरावाह—

दोषोऽस्थिमज्जगः कुर्य्यात्तृतीयकचतुर्थकौ ।
तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः । (क)

दोषोद्रेकविशेषेण तृतीयकप्रभावमाह—

कफपित्तात्त्रिकग्राही पृष्ठाद्वातकफाऽऽत्मकः ।
वातपित्ताच्छिरोग्राही त्रिविधःस्यात्तृतीयकः ।

दोषोद्रेकविशेषेण चतुर्थकप्रभावमाह—

चतुर्थको दर्शयति प्रभावं द्विविधं ज्वरः ।
जङ्घाभ्यां श्लैष्मिकः पूर्व्वं शिरस्तोऽनिलसम्भवः ।
विषमज्वर एवान्यश्चतुर्थकविपर्य्ययः । (ख)
मध्येऽहनी ज्वरयत्यादावन्ते च मुञ्चति ।

ज्वराणां विच्छेदाऽभ्यसी दृष्टान्तमाह—

अधिशेते यथा भूमिं वीजं काले च रोहति ।

प्रपूर्त्तिः—(क) तृतीयकचतुर्थकयोरारम्भकदोषमाह सुश्रुतः—"वाताधिकत्वात् प्रवदन्ति तज्ज्ञा स्तृतीयकञ्चापि चतुर्थकञ्च" ।

प्रपूर्त्तिः—(ख) "कफस्थानेषु वा दोषस्तिष्ठन् द्वित्रिचतुर्थकान् विपर्य्ययाख्यान् कुरुते विषमान् कृच्छ्रसाधनान्" इति सुश्रुतवाक्यं व्याचचाणो जेज्जडः अन्येद्युष्कतृतीयक-चतुर्थकमात्रस्य विपर्य्ययमुदाहरति ।

अधिशेते तथा धातुं दोषः काले च कुप्यति ।
स वृद्धिं बलकालञ्च प्राप्य दोषस्तृतीयकम् ।
चतुर्थकञ्च कुरुते प्रत्यनीकबलक्षयात् ।

वातबलासकज्वरमाह—

नित्यं मन्दज्वरो रूक्षः शूनकस्तेन सीदति ।
स्तब्धाङ्गः श्लेष्मभूयिष्ठो नरो वातबलासको ।

प्रलेपकज्वरमाह—

प्रलिम्पन्निव गात्राणि घर्म्मेण गौरवेण च ।
मन्दज्वरविलेपी च सशीतः स्यात् प्रलेपकः ।
तथा प्रलेपको ज्ञेयः शोषिणां प्राणनाशनः ।
दुश्चिकित्स्यतमो मन्दः सुकष्टो धातुशोषकृत् ।

रात्रिज्वरमाह—

समौ वातकफौ यस्य हीनपित्तस्य देहिनः ।
तीक्ष्णो वा यदि वा मन्दो जायते रात्रिको ज्वरः ।

रसादिसप्तधातुगतं विषमज्वरं क्रमेणाह—

गुरुता हृदयोत्क्लेशः सदनं छर्द्यरोचकौ ।
रसस्थे तु ज्वरे लिङ्गं दैन्यञ्चाऽस्योपजायते ।
रक्तनिष्ठीवनं दाहो मोहश्छर्द्दनविभ्रमौ ।
प्रलापः पिड़का तृष्णा रक्तप्राप्ते ज्वरे नृणाम् ।
पिण्डिकोद्वेष्टनं तृष्णा सृष्टमूत्रपुरीषता ।
उष्मान्तर्द्दाहविक्षेपौ ग्लानिः स्यान्मांसगे ज्वरे ।
भेदोऽस्थ्नां कूजनं श्वासो विरेकश्छर्द्दिरेव च ।

विक्षेपणञ्च गात्राणामेतदस्थिगते ज्वर ।
तमःप्रवेशनं हिक्का कासः शैत्यं वमिस्तथा ।
अन्तर्दाहो महाश्वासो मर्म्मच्छेदश्च मज्जगे ।
मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे ।
शेफसः स्तब्धता मोक्षः शुक्रस्य तु विशेषतः ।

सप्तधातुगतानां विषमज्वराणां कृच्छ्रसाध्यत्वासाध्यत्वमाह—

उत्तरोत्तरदुःसाध्याः पञ्चात्रान्त्यौ तु वर्ज्जयेत् ।

हारिद्रकाख्यं विषमज्वरमाह—

हरिद्राभेकवर्णाभस्तद्वर्णं यः प्रमेहति ।
स वै हारिद्रकोनाम ज्वरभेदोऽन्तकः स्मृतः ।

शीतादिदाहादिज्वरावाह—

त्वक्स्थौ श्लेष्माऽनिलौ शीतमादौ जनयतो ज्वरे ।
तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च ।
करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च ।
तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः ।
द्वावेतौ दाहशीतादिज्वरौ संसर्गजौ स्मृतौ ।
दाहपूर्व्वस्ततोः कष्टः कृच्छ्रसाध्यतमश्च सः ।

विषमज्वरविशेषमाह—

विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते ।
तेनार्द्धं शीतलं देहे चार्द्धञ्चोष्णं प्रजायते ।
काये दुष्टं यदा पित्तं श्लेष्मा चान्ते व्यवस्थितः ।
शीतत्वं तेन गात्राणामुष्णत्वं हस्तपादयोः ।

औपत्यकं मद्यसमुद्भवञ्च ज्वरमाह—

औपत्यके मद्यसमुद्भवे च ज्वरे हेतुं पित्तकृतं वदन्ति।

विषमज्वराणामुपशान्तवेगानामपि देहावस्थानं दर्शयति—

स चापि विषमो देहं न कदाचिद्विमुञ्चति।
ग्लानिगौरवकार्श्येभ्यः स यस्मान्न प्रमुच्यते।
वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते।

तर्हि किमिति नोपलभ्यत इत्याह—

धात्वन्तरस्थो लीनत्वान्न सौक्ष्म्यादुपलभ्यते।
अल्पदोषेन्धनः क्षीणः क्षीणेन्धन इवानलः।

जीर्णज्वरमाह—

त्रिसप्ताहव्यतीतस्तु ज्वरो यस्तनुतां गतः।
प्लीहाग्निसादं कुरुते स जीर्णज्वर उच्यते।

व्रणिष उपद्रवभूतं ज्वरमाह—

रोगाणान्तु समुत्थानाद्विदाहागन्तुतस्तथा।
ज्वरोऽपरः सम्भवति तैस्तैरन्यैश्च हेतुभिः।
दोषानां स तु लिङ्गानि कदाचिन्नातिवर्त्तते।

अन्तर्वेगस्य ज्वरस्य लक्षणमाह—

अन्तर्द्दाहोऽधिकस्तृष्णा प्रलापः श्वसनं भ्रमः।
सन्ध्यस्थिशूलमस्वेदो दोषवर्च्चोविनिग्रहः।
अन्तर्वेगस्य लिङ्गानि ज्वरस्यैतानि लक्षयेत्।

बहिर्वेगस्य ज्वरस्य लक्षणमाह—

सन्तापोऽह्यधिको बाह्यस्तृष्णादीनाञ्च मार्द्दवम्।
बहिर्वेगस्य लिङ्गानि सुखसाध्यत्व मेव च।

ज्वरस्य सौम्याग्नेयभेदमाह—

वातपित्तात्मकः शीतमुष्णं वातकफात्मकः।
इच्छत्युभयमेतत्तु ज्वरो व्यामिश्रलक्षणः।

वातपित्तज्वरे शीताभिप्रायतामुपपादयितुं वायोर्योगवाहितामाह—

योगवाहः परं वायुः संयोगादुभयार्थकृत्।
दाहकृत्तेजसा युक्तः शीतकृत् सोमसंश्रयात्।

प्राकृतज्वरमाह—

कालप्रकृतिमुद्दिश्य निर्दिष्टः प्राकृतोज्वरः।

शरदुद्भवप्राकृतज्वरमाह—

वर्षास्वम्लविपाकाभिरद्भिरोषधिभिस्तथा।
सञ्चितं पित्तमुत्क्लिष्टं शरद्यादित्यतेजसा।
ज्वरं सञ्जनयत्याशु तस्य चानुबलः कफः।

वसन्तोद्भवप्राकृतज्वरमाह—

अद्भिरोषधिभि श्चैव मधुराभिश्चितः कफः।
हेमन्ते सूर्य्यसन्तप्तः स वसन्ते प्रकुप्यति।
वसन्ते श्लेष्मणा तस्माज्ज्वरः समुपजायते।
आदानमध्ये तस्यापि वातपित्तं भवेदनु।

वसन्तशरदुद्भवयोः प्राकृतज्वरयोर्लङ्घनीयता माह—

तत्प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम्।

वर्षोद्भवप्राकृतज्वरमाह—

वायुर्निदाघे रुक्षाभिरद्भिरोषधिभिश्चितः।
शीतवातैरितो दुष्टः प्रावृषि जनयेज्ज्वरम्।
विसर्गमध्ये तस्यापि श्लेष्मपित्तं भवेदनु।

प्राकृतज्वराणां सुखसाध्यताकृच्छ्रसाध्यतानिर्द्देशेन विशिष्टत्वमाह—

प्राकृतः सुखसाध्यस्तु वसन्तशरदुद्भवः ।
दुःसाध्यो वैकृतो ज्ञेयः प्राकृतश्चानिलोद्भवः ।

आमज्वरस्य लक्षणमाह—

लालाप्रसेको हृल्लासहृदयाशुद्ध्यरोचकाः ।
तन्द्रालस्याविपाकास्यवैरस्यं गुरुगात्रता ।
क्षुन्नाशो बहुमूत्रत्वं स्तब्धता बलवान् ज्वरः ।
आमज्वरस्य लिङ्गानि न दद्यात्तत्र भेषजम् ।

पच्यमानज्वरस्य लक्षणमाह—

ज्वरवेगोऽधिकस्तृष्णा प्रलापः श्वसनं भ्रमः ।
मलप्रवृत्ति रुत्क्लेशः पच्यमानस्य लक्षणम् ।

निरामज्वरस्य लक्षणमाह—

क्षुत्क्षामता लघुत्वञ्च गात्राणां ज्वरमार्द्दवम् ।
दोषप्रवृत्तिरष्टाहो निरामज्वरलक्षणम् ।

ज्वरस्य साध्यलक्षणमाह—

बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः ।

ज्वरस्यासाध्यलक्षणमाह—

हेतुभिर्बहुभिर्जातो बलिभिर्बहुलक्षणः ।
ज्वरः प्राणान्तकृद् यश्च शीघ्रमिन्द्रियनाशनः । (क)

प्रपूर्त्तिः—(क) अथ किं नक्षत्रसमाश्रयणेन ज्वरस्य साध्यासाध्यविभागोऽङ्गीक्रियताम्, उत यथानिदानं कुपितदोषलक्षणेन ? ब्रूमः—उभयथापि, यतो नक्षत्रं त्रिविधमपि प्राक्तनस्य कर्म्मणो दैवाख्यस्य शुभरूपस्य, अशुभस्य, शुभाशुभरूपस्य च सौम्यक्रूरमध्यस्वभावसूचकम् । तत्र सौम्येन नक्षत्रेण शुभं, क्रूरेण चाशुभं मध्यस्वभावेन च शुभा-

ज्वरः क्षीणस्य शूनस्य गम्भीरो दैर्घरात्रिकः।
असाध्यो बलवान् यस्य केशसीमन्तकृज्ज्वरः।

गम्भीरज्वरलक्षणमाह—

गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहेन तृष्णया।
आनद्धत्वेन चात्यर्थं श्वासकासोद्गमेन च।

अपरमसाध्यलक्षणमाह—

आरम्भाद्विषमो यस्तु यस्य वा दैर्घरात्रिकः।

शुभम्। एतदुक्तं भवति, पुरातनकर्म्मवशान्नक्षत्रेण ज्वर उत्पद्यते, ऐहिककर्म्मवशान्मिथ्याहारसेवनाख्यात् यथानिदानं कुपितवातादिदोषेण च। तदनयोर्बलाबलेन ज्वरस्य साध्यासाध्यविभागो व्यवस्थाप्यः। प्रत्यपादि च मुनिभिर्यथा—कदाचित् प्राक्तनकर्म्मणो दैवाख्यस्य बलाबलत्वं, कदाचित् पुरुषकारस्येत्युभयथा ज्वरस्य साध्यासाध्यविभागो न्याय्यः। अतो नक्षत्रभेदेन ज्वरस्य साध्यसाध्यत्वं वृद्धवाग्भटादाकृष्य लिख्यते—"आधानजन्मनिधनप्रत्यराख्यविपत्करे। नक्षत्रे व्याधिरुत्पन्नः क्लेशाय मरणाय वा। ज्वरस्तु जातः षड्रात्रादश्विनीषु निवर्त्तते। भरणीषु च पञ्चाहात् सप्ताहात् कृत्तिकासु च। त्रिसप्तरात्रादथवा रोहिण्यामष्टरात्रतः एकादशाद्वा दिवसात् मृगे षण्णवरात्रयः। पञ्चाहान्मृत्युरार्द्रायां विपत्ति संशयोऽथवा। पुनर्वसौ प्रवृत्तस्तु ज्वरोऽपैति त्रयोदशात्। दिवसात् सप्तविंशाद्वा त्र्यहात् सप्ताहतोऽथवा। पुष्याश्लेषासु मरणं चिरेणापि मघासु च। अवश्यं स्वास्थ्यमाप्नोति द्वादशाहान्नचेन्मृतः। फाल्गुन्योः पूर्व्वयोर्मृत्युरन्ययोस्तु दिनेऽष्टमे। नवमे द्व्येकविंशे वा ज्वरः सौम्यत्वमृच्छति। हस्तेऽह्नि सप्तमे शान्तिश्चित्राया मष्टमेऽथवा। पुनश्चित्रागमे स्वातौ दशाहादथवा त्रिभिः। पक्षैर्मृत्युं विशाखासु द्वाविंशेऽहनि निर्द्दिशेत्। नवमेऽह्नि नचेच्छान्ति मैंत्रे मृत्युस्ततः परम्। ज्येष्ठायां पञ्चमे मृत्युरूर्द्धं वा द्वादशात् सुखम्। स्वास्थ्यं दशाहान्मूलेन त्रिसप्ताहेऽथवा गते। पूर्व्वाषाढासु नवमे ततोऽन्यासु तु मासतः। अष्टाभिरथवा मासै र्नवभिर्व्वा भवेच्छिवं। आजिष्ठाहाद्धनिष्ठासु द्वादशाद्वावारुणेषु च। षड़हे द्वादशाहे वा मृतुर्भाद्रपदासु च। उत्तरासु द्विसप्ताहात् प्रशमो रेवतीषु च। चतूरात्रेऽष्टरात्रे वा क्षेममित्याह हारितः।

क्षीणस्य चातिरूक्षस्य गम्भीरो यस्य हन्ति तम् ।
विसंज्ञस्ताम्यते यस्तु शेते निपतितोऽपि वा ।
शीतार्दितोऽन्तरुष्णश्च ज्वरेण म्रियते नरः ।
यो हृष्टरोमा रक्ताक्षो हृदि सङ्घातशूलवान् ।
वक्त्रेण चैवोच्छ्वसिति तं ज्वरो हन्ति मानवम् ।
हिक्काश्वासतृषायुक्तं मूढं विभ्रान्तलोचनम् ।
सन्ततोच्छ्वासिनं क्षीणं नरं क्षपयति ज्वरः ।
हतप्रभेन्द्रियं क्षीणमरोचकनिपीड़ितम् ।
गम्भीरतीक्ष्णवेगार्त्तं ज्वरितं परिवर्ज्जयेत् ।

ज्वरविमुक्तिपूर्व्वरूपमाह—

दाहः स्वेदो-भ्रमस्तृष्णा कम्पविड्भेदसंज्ञिताः ।
कूजनञ्चास्यवैगन्ध्य माकृतिर्ज्वरमोक्षणे ।

ज्वरमुक्तिलक्षणमाह—

स्वेदो लघुत्वं शिरसः कण्डूः पाको मुखस्य च ।
क्षवथुश्चान्नलिप्सा च ज्वरमुक्तस्य लक्षणम् ।
त्रिदोषजे ज्वरे ह्येतदन्तर्व्वेगे च धातुगे ।
लक्षणं मोक्षकाले स्याद्रन्यस्मिन् स्वेददर्शनम् ।

ज्वरस्योपद्रवमाह—

श्वासो मूर्च्छारुचिश्छर्दिस्तृष्णातिसारविड्ग्रहाः ।
हिक्काकासाङ्गभेदाश्च ज्वरस्योपद्रवाः दश ।

इदानीं ज्वरस्य सर्व्वरोगप्राधान्य दर्शयन्नाह—

व्यापित्वात् सर्व्वसंस्पर्शात् कृच्छ्रत्वादन्तसम्भवात् ।
अन्तको ह्येष भूतानां ज्वर इत्युपदिश्यते ।

११८

अतीसाराधिकार:।

अतीसारस्य प्रागुत्पत्तिमाह—

दीर्घसत्रेण वसत: पृषध्रस्य महात्मन:।
आलम्भ्या पशव: क्षीणास्ततो गाव: प्रकल्पिता:।
तासामपाकृतानाञ्च गवामत्यर्थसेवनात्।
असात्म्यत्वादथ व्याघ्रभयाच्चैव विशेषत:।
अतिस्नेहाच्च संक्षीणो जाठरोऽग्निस्तदा किल।
अतीसरणादुत्पन्ना दोषधातुमलाश्रय:।
अथ तेनैव कल्पेन सम्प्रत्येव महागद:।

अतिसारनिदानमाह—

गुर्व्वतिस्निग्धरुक्षोष्णद्रवस्थूलातिशीतलै:।
विरुद्धाध्यशनाजीर्णैर्विषमैश्चापिभोजनै:।
कृशशुष्कामिषासात्म्यतिलपिष्टविरूढ़कै:।
स्नेहाद्यैरतियुक्तैश्च मिथ्यायुक्तैर्विषैर्भयै:।
शोकाद्दुष्टाम्बुमद्यातिपानै: सात्म्यर्त्तुपर्य्ययै:
जलाभिरमणैर्वेगविघातै: क्रिमिदोषत:।
नृणां भवत्यतीसारो लक्षणं तस्य वक्ष्यते।

अतिसारस्य संप्राप्तिं षड़्विधत्वञ्चाह—

संशम्यापां धातुरग्निं प्रवृद्ध:। शकृन्मिश्रो वायुनाध: प्रणुन्न:। (क)
सरत्यतीवातीसारं तमाहुर्व्याधिं घोरं षड़्विधं तं वदन्ति।

(क) प्रपूर्त्ति:—चरकोक्ता वाताद्यतिसाराणां सनिदाना सम्प्राप्तिर्लिख्यते। वातलस्य—वातातपव्यायामातिमात्रनिषेविणो रुक्षाल्पप्रमिताशिन: तीक्ष्णमद्यव्यवायनित्यस्य

षड्विधत्वं दर्शयति—

एकैकशः सर्व्वशश्चापि दोषैः । शोकेनान्यः षष्ठ आमेन चोक्तः ।

अतिसारपूर्व्वरूपमाह—

हृन्नाभिपायूदरकुक्षितोदः गात्रावसादानिलसन्निरोधाः ।
विट्सङ्ग आध्मानमथाऽविपाको भविष्यतस्तस्य पुरःसराणि ।

वातातिसारलक्षणमाह—

अल्पाल्पं शब्दशूलाढ्यं मारुतेनातिसार्य्यते । (ख)
रूक्षं सफेनमच्छञ्च ग्रथितं वा मुहुर्मुहुः ।

उदावर्त्तयतश्च वेगाद्वायुः प्रकोपमापद्यते पक्वाचोपहन्यते । स वायुः कुपितोऽग्निमुपहते मूत्रस्वेदौ पुरीषाशयमुपहत्य ताभ्यां पुरीषं द्रवीकृत्यातीसाराय कल्पते । पित्तलस्य— पुन रम्ललवणकटुकक्षारोष्णतीक्ष्णातिमात्रनिषेविणः प्रततामिसूर्य्यसन्तापोष्णमारुतोपहत-गात्रस्य क्रोधेर्षाबहुलस्य पित्तं प्रकोपमापद्यते । तत् प्रकुपितं द्रवत्वादुष्माणमुपहत्य पुरीषाशयमाश्रितमौष्ण्याद्द्रवत्वात् सरत्वाच्च भित्वा पुरीषं अतिसाराय कल्पते । श्लेष्मलस्य तु गुरुमधुरशीतस्निग्धोपसेविनः सम्पूरकस्याऽचिन्तयतो दिवास्वप्नपरस्यालसस्य श्लेष्मा प्रकोपमापद्यते । स स्वभावाद्गुरुमधुरशीतस्निग्धः सस्तोऽग्निमुपहत्य सौम्य-स्वभावात् पुरीषाशयमुपहत्योपक्लेद्य पुरीषमतिसाराय कल्पते । अस्वप्नादतिस्वप्नात् अयथा-बलारम्भाद्भयशोकचित्तोद्वेगातियोगात्, शोषज्वरार्शोविकारातिकर्षनात् वा व्याप-न्नाग्नेस्त्रयो दोषाः प्रकुपिता भूय एवाग्निमुपहत्य पक्वाशयमनुप्रविश्य अतिसारं सर्व्वदोष-लिङ्गं जनयन्ति ।

(ख) प्रपूर्त्तिः—अनुक्तलक्षणम्—वातातिसारस्य—विवद्धमूत्रः, अन्त्रकूजनम्, शिथिलकच्युरुजङ्घः । पित्तातिसारस्य—उष्णं, वेगवत्, मांसतोयप्रख्यम्, तीक्ष्णं (मक्षि-काणामपसर्पणेन ज्ञेयम्) श्लेष्मातिसारस्य—वेगाशङ्की सृष्टविट्कोऽपि भूयः ।

तथा दग्धगुड़ाभासं सपिच्छापरिकर्त्तिकम्।
शुष्कास्यो भ्रष्टपायुश्च हृष्टरोमा विनिष्टनन्।

पित्तातिसारलक्षणमाह—

पित्तेन पीतमसितं हरितम् शाद्वलप्रभम्।
सरक्तमतिदुर्गन्धं तृण्मूर्च्छादाहस्वेदवान्।
सशूलपायुसन्तापं पाकवान्—

श्लेष्मातिसारलक्षणमाह—

श्लेष्मणा घनम्।
पिच्छिलतन्तुमच्छ्वेतं स्निग्धमांसं कफान्वितम्।
अभीक्ष्णं गुरु दुर्गन्धं विबद्धमनुबद्धरुक्।
निद्रालुरलसोऽन्नद्विड़ल्पाल्पं सप्रवाहिकम्।
सरोमहर्षः सोत्क्लेशो गुरुवस्तिगुदोदरः।
कृतेऽप्यकृतसंज्ञश्च—

सन्निपातातिसारस्य लक्षणमाह—

सर्व्वात्मा कथ्यतेऽधुना।
वराहस्नेहमांसाम्बुसदृशं सर्व्वरूपिणम्।
कृच्छ्रसाध्यमतीसारं विद्याद्दोषत्रयोद्भवम्।

शोकजातिसारमाह—

तैस्तैर्भावैः शोचतोऽल्पाशनस्य।
वाष्पोष्मा वै वह्निमाविश्य जन्तोः।
कोष्ठं गत्वा क्षोभयेत्तस्य रक्तम्।
तच्चाधस्तात् काकणन्तीप्रकाशम्।

निर्गच्छेद्द्विविड्विमिश्रं ह्यविड् वा ।
निर्गन्धं वा गन्धवद्वातिसारः ।
शोकोत्पन्नो—

अस्यासाध्यत्वमाह—

दुश्चिकित्स्योऽतिमात्रम् ।
रोगो वैद्यैः कष्ट एष प्रदिष्टः । (क)

आमातिसारलक्षणमाह—

अन्नाजीर्णात् प्रद्रुताः क्षोभयन्तः ।
कोष्ठं दोषाः सम्प्रदुष्टाः सभक्तं ।
नानावर्णं नैकशः सारयन्ति ।
शूलोपेतं षष्ठमेनं वदन्ति ।

षण्णामप्यतिसाराणां संक्षेपेन द्वैविध्यमाह—

अतिसारः समासेन द्विधा सामो निरामकः ।
सासृग् निरस्र—

सर्वातिसाराणामामलक्षणं पक्वलक्षणञ्चाह—

स्तत्राद्ये गौरवादप्सु मज्जति ।
शकृद्दुर्गन्धि साटोपविष्टम्भार्त्तिप्रसेकिनः ।
विपरीतो निरामस्तु कफात् पक्वोऽपि मज्जति ।

(क) प्रपूर्त्तिः—अत्र भयजातिसारः पठनीयः, तल्लक्षणं यथा—भयेन क्षोभिते चित्ते सपित्तो द्रावयेच्छकृत् । वायुस्ततोऽतिसार्य्येत क्षिप्रमुष्णं द्रवं प्लवम् । वातपित्तसमैर्लिङ्गैराहुस्तद्वच्च शोकतः ।

इदानीं षट्संख्याधिक्यनिषेधार्थं मितगणामतिसाराणां दोषजेष्वे वान्तर्भावमाह—

शरीरिणामतीसारः सम्भूतो येन केनचित्।
दोषाणामेव लिङ्गानि कदाचिन्नातिवर्त्तते।
स्नेहाजीर्णनिमित्तस्तु बहुशूलप्रवाहिकः।
विसूचिकानिमित्तस्तु चान्योऽजीर्णनिमित्तजः।
विषार्शः-क्रिमिसम्भूतो यथास्वं दोषलक्षणः।

असाध्यलक्षणमाह—

पक्वजाम्बवसङ्काशं यकृत्पिण्डनिभं तनु।
घृततैलवसामज्जवेशवारपयोदधि-
मांसधावनतोयाभं कृष्णं नीलारुणप्रभम्।
मेचकं स्निग्धकर्वूरं चन्द्रकोपगतं घनम्।
कुणपं मस्तुलुङ्गाभं सुगन्धि कुथितं बहु।
तृष्णादाहतमःश्वासहिक्कापार्श्वास्थिशूलिनम्।
संमूर्च्छारतिसम्मोहयुक्तं पक्ववलीगुदम्।
प्रलापयुक्तञ्च भिषग्वर्ज्जयेदतिसारिणम्।
असंवृतगुदं क्षीणं दूराध्मातमुपद्रुतम्।
गुदे पक्वे गतोष्माणमतिसारकिणं त्यजेत्।
श्वासशूलपिपासार्त्तं क्षीणं ज्वरनिपीड़ितम्।
विशेषेण नरं वृद्धमतीसारो विनाशयेत्।
शोफं शूलं ज्वरं तृष्णां श्वासं कासमरोचकम्।
छर्दिं हिक्काञ्च मूर्च्छाञ्च दृष्ट्वातिसारिणं त्यजेत्।

साममिरसभेदेन सर्व्वातिसारान् विभज्य संप्रति पित्तातिसारस्यैवावस्थाविशेषं रक्तातिसारमाह—

पित्तकृन्ति यदात्यर्थं द्रव्याण्यश्नाति पैत्तिके।
तदोपजायतेऽभीक्ष्णं रक्तातिसार उल्वणः।
ज्वरं शूलं तृषं दाहं गुदपाकञ्च दारुणम्।

द्रवसरणसाधर्म्म्यादतिसाराधिकार एव प्रवाहिकामाह—

वायुः प्रवृद्धो निचितं बलासं
नुदत्यधस्तादहिताशनस्य।
प्रवाहतोऽल्पं बहुशो मलाक्तं।
प्रवाहिकां तां प्रवदन्ति तज्ज्ञाः॥

वातादिभेदेन प्रवाहिकालक्षणमाह—

प्रवाहिका वातकृता सशूला
पित्तात् सदाहा सकफा कफाच्च।
सशोणिता शोणितसम्भवा च
ताः स्नेहरूक्षप्रभवा मतास्तु।

प्रवाहिकाया आमपक्वलक्षणमतिदिशन्नाह—

तासामतीसारवदादिशेच्च।
लिङ्गं क्रमञ्चामविपक्वताञ्च।

अतिसारनिवृत्तिलक्षणमाह—

यस्योच्चारं विना मूत्रं सम्यग्वायुश्च गच्छति
दीप्ताग्नेर्लघुकोष्ठस्य स्थितस्तस्योदरामयः।

ग्रहण्यधिकारः।

ग्रहणीलक्षणमाह—

षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता।
पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्त्तिता।
अग्न्यधिष्ठानमन्नस्य ग्रहणाद् ग्रहणी मता।
अपक्वं धारयत्यन्नं पक्वं सृजति साप्यधः।

अग्निदोषाद् ग्रहणीदुष्टिं दर्शयति—

ग्रहण्या बलमग्निर्हि स चापि ग्रहणीश्रितः।
तस्मात् संदूषिते वह्नौ ग्रहणी सम्प्रदूष्यति।

निवृत्तातिसारस्य ग्रहणीरोगोत्पत्तिमाह—

अतिसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः।
भूयः सन्दूषितो वह्निर्ग्रहणीमभिदूषयेत्।

अतिसारग्रहणीरोगयोः समानाश्रयत्वात् को विशेष इत्याह—

सामं शकृन्निरामं वा जीर्णे येनातिसार्य्यते।
सोऽतिसारोऽतिसरणादाशुकारी स्वभावतः।

ग्रहणीदोषस्य स्वरूपं वर्णयन्नतीसारात् भूयो भेदानाह—

सामं सान्नमजीर्णेऽन्ने जीर्णे पक्वन्तु नैव वा।
अकस्माद्वा मुहुर्बद्ध मकस्माच्छिथिलं मुहुः।
चिरकृद् ग्रहणीदोषः सञ्चयाच्चोपवेशयेत्।

ग्रहण्याः संख्यामाह—

सा चतुर्धा पृथग्दोषैः सन्निपाताच्च जायते।

ग्रहण्याः पूर्व्वरूपमाह—

प्राग्रूपं तस्य सदनं चिरात् पचनमम्लकः ।
प्रसेको वक्त्रवैरस्यमरुचिस्तृट् क्लमो भ्रमः ।
आनद्धोदरता छर्द्दिः कर्णक्ष्वेड़ोऽन्त्रकूजनम् ।

ग्रहण्याः सामान्यलक्षणमाह—

अथ जाते भवेज्जन्तुः शूनपादकरः कृशः ।
पर्व्वरुग्लौल्यतृट्च्छर्द्दिज्वरारोचकदाहवान् ।
उद्गीरेच्छुक्ततिक्ताम्ललोहधूमामगन्धिकम् ।
प्रसेकमुखवैरस्यतमकारुचिपीड़ितः ।

वातग्रहण्या विशिष्टहेतुमाह—

कटुतिक्तकषायातिरूक्षसंदुष्टभोजनैः ।
प्रमितानशनात्यध्ववेगनिग्रहमैथुनैः ।
मारुतः कुपितो वह्निं संछाद्य कुरुते गदान् ।

वातग्रहणीलक्षणमाह—

तस्यान्नं पच्यते दुःखं शुक्तपाकं खराङ्गता ।
कण्ठास्यशोषः क्षुत्तृष्णा तिमिरं कर्णयोः स्वनः ।
पार्श्वोरुवङ्क्षणग्रीवारुगभीक्ष्णं विसूचिका ।
हृत्पीड़ाकार्श्यदौर्व्वल्यं वैरस्यं परिकर्त्तिका ।
गृद्धिः सर्व्वरसानाञ्च मनसः सदनन्तथा ॥
जीर्णे जीर्य्यति चाध्मानं भुक्ते स्वास्थ्यमुपैति च ।
सवातगुल्महृद्रोगप्लीहाशङ्की च मानवः ।
चिराद्दुःखं द्रवं शुष्कं तन्वामं शब्दफेनवत् ।
पुनः पुनः सृजेद्वर्चः कासश्वासार्द्दितोऽनिलात् ।

पित्तग्रहण्या विशिष्टहेतुसंप्राप्ती आह—

कट्वजीर्णविदाह्यम्लक्षाराद्यैः पित्तमुल्वणम्।
आप्लावयद्धन्त्यनलं जल न्तप्तमिवानलं।

पित्तग्रहणीलक्षणमाह—

सोऽजीर्णं नीलपीताभं पीताभः सार्य्यते द्रवम्।
पूत्यम्लोद्गारहृत्कण्ठदाहारुचितृड़र्द्दितः।

श्लेष्मग्रहण्या विशिष्टहेतुमाह—

गुर्व्वतिस्निग्धशीतादिभोजनादतिभोजनात्।
भुक्तमात्रस्य च स्वप्नाद्धन्त्यग्निं कुपितः कफः।
तस्यान्नं पच्यते दुःखं हृल्लासच्छर्द्यरोचकाः।
आस्योपदेहमाधुर्य्यं कासष्ठीवनपीनसाः।
हृदयं मन्यते स्त्यानमुदरं स्तिमितं गुरु।
दुष्टो मधुर उद्गारः सदनं स्त्रीष्वहर्षणं।
भिन्नामश्लेष्मसंसृष्टगुरुवर्च्चःप्रवर्त्तनम्।
अकृशस्यापि दौर्व्बल्यमालस्यञ्च कफात्मके।

प्रकृतिसमसमवेतारब्धायास्त्रिदोषग्रहण्या हेतुलक्षणमतिदेशेनाह—

पृथग्वातादिनिर्द्दिष्टहेतुलिङ्गसमागमे।
त्रिदोषं निर्द्दिशेदेवं तेषां वक्ष्यामि भेषजं।

संग्रहग्रहण्या लक्षणमाह—

अन्त्रकूजनमालस्यं दौर्व्बल्यं सदनन्तथा।
द्रवं घनं सितं स्निग्धं सकटीवेदनं शकृत्।
आमं बहु सपैच्छिल्यं सशब्दं मन्दवेदनम्।
पक्षान्मासाद्दशाहाद्वा नित्यं वाप्यथ मुञ्चति।

दिवा प्रकोपो भवति रात्रौ शान्तिं व्रजेच्च सा ।
दुर्विज्ञेया दुश्चिकित्स्या चिरकालानुबन्धिनी ॥
सा भवेदामवातेन संग्रहग्रहणी मता ।

घटीयन्त्राख्यग्रहण्या लक्षणमाह—

स्वपतः पार्श्वयोः शूलं गलज्जलघटीध्वनिः ।
तं वदन्ति घटीयन्त्रमसाध्यं ग्रहणीगदम् ।

ग्रहणीप्रभृतीनां सुदुस्तरत्वमाह—

वातव्याध्यश्मरीकुष्ठमेहोदरभगन्दराः ।
अर्शांसि ग्रहणीत्यष्टौ महारोगाः सुदुस्तराः ॥

अर्शोऽधिकारः ।

अर्शसां निरुक्तिमाह—

अरिवत् प्राणिनो मांसकीलका विशसन्ति यत् ।
अर्शांसि तस्मादुच्यन्ते गुदमार्गनिरोधतः ।

अर्शसां सामान्यनिदानमाह—

यानसंक्षोभविषमकठिनोत्कटकासनात् ।
वस्तिनेत्राश्मलोष्टोर्व्वीतलचैलादिघट्टनात् ।
भृशं शीताम्बुसंस्पर्शात् प्रततातिप्रवाहणात् ।
वातमूत्रशकृद्वेगधारणात्तदुदीरणात् ।
ज्वरगुल्मातिसारामग्रहणीशोफपाण्डुभिः ।
कर्शनाद्विषमाभ्यश्च चेष्टाभ्यो योषितां पुनः ।
आमगर्भप्रपतनात् गर्भवृद्धिप्रपीड़नात् ।

उत्तरकालजाना मर्शसां संप्राप्तिमाह—

ईदृशैस्वापरैर्वायुरपानः कुपितो मलम्।
पायोर्वलीषु संधत्ते तास्वभिष्यन्नमूर्त्तिषु। (घ)
जायन्तेऽर्शांसि—

अर्शसां पूर्व्वरूपाण्याह—

तत्पूर्व्वलक्षणं मन्दवह्निता।
विष्टम्भः सक्थिसदनं पिण्डिकोद्वेष्टनं भ्रमः।
सादोऽङ्गे नेत्रयोः शोफः शकृद्भेदोऽथवा ग्रहः।
कार्श्यमुद्गारबाहुल्यं कुक्षेराटोप एव च।

गुदजानामप्यर्शसां सर्व्वदेहोपतापित्वं सोपपत्तिकमाह—

निवर्त्तमानोऽपानो हि तैरधोमार्गरोधतः।
क्षोभयन्ननिलानन्यान् सर्व्वेन्द्रियशरीरगान्।
तथा मूत्रशकृत्पित्तकफान् धातूंश्च साशयान्।
मृद्नात्यग्निं ततः सर्व्वो भवति प्रायशोऽर्शसः।
कृशो भृशं हतोत्साहो हीनः क्षामोऽतिनिष्प्रभः।
असारो विगतच्छायो जन्तुजुष्ट इव द्रुमः।

आविर्भावकालभेदात् शुष्कस्राविभेदाच्च सर्व्वेषामर्शसां समासतोद्वैविध्यमाह—

सहजन्मोत्तरोत्थानभेदाद्द्वेधा समासतः।
शुष्कस्राविविभेदाच्च—

(घ) प्रपूर्त्तिः—यथोक्तैः प्रकोपणैः प्रकुपिता दोषाः यथोक्तं प्रसृताः प्रधान-धमनीरनु प्रपद्याऽधोगत्वा गुदमागत्य प्रदूष्य वली मांसप्ररोहान् जनयन्ति।

गुदस्य प्रमाणमाह—

गुदः स्थूलान्त्रसंश्रयोऽर्द्धपञ्चाङ्गुल

वलीनां नामवर्णप्रमाणसन्निवेशानाह—

स्तस्मिंस्तिस्रोऽध्यर्द्धाङ्गुलाः स्थिताः ।
वल्यः प्रवाहणी तासामन्तर्मध्ये विसर्ज्जनी ।
बाह्या सम्वरणी तस्या गुदोष्ठो वहिरङ्गुले ।
यवाध्यर्द्धप्रमाणेन रोमाप्यत्न ततः परम् । (क)
शङ्खावर्त्तनिभा वल्य उपर्य्युपरिसंस्थिताः ।
गजतालुनिभाश्चापि वर्णतः सम्प्रकोर्त्तिताः ।

सर्व्वार्शसां त्रिदोषजत्वं दर्शयति—

अर्शांसि खलु जायन्ते नासन्निपातिकैस्त्रिभिः ।
दोषैर्दोषविशेषात्तु विशेषः कथ्यतेऽर्शसाम् ।

सहजार्शसां हेतुमाह—

तत्र हेतुः सहोत्थानां वलीवोजोपतप्तता ।
अर्शसां वीजतप्तिस्तु मातापित्नपचारतः ।
दैवाच्च ताभ्यां कोपो हि सन्निपातस्य नान्यतः ।

प्रसङ्गात् कुलजानामपरेषां व्याधीनामसाध्यत्वमाह—

असाध्यमेव माख्याताः सर्व्वे रोगाः कुलोद्भवाः ।

(क) प्रपूर्त्तिः—तत्र स्थूलान्त्रप्रतिबद्धमर्द्धपञ्चाङ्गुलं गुदमाहुः । तस्मिन् वलय स्तिस्रोऽध्यर्द्धाङ्गुलान्तरभूताः, प्रवाहणी विसर्ज्जनी सम्वरणी चेति चतुरङ्गुलायताः सर्व्वास्तिर्य्यगेकाङ्गुलोच्छ्रिताः ।

सहजार्शसां लक्षणमाह—

सहजानि विशेषेण रूक्षदुर्दर्शनानि च ।
अन्तर्मुखानि पाण्डूनि दारुणोपद्रवाणि च । (घ)

उत्तरकालजातानामर्शसां संख्यामाह—

षोढ़ान्यानि पृथग्दोषसंसर्गनिचयास्त्रतः ।

वातोल्वणार्शसां विशिष्टं हेतुमाह—

कषायकटुतिक्तानि रूक्षशीतलघूनि च ।
प्रमिताल्पाशनं तीक्ष्णं मद्यं मैथुनसेवनम् ।
लङ्घनं देशकालौ च शीतौ व्यायामकर्म्म च ।
शोको वातातपस्पर्शो हेतु र्वातार्शसां मतः ।

पित्तोल्वणार्शसां विशिष्टं हेतुमाह—

कट्वम्ललवणोष्णानि व्यायामाग्न्यातपप्रभाः ।
देशकालावशिशिरौ क्रोधो मद्यमसूयनम् ।
विदाहि तीक्ष्णमुष्णञ्च सर्व्वं पानान्नभेषजम् ।
पित्तोल्वणानां विज्ञेयः प्रकोपे हेतुरर्शसाम् ।

श्लेष्मोल्वणार्शसां विशिष्टं हेतुमाह—

मधुरस्निग्धशीतानि लवणाम्लगुरूणि च ।
अव्यायामो दिवास्वप्नः शय्यासनसुखे रतिः ।
प्राग्वातसेवा शीतौ च देशकालावचिन्तनम् ।
श्लैष्मिकाणां समुद्दिष्टमेतत् कारणमर्शसां ।

प्रपूर्त्तिः—(घ) तैरुपद्रुतः कृशोऽल्पभुक्, सिरासन्ततगात्रः, अल्पप्रजः, क्षीण-रेताः, क्षामस्वरः, क्रोधनः, अल्पाग्निः, घ्राणशिरोऽक्षिश्रवणरोगवान्, सततं अन्त्रकूजा-टोपोपलेपारोचकप्रभृतिभिः पीड्यते ।

वातोल्वणार्शसां लक्षणमाह—

गुदाङ्कुरा बह्वनिलाः शुष्काश्चिमचिमान्विताः ।
म्लानाः श्यावारुणाः स्तब्धा विशदाः परुषाः खराः ॥
मिथो विसदृशा वक्रास्तीक्ष्णा विस्फुटिताननाः ।
विम्बीखर्ज्जूरकर्कन्धूकार्पासीफलसन्निभाः ।
केचित् कदम्बपुष्पाभाः केचित् सिद्धार्थकोपमाः ॥
शिरःपार्श्वांसकट्यूरुवङ्क्षणाद्यधिकव्यथाः ।
क्षुवथूद्गारविष्टम्भहृद्ग्रहारोचकप्रदाः ।
कासश्वासाग्निवैषम्यकर्णनादभ्रमावहाः ।
तैरार्त्तो ग्रथितं स्तोकं सशब्दं सप्रवाहिकम् ।
रुक्फेनपिच्छानुगतं विबद्धमुपवेश्यते ।
कृष्णत्वङ्नखविण्मूत्रनेत्रवक्त्रश्च जायते ।
गुल्मप्लीहोदराष्ठीलासम्भवस्तत एव च ।

पित्तोल्वणार्शसां लक्षणमाह—

पित्तोत्तरा नीलमुखा रक्तपीतासितप्रभाः ।
तन्वस्रस्राविणो विस्रास्तनवो मृदवः श्लथाः ॥
शुकजिह्वायकृत्खण्डजलौकावक्त्रसन्निभाः ।
दाहपाकज्वरस्वेदतृण्मूर्च्छारुचिमोहदाः ।
सोष्माणो द्रवनीलोष्णपीतरक्तामवर्च्चसः ।
यवमध्या हरित्पीतहारिद्रत्वङ्नखादयः ।

श्लेष्मोल्वणार्शसां लक्षणमाह—

श्लेष्मोल्वणा महामूला घना मन्दरुजः सिताः ॥
उत्सन्नोपचितस्निग्धस्तब्धवृत्तगुरुस्थिराः ।

पिच्छिलाः स्तिमिताः श्लक्ष्णाः कण्ड्वाढ्याः स्पर्शनप्रियाः।
करीरपनसास्थ्याभास्तथा गोस्तनसन्निभाः।
वङ्क्षणानाहिनः पायुवस्तिनाभिविकर्षिणः।
सश्वासकासहृल्लासप्रसेकारुचिपीनसाः।
मेहकृच्छ्रशिरोजाड्यशिशिरज्वरकारिणः।
क्लैव्याग्निमार्दवच्छर्द्दिरामप्रायविकारदाः।
वसाभसकफप्राज्यपुरीषाः सप्रवाहिकाः।
न स्रवन्ति न भिद्यन्ते पाण्डुस्निग्धत्वगादयः।

रक्तोल्वणार्शसां लक्षणमाह—

रक्तोल्वणा गुदे कीलाः पित्ताकृतिसमन्विताः।
वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः।
तेऽत्यर्थं दुष्टमुष्णञ्च गाढ़विट्कप्रपीड़िताः।
स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः।
भेकाभः पीड्यते दुःखैः शोणितक्षयसम्भवैः।
हीनवर्णवलोत्साहो हतौजाः कलुषेन्द्रियः।

रक्तजेषु दोषानुवन्धमाह—

तत्रानुवन्धोद्विविधः श्लेष्मणो मारुतस्य च।

वातानुवन्धलक्षणमाह—

विट्श्यावं कठिनं रूक्षमधोवायु र्न वर्त्तते।
तनुचारुणवर्णञ्च फेनिलञ्चासृगर्शसां।
कट्यूरुगुदशूलञ्च दौर्वल्यं यदि चाधिकम्।
तत्रानुवन्धोवातस्य हेतुर्यदि च रूक्षणम्।

श्लेष्मानुबन्धलक्षणमाह—

शिथिलं श्वेतपीतञ्च विट् स्निग्धं गुरुशीतलम् ।
यद्यर्शसां घनञ्चासृक् तन्तुमत् पाण्डु पिच्छिलम्
गुदं सपिच्छं स्तिमितं गुरुस्निग्धञ्च कारणम् ।
श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां बुधैः ।

दोषाश्रयभेदेनार्शसां साध्यासाध्यत्वमाह—

वाह्यायान्तु बलौ जातान्येकदोषोल्वणानि च ।
अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च ।
द्वन्द्वजानि द्वितीयायां बलौ यान्याश्रितानि च ।
कृच्छ्रसाध्यानि तान्याहुः परिसम्वत्सराणि च ।
सहजानि त्रिदोषाणि यानि चाभ्यन्तरां बलिं
जायन्तेऽर्शांसि संश्रित्य तान्यसाध्यानि निर्द्दिशेत् ।

अवस्थाविशेषेण याप्यत्वमसाध्यत्वञ्चाह—

शेषत्वादायुषस्तानि चतुष्पादसमन्विते ।
याप्यन्ते दीप्तकायाग्नेः प्रत्याख्येयान्यतोऽन्यथा ।

अपरमसाध्यलक्षणमाह—

हस्ते पादे मुखे नाभ्यां गुदे वृषणयोस्तथा ।
शोथो हृत्पार्श्वशूलञ्च यस्यासाध्योऽर्शसो हि सः ।
हृत्पार्श्वशूलं संमोहश्छर्द्दिरङ्गस्य रुग् ज्वरः ।
तृष्णा गुदस्य पाकश्च निहन्यु र्गुदजातुरम् ।
तृष्णारोचकशूलार्त्तमतिप्रस्रुतशोणितम् ।
शोथातिसारसंयुक्त मर्शांसि क्षपयन्ति हि ।

मेढ्रादिजान्यर्शांस्याह—

मेढ्रादिष्वपि वक्ष्यन्ते यथास्वं नाभिजानि च ।
गण्डूपदास्यरूपाणि पिच्छिलानि मृदूनि च । (ङ)

चर्म्मकीलस्य संप्राप्तिपूर्व्विकां निरुक्तिमाह—

व्यानो गृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचो वहिः ।
कीलोपमं स्थिरखरं चर्म्मकीलन्तु तद्विदुः ।

वातादिभेदेन चर्म्मकीलस्य लक्षणमाह—

वातेन तोदपारुष्यं पित्तादसितवक्तता ।
श्लेष्मणा स्निग्धता तस्य ग्रथितत्वं सवर्णता ।

अग्निमान्द्याजीर्णाधिकारः ।

अग्निमान्द्यप्रतियोगिन मग्निपरिरक्षणं सोपपत्तिकमाह—

अन्नस्य पक्ता सर्व्वेषां पक्तॄणामधिकोमतः ।
तन्मूलास्तेहि तद्वृद्धिक्षयवृद्धिक्षयात्मकाः

(ङ) प्रपूर्त्तिः—प्रकुपितास्तु दोषा मेढ्रमभिप्रपन्नाः मांसशोणिते प्रदूष्य कण्डुं जनयन्ति। ततः कण्डूयनात् क्षतं समुपजायते। तस्मिंश्च क्षते दुष्टमांसजाः प्ररोहाः पिच्छिलरुधिरस्राविणो जायन्ते कूर्च्चिनः (सूक्ष्मदीर्घाङ्कुरसन्तानवन्तः) अभ्यन्तरं (मध्ये:) उपरिष्टाद्वा (वाह्यचर्म्मणि); ते तु शोफा विनाशयन्ति पुंस्त्वमुपघ्नन्ति वा। योनिमभिप्रपन्नाः सुकुमारान् दुर्गन्धान् पिच्छिलरुधिरस्राविणश्छत्राकारान् करीरान् जनयन्ति। त एवोर्द्ध्वमागताः श्रोत्राक्षिघ्राणवदनेष्वर्शांस्युपनिर्व्वर्त्तयन्ति। तत्र कर्णजेषु वाधिर्य्यं शूलं, पूतिकर्णता च। नेत्रजेषु वर्त्मावरोधः, वेदनास्रावः, दर्शननाशश्च। घ्राणजेषु प्रतिश्यायोऽतिमात्रं क्षवथुः, कृच्छ्रोच्छ्वासता, पूतिनस्यं, सानुनासिक-वाक्यत्वं शिरोदुःखञ्च। वक्त्रजेषु कण्ठोष्ठतालूनामन्यतमस्मिंस्तैर्गद्गदवाक्यता, रसाज्ञानं मुखरोगाश्च भवन्ति।

तस्मात्तं विधिवद्युक्तैरन्नपानेन्धनैर्हितैः।
पालयेत् प्रयतस्तस्य स्थितौ ह्यायुर्बलस्थितिः।

चतुर्व्विधमग्निमाह—

मन्दस्तीक्ष्णोऽथविषमः समश्चेति चतुर्विधः।
कफपित्तानिलाधिक्यात् तत्साम्याज्जाठरोऽनलः।

चतुर्व्विधानामग्नीनां लक्षणमाह—

समा समाग्नेरशिता मात्रा सम्यग्विपच्यते।
स्वल्पापिनैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः।
कदाचित् पच्यते सम्यक् कदाचिच्च न पच्यते।
मात्रातिमात्राप्यशिता सुखं यस्य विपच्यते।
तीक्ष्णाग्निरिति तं विद्यात् समाग्निः श्रेष्ठ उच्यते। (च)

विषमादीनां व्याधिकर्त्तृत्वमाह—

विषमो वातजान् रोगान् तीक्ष्णः पित्तनिमित्तजान्।
करोत्यग्निस्तथा मन्दोविकारान् कफसम्भवान्।

(च) **प्रपूर्त्तिः**—अग्निरन्नस्य पाचकः। स चतुर्व्विधो भवति। दोषानभिपन्न एको विक्रियामापन्नस्त्रिविधो भवति। विषमो वातेन, तीक्ष्णः पित्तेन, मन्दःश्लेष्मणा, चतुर्थः समः सर्व्वसाम्यादिति। तत्र यो यथाकालमन्नमुपयुक्तं सम्यक् पचति स समः समैर्दोषैः। यः कदाचित् सम्यक् पचति कदाचिदाध्मानशूलोदावर्त्तातिसारजठरगौरवान्त्र-कूजनप्रवाहनानि कृत्वा स विषमः। यः प्रभूतमप्युपयुक्तमन्नमाशु पचति स तीक्ष्णः। स मुहुर्मुहुः प्रभूतमप्युपयुक्तमाशुतरं पचति। पाकान्ते च गलताल्वोष्ठशोषदाहसन्तापान् जनयति। यस्तु स्वल्पमप्युपयुक्तमुदरशिरोगौरवश्वासकासप्रसेकच्छर्द्दिगात्रवसदनानि कृत्वा महता कालेन पचति स मन्दः।

सर्व्वैः सर्व्वत्र मात्राविचारः कार्य्य इति प्रतिपादयितुमाह—

मात्राशी सर्व्वकालं स्यान्मात्राह्यग्नेः प्रवर्त्तिका।
मात्रां द्रव्याण्यपेक्षन्ते गुरूण्यपि लघून्यपि।

गुरूणां लघूनाञ्च मात्रामाह—

गुरूणामर्द्धसौहित्यं लघूनां नातितृप्तता।
मात्राप्रमाणं निर्द्दिष्टं सुखं यावद् विजीर्य्यति।

हीनमात्रस्य भोजनस्य व्याधिहेतुतां दर्शयति—

भोजनं हीनमात्रन्तु न बलोपचयौजसे
सर्व्वेषां वातरोगाणां हेतुताञ्च प्रपद्यते।

उक्तविधिपरीहारस्य दोषमाह—

यो हि भुङ्क्ते विधिं मुक्त्वा वह्निदोषकृतान् गदान्।
स लौल्याल्लभते शीघ्रं वक्ष्यन्तेऽतः परन्तु ये।

अजीर्णसाधारणहेतुमाह—

अत्यम्बुपानाद्विषमाशनाच्च। संधारणात् स्वप्नविपर्य्ययाच्च।
कालेऽपि सात्म्यं लघु चापि भुक्त। मन्नं न पाकं भजते नरस्य।

नचातिमात्रमेवान्न मामदोषाय केवलम्।
द्विष्टविष्टम्भिदग्धामगुरुरूक्षहिमाशुचि।
विदाहि शुष्कमत्यम्बुप्लुतं वान्नं न जीर्य्यति।
उपतप्तेन भुक्तञ्च शोकक्रोधक्षुधादिभिः।

समशनादीनां अजीर्णहेतूनां लक्षणमाह—

मिश्रं पथ्यमपथ्यञ्च भुक्तं समशनं मतम्।
विद्यादध्यशनं भूयो भुक्तस्योपरिभोजनम्।

अकाले बहु चाल्पं वा भुक्तान्तु विषमाशनम्।
त्रीण्यप्येतानि मृत्युं वा घोरान् व्याधीन् सृजन्ति वा॥

अजीर्णानां षड्विधत्वं विभजते—

आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः
चतुर्थन्तत्तु विज्ञेयं यदन्नविषसंज्ञकम्।
पञ्चमं रसशेषन्तु षष्ठञ्च दिनपाकि यत्।
अजीर्णं सप्तमं विद्यात् प्राकृतं प्रतिवासरम्।

अजीर्णसामान्यलिङ्गमाह—

विबन्धोऽति प्रवृत्तिर्वा ग्लानि र्मारुतमूढ़ता।
अजीर्णलिङ्गं सामान्यं विष्टम्भो गौरवं भ्रमः।

आमाजीर्णलक्षणमाह—

तत्रामे गुरुतोत्क्लेदः शोथो गण्डाक्षिकूटगः।
उद्गारश्च यथाभुक्त मविदग्धः प्रवर्त्तते।

आमाजीर्ण मभिधायाऽऽमस्यापरविकारकर्त्तृत्वमाह—

यत्रस्थमामं विरुजेत्तमेव। देशं विशेषेण विकारजातैः॥
दोषेण येनावततं शरीरं। तल्लक्षणै रामसमुद्भवैश्च।

विदग्धाजीर्णलक्षणमाह—

विदग्धे भ्रमतृण्मूर्च्छा पित्ताच्च विविधा रुजः।
उद्गारश्च सधूमाम्लः स्वेदो दाहश्च जायते।

विष्टब्धाजीर्णलक्षणमाह—

विष्टब्धे शूलमाध्मानं विविधा वातवेदनाः
मलवाताप्रवृत्तिश्च स्तम्भो मोहाङ्गपीड़नम्।

अन्नविषाख्यस्याजीर्णस्य निदानमाह—

अभोजनादजीर्णातिभोजनाद्विषमाशनात्।
असात्म्यगुरुशीतातिरूक्षसंदुष्टभोजनात्।
विरेकवमनस्नेहविभ्रमाद् व्याधिकर्षणात्।
देशकालर्त्तुवैषम्याद् वेगानाञ्च विधारणात्।
दुष्यत्यग्निः सदुष्टोऽन्नं न तत् पचति लघ्वपि।
अपच्यमानं शुक्तत्वं यात्यन्नं विषताञ्च तत्।

अन्नविषाख्यस्याजीर्णस्य लक्षणमाह—

तस्य लिङ्गमजीर्णस्य विष्टम्भोऽङ्गञ्च सीदति।
शिरसो रुक् च मूर्च्छा च भ्रमः पृष्ठकटीग्रहः।
जृम्भाङ्गमर्द्दस्तृष्णा च ज्वरश्छर्द्दिः प्रवाहणम्।
अरोचकोऽविपाकश्च—

तस्यान्नविषस्य पित्तादिसंसृष्टस्य भूरिदारुणव्याधिकर्त्तृत्वमाह—

घोरमन्नविषञ्च तत्।
संसृज्यमानं पित्तेन दाहं तृष्णां मुखामयान्।
जनयत्यम्लपित्तञ्च पित्तजांश्चापरान् गदान्।
यक्ष्मपीनसमेहादीन् कफजान् कफसङ्गतः।
करोति वातसंसृष्टं वातजांश्च बहून् गदान्।
मूत्ररोगांश्च मूत्रस्थं कुक्षिरोगान् शकृद्गतम्।
रसादिभिश्च संसृष्टं कुर्य्याद्रोगान् रसादिजान्।

जीर्णेऽप्याहारे कदाचिदाहारसारो रसोऽजीर्णः स्यादतो

रसशेषाजीर्णलक्षणमाह—

अश्रद्धा हृद्व्यथा शुद्धेऽप्युद्गारे रसशेषतः।

अजीर्णस्योपद्रवमाह—

मूर्च्छा प्रलापो वमथुः प्रसेकः सदनं भ्रमः ।
उपद्रवा भवन्त्येते मरणं वाप्यजीर्णतः ।

अजीर्णकारणमतिभोजनं निन्दन्नारोग्यमूलं परिमिताहारं स्तौति—

अनात्मवन्तः पशुवद्भुञ्जते येऽप्रमाणतः
रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि ।
न तत् परिमिताहारा लभन्ते विदितागमाः ।
मूढास्तदजितात्मानो लभन्ते ऽशनलोलुपाः ।

जीर्णाहारस्य लक्षणमाह—

उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः ।
लघुता क्षुत्पिपासा च जीर्णाहारस्य लक्षणम् ।

अलसकविसूचिकाविलम्बिकाधिकारः ।

अलसकविसूचीकयोर्निदानसम्प्राप्ती आह—

पीड्यमाना हि वाताद्या युगपत्तेन कोपिताः ।
आमेनान्नेन दुष्टेन तदेवाविश्य कुर्व्वते ।
विष्टम्भयन्तोऽलसकं च्यावयन्तो विसूचिकाम् ।
अधरोत्तरमार्गाभ्यां सहसैवाजितात्मनः ।

अलसकस्य निरुक्तिमाह—

प्रयाति नोर्द्ध्वं नाधस्तादाहारो न च पच्यते ।
आमाशयेऽलसीभूतस्तेन सोऽलसकः स्मृतः ।

विसूचिकाया निरुक्तिमाह—

विविधै र्वेदनोद्भेदैर्वातादिभृशकोपतः।
सूचीभिरिव गात्राणि विध्यतीति विसूचिका।

विसूचिकायाः सामान्यलक्षणमाह—

मूर्च्छातिसारो वमथुः पिपासा। शूलोभ्रमोद्वेष्टनजृम्भदाहाः।
वैवर्ण्यकम्पौ हृदये रुजश्च। भवन्ति तस्यां शिरसश्च भेदः।

तस्या वातादीनामाधिक्येन लक्षणमाह—

तत्र शूलभ्रमानाहकम्पस्तम्भादयोऽनिलात्।
पित्ताज्ज्वरातिसारान्तर्दाहतृड्प्रलयादयः।
कफाच्छर्द्यङ्गगुरुता वाक्सङ्गष्ठीवनादयः।

अलसकं सविस्तरमाह—

विशेषाद् दुर्व्वलस्याल्पवह्नेर्वेगविधारिणः।
पीड़ितं मारुतेनान्नं श्लेष्मणा रुद्धमन्तरा।
अलसं क्षोभितं दोषैः शल्यत्वेनैव संस्थितम्।
शूलादीन् कुरुते तीव्रांश्छर्द्यतीसारवर्ज्जितान्।
सोऽलसो—

दण्डकालसकमाह—

ऽत्यर्थदुष्टास्तु दोषा दुष्टामवद्धखाः।
यान्तस्तिर्य्यक् तनुं सर्वां दण्डवत् स्तम्भयन्ति चेत्।
दण्डकालसकं नाम तं त्यजेदाशुकारिणम्।

विसूच्यलसकयोरसाध्यलक्षणमाह—

यः श्यावदन्तौष्ठनखोऽल्पसंज्ञो वम्यर्द्दितोऽभ्यन्तरयातनेत्रः।
क्षामस्वरः सर्वविमुक्तसन्धिर्यायान्नरः सोऽपुनरागमाय।

विलम्बिकामाह—

दुष्टन्तु भुक्तं कफमारुताभ्यां प्रवर्त्तते नोर्द्धमधश्च यस्य
विलम्बिकां तां भृशदुश्चिकित्स्या माचक्षते शास्त्रविदः पुराणाः ।

क्रिम्यधिकारः ।

क्रिमिनिदानमाह—

अजीर्णभोजी मधुराम्लनित्यो द्रवप्रियः पिष्टगुड़ोपभोक्ता ।
व्यायामवर्ज्जी च दिवाशयानो विरुद्धभुक् संलभते क्रिमींस्तु ।

क्रिमीणामाश्रयभेदेन द्वैविध्यं, जन्मभेदेन चतुर्विधत्वं, नामभेदेन च
विंशतिप्रकारत्वं दर्शयन्नाह—

क्रिमयश्च द्विधा प्रोक्ता वाह्याभ्यन्तरभेदतः ।
बहिर्मलकफासृग्विड़् जन्मभेदाच्चतुर्विधाः ।
नामतो विंशतिविधा

वाह्यानां नामवर्णाकृत्याश्रयोद्भवान् विवृणोति—

वाह्या स्तत्र मलोद्भवाः ।
तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः ।
बहुपादाश्च सूक्ष्माश्च यूकालिक्षाश्च नामतः ।
द्विधा ते कोठपिड़काः कण्डूगण्डान् प्रकुर्वते ।

आभ्यन्तरक्रिमीणां प्रभवमाह—

आमपक्वाशय स्तेषां प्रसवः प्रायशः स्मृतः ।

विंशतेः क्रिमिजातीनां कारणत्रैविध्यमाह—

विंशतेः क्रिमिजातीनां त्रिविधः सम्भवः स्मृतः ।
कफरक्तपुरीषाणि तेषां वक्ष्यामि लक्षणम् ।

कफरक्तपुरीषजानां क्रिमीणां निदानविशेषमाह—

माषपिष्टाम्ललवणगुड़शाकैः पुरीषजाः।
मांसमत्स्यगुड़क्षीरदधिशुक्तैः कफोद्भवाः।
विरुद्धाजीर्णशाकाद्यैः शोणितोत्था भवन्ति हि।

जातिष्वाभ्यन्तरक्रिमिषु यल्लक्षणं दृश्यते तदाह—

ज्वरो विवर्णता शूलं हृद्रोगः सदनं भ्रमः।
भक्तद्वेषोऽतिसारश्च सञ्जातक्रिमिलक्षणम्।

आमाशयप्रभवानां कफजानां क्रिमीणां रूपनामकर्म्माण्याह—

कफादामाशये जाता वृद्धाः सर्पन्ति सर्वतः।
पृथुब्रध्ननिभाः केचित् केचिद्गण्डूपदोपमाः॥
रूढ़धान्याङ्कुराकारा स्तनुदीर्घा स्तथाणवः।
श्वेतास्ताम्रावभासाश्च नामतः सप्तधा तु ते।
अन्त्रादा उदरावेष्टा हृदयादा महागुदाः
चुरवो दर्भकुसुमाः सुगन्धास्ते च कुर्वते।
हृल्लासमास्यस्रवण मविपाक मरोचकम्।
प्रतिश्यायं शिरोरोगं हृद्रोगं वमथुन्तथा।
मूर्च्छाछर्दिज्वरानाहकार्श्यक्षवथुपीनसान्।

रक्तवाहिसिरास्थानप्रभवानां रक्तजक्रिमीणां रूपनामकर्म्माण्याह—

रक्तावाहिसिरास्थानरक्तजा जन्तवोऽनवः।
अपादा वृत्तताम्राश्च सौक्ष्म्यात् केचिददर्शनाः।
केशादा रोमविद्वंसा रोमद्वीपा उड़ुम्बराः
षट् ते कुष्ठैककर्म्माणः सहसौरसमातरः।

पक्वाशयप्रभवानां पुरीषजानां क्रिमीणां नामरूपकर्म्माण्याह—

पक्वाशये पुरीषोत्था जायन्तेऽधोविसर्पिणः ।
वृद्धास्ते स्युर्भवेयुश्च ते यदामाशयोन्मुखाः ।
तदास्योद्गारनिश्वासाः विड़्गन्धानुविधायिनः ।
दीर्घोर्णा शुकसङ्काशा वृत्ता स्थूलाः सितासिताः ।
ते पञ्चनाम्ना क्रिमयः ककेरुकमकेरुकाः ।
सौसुराद्याः सशूलाख्या लेलिहा जनयन्ति हि ।
विड़्भेदशूलविष्टम्भकार्श्य पारुष्यपाण्डुताः ।
रोमहर्षाग्निसदनं गुदकण्डूर्विमार्गगाः । (क)

पाण्डुकामलाकुम्भकामलाहलीमकाधिकारः ।

आदौ पाण्डुरोगस्य निदानसम्प्राप्तिलक्षणानि वीजरूपेणाह—

पाण्डुरोगाः स्मृताः पञ्च वातपित्तकफैस्त्रयः ।

(क) प्रपूर्त्तिः—चरकदर्शिना वाग्भटेन यदुक्तं क्रिमिनिदानप्रस्तावे तदेव वाहुल्येनेहमाधवेनोद्धृतम् । अस्माभिस्तु शिष्यहिताय क्रिमीनां सुश्रुतोक्त नामरूपकर्म्माण्युद्ध्रियन्ते इहानुक्तानि—अथवा विथवाः किप्यास्तिप्पा गण्डूपदास्तथा । च्युरवो द्विमुखाश्चैव सप्तैवैते पुरीषजाः । श्वेताः सूक्ष्मास्तुदन्त्येते गुदं प्रतिसरन्ति च । तेषामेवापरे पुच्छैः पृथवश्च भवन्ति हि । दर्भपुष्पा महापुष्पाः प्रलूनाश्चिपिटास्तथा । पिपीलिका दारुणाश्च कफकोपसमुद्भवाः । रोमशा रोममूर्द्धानः सपुच्छाः श्यावमण्डलाः । रूढ़धान्याङ्कुराकाराः शुक्लास्ते तनवस्तथा । केशरोमनखादाश्च दन्तादाः किक्किशास्तथा । कुष्ठजाश्च परीसर्पा ज्ञेयाः शोणितसम्भवाः । ते सरक्ताश्च कृष्णाश्च स्निग्धाश्च पृथवस्तथा । रक्ताधिष्ठानजान् प्रायो विकारान् जनयन्ति ते । शरीरसहजास्त्ववैकारिकाः क्रिमयो विंशतेरप्यधिका भवन्ति यदाह चरकः—"इह खल्वग्निवेश, विंशतिविधाः क्रिमयः पूर्व्वमुद्दिष्टा नानाविधेन प्रविभागेनान्यत्र सहजेभ्य" इति ।

चतुर्थः सन्निपातेन पञ्चमो भक्षणान्मृदः।
दोषाः पित्तप्रधानास्तु यस्य कुप्यन्ति धातुषु।
शैथिल्यं तस्य धातूनां गौरवञ्चोपजायते।
ततो वर्णबलस्नेहा ये चान्येऽप्यौजसो गुणाः।
व्रजन्ति क्षयमत्यर्थं दोषदुष्यप्रदूषणात्।
सोऽल्परक्तोऽल्पमेदस्को निःसारः शिथिलेन्द्रियः।
वैवर्ण्यं भजते तस्य हेतुं शृणु सलक्षणम्।

पाण्डुरोगस्य सामान्यहेतुमाह—

क्षाराम्ललवणात्युष्णविरुद्धासात्म्यभोजनात्।
निष्पावमाषपिण्याकतिलतैलनिषेवणात्।
विदग्धेऽन्ने दिवास्वप्नाद्व्यायामान्मैथुनात्तथा।
प्रतिकर्म्मवैषम्यात्तु वेगानाञ्च विधारणात्।
कामचिन्ताभयक्रोधशोकोपहतचेतसः।

सम्प्राप्तिमाह—

समुद्रिक्तान्तथा पित्तं हृदये समवस्थितम्।
वायुना बलिना क्षिप्तं स्रोतोभिर्दशभिः सृतम्।
प्रपन्नं केवलं देहं त्वङ्मांसान्तरमाश्रितम्।
प्रदूष्य कफवातासृक्त्वङ्मांसानि करोति तत्।
वर्णान् हरितहारिद्रान् पाण्डून् बहुविधांस्त्वचि।
स पाण्डुरोग इत्युक्तः

पूर्व्वरूपमाह—

तस्य लिङ्गं भविष्यतः।
हृदयस्पन्दनं रौक्ष्यं स्वेदाभावः श्रमस्तथा।

सम्भूतेऽस्मिन् भवेत् सर्व्वः कर्णक्ष्वेड़ो हतानलः ।
दुर्व्वलः सदनोऽन्निद्रश्रमभ्रमनिपीड़ितः ।
गात्रशूलज्वरश्वासगौरवारुचिमान् नरः ।
मृदितैरिव गात्रैश्च पीड़ितैर्मथितैरिव ।
शूनाक्षिकूटो हरितः शीर्णलोमा हतप्रभः ।
कोपनः शिशिरद्वेषी निद्रालुः ष्ठीवनोऽल्पवाक् ।
पिण्डिकोद्वेष्टकट्यूरुपादरुक् सदनानि च ।
भवन्त्यारोहणायासो विशेषश्चात्र वक्ष्यते ।

वातजपाण्डुरोगस्य निदानविशेषं लक्षणञ्चाह—

आहारैरुपचारैश्च वातलैः कुपितोऽनिलः ।
जनयेत् कृष्णपाण्डुत्वं तथा रुक्षारुणाङ्गताम् ।
अङ्गमर्द्दं रुजं तोदं कम्पं पार्श्वशिरोरुजम् ।
शकृच्छोषास्यवैरस्यशोफानाहवलक्षयान् ।

पित्तजपाण्डुरोगस्य निदानविशेषं लक्षणञ्चाह—

पित्तलस्याचितं पित्तं यथोक्तैः स्वैः प्रकोपनैः ।
दूषयित्वा तु रक्तादीन् पाण्डुरोगाय कल्पते ।
स पीतो हरिताभो वा ज्वरदाहसमन्वितः ।
तृष्णामूर्च्छापरीतस्तु पीतमूत्रशकृन्नरः ।
स्वेदनः शीतकामश्च न चान्नमभिनन्दति ।
कटुकास्यो नचास्योष्णमुपशेतेऽम्लमेव वा ।
उद्गारोऽम्लो विदाहश्च विदग्धेऽन्नेऽस्य जायते ।
दौर्गन्ध्यं भिन्नवर्चस्त्वं दौर्व्वल्यं तम एव च ।

निदानसंप्राप्तिपूर्व्वकं श्लेष्मजपाण्डुरोगस्य लक्षणमाह—

विवृद्धैः श्लेष्मलैः श्लेष्मा पाण्डुरोगं स पूर्व्ववत् ।
करोति गौरवं तन्द्रां छर्द्दिं श्वेतविभासताम् ।
प्रसेकं लोमहर्षञ्च सादं मूर्च्छां भ्रमं क्लमम् ।
श्वासकासौ तथालस्य मरुचिं वाक्स्वरग्रहम् ।
शुक्लमूत्राक्षिवर्च्चस्त्वं कटुरुक्षोष्णकामिता ।
श्वयथुर्मधुरास्यत्वमिति पाण्डूामयः कफात् ।

प्रकृतिसमसवायारब्धस्य त्रिदोषजपाण्डुरोगस्य निदानलक्षणे चातिदेशेनाह—

सर्व्वान्नसेविनः सर्व्वे दुष्टा दोषा स्त्रिदोषजम् ।
त्रिदोषलिङ्गं कुर्व्वन्ति पाण्डुरोगं सुदुःसहम् ।

मृद् यथादोष प्रकोपद्वारेण पाण्डुरोगं जनयति तदाह—

मृत्तिकादनशीलस्य कुप्यत्यन्यतमो मलः ।
कषाया मारुतं पित्तं ऊषरा मधुरा कफं ।
कोपयेन्मृद्रसादींश्च रौक्ष्याद्भुक्तञ्च रुक्षयेत् ।
पूरयत्यविपक्वैव स्रोतांसि निरुणद्ध्यपि ।
इन्द्रियाणां बलं हत्वा तेजो वीर्य्यौजसी तथा ।
पाण्डुरोगं करोत्याशु बलवर्णाग्निनाशनं ।
शूनाक्षिकूटगण्डभ्रूः शूनपान्नाभिमेहनः ।
पुरीषं क्रिमिमन्मुञ्चेत् भिन्नं सासृक् कफं नरः ।

असाध्यलक्षणमाह ।

पाण्डुरोगश्चिरोत्पन्नः खरीभूतो न सिध्यति ।
कालप्रकर्षाच्छूनानां यो वा पीतानि पश्यति ।

वद्धाल्पविट् सहरितं सकफं योऽतिसार्य्यते ।
दीनः श्वेतातिदिग्धाङ्गश्छर्द्दिमूर्च्छातृड़र्द्दितः ।
स नास्त्यसृक् चयाद् यश्च पाण्डुः श्वेतत्व माप्नुयात् ।
पाण्डुदन्तनखो यस्तु पाण्डुनेत्रश्च यो भवेत् ।
पाण्डु-संघातदर्शी च पाण्डुरोगी विनश्यति ।
अन्तेषु शूनं परिहीनमध्यं म्लानन्तथान्तेषु च मध्यशूनं ।
गुदे च शेफस्यथ मुष्कयोश्च शूनं प्रताम्यन्तमसंज्ञकल्पं ।
विवर्ज्जयेत् पाण्डुकिनं यशोऽर्थी तथातिसारज्वरपीड़ितञ्च ।

पाण्डुरोगावस्थायां कामलामाह—

पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते ।
तस्य पित्तमसृक् मांसं दग्ध्वा रोगाय कल्पते ।
हारिद्रनेत्रः स भृशं हारिद्रत्वङ्नखाननः ।
रक्तपीतशकृन्मूत्रो भेकवर्णो हतेन्द्रियः ।
दाहाविपाकदौर्व्वल्यं सदनारुचिकर्षितः ।
कामला बहुपित्तैषा कोष्ठशाखाश्रया मता ।

पाण्डुरोगं विनापि भवतीत्याह—

भवेत् पित्तोल्वणस्यासौ पाण्डुरोगादृतेऽपि च ।

कोष्ठश्रितां कामलामाह—

तत्र कोष्ठाश्रितायान्तु कामलायां विशेषतः ।
तिलपिष्टनिभं वर्च्चस्तदा सृजति कामली ।
रुद्धमार्गं यदा पित्तं श्लेष्मणा कुपितेन हि ।

शाखाश्रितां कामलामाह—

शाखास्थायाः कामलायाः शृणु मे हेतुलक्षणम्

रूक्षशीतगुरुस्वादुव्यवायैर्वेगनिग्रहैः।
कफ-संमूर्च्छितो वायुः स्थानात् पित्तं क्षिपेद्बहिः।
हारिद्रमूत्रनेत्रत्वक् श्वेतवर्चास्तदा नरः।
भवेत् साटोपविष्टम्भो गुरुणा हृदयेन च।
दौर्ब्बल्याल्पाग्निपार्श्वार्त्तिहिक्काश्वासारुचिज्वरैः।
क्रमेणाल्पे न सज्ये त पित्ते शाखासमाश्रिते।

कामलाया अवस्थान्तरं कुम्भकामलामाह—

कालान्तरात् खरीभूता कृच्छ्रा स्यात् कुम्भकामला।
कृष्णपीतशकृन्मूत्रो भृशं शूनश्च मानवः।
सरक्ताक्षिमुखच्छर्द्दिविन्मूत्रो यश्च ताम्यति।
दाहारुचितृड़ानाह तन्द्रामोहसमन्वितः।
नष्टाग्निसंज्ञः क्षिप्रं हि कामलावान्विपद्यते।
छर्द्यरोचकहृल्लासज्वरक्लमनिपीड़ितः।
नश्यति श्वासकासार्त्तो विड्भेदी कुम्भकामली।

हलीमकलक्षणमाह—

यदा तु पाण्डोर्व्वर्णः स्याद्धरितः श्यावपीतकः।
बलोत्साहक्षयस्तन्द्रा मन्दाग्नित्वं मृदुज्वरः।
स्त्रीष्वहर्षो ऽङ्गमर्द्दश्च दाहस्तृष्णारुचिर्भ्रमः।
हलीमकं तदा तस्य विद्यादनिलपित्ततः।

रक्तपित्ताधिकारः।

रक्तपित्तहेतुं संप्राप्तिञ्चाह—

घर्मव्यायामशोकाध्वव्यवायैरतिसेवितैः।
तीक्ष्णोष्णक्षारलवणैरम्लैः कटुभिरेव च।
पित्तं विदग्धं स्वगुणैर्विदहत्याशु शोणितं।

सोपपत्तिकं रक्तपित्तस्य निरुक्तिमाह—

पित्तं रक्तस्य विकृतेः संसर्गाद्दूषणादपि।
गन्धवर्णानुवृत्तेश्च रक्तेन व्यपदिश्यते।

ऊर्द्धाधः प्रवृत्तस्य रक्तपित्तस्य मार्गं दर्शयति—

ततः प्रवर्त्तते रक्तमूर्द्धञ्चाधो द्विधापि वा।
ऊर्द्धं नासाक्षिकर्णास्यैर्मेढ्रयोनिगुदैरधः।
कुपितं रोमकूपैश्च समस्तैस्तत् प्रवर्त्तते।

यथोर्द्धमधो वा द्विधा वा प्रवर्त्तते तथा दर्शयन्नाह—

आमाशयाद् व्रजेदूर्द्धमधः पक्वाशयाद् व्रजेत्।
विदग्धयोर्द्वयोश्चापि द्विधाभागं प्रवर्त्तते।
केचित् सयकृतः प्लीह्नः प्रवदन्त्यसृजो गतिम्।

पूर्व्वरूपाण्याह—

सदनं शीतकामित्वं कण्ठधूमायनं वमिः।
लोहलोहितमत्स्यामगन्धास्यत्वं स्वरक्षयः।
शिरोगुरुत्वमरुचिः कासःश्वासोभ्रमः क्लमः।
नीललोहितपीतानां वर्णानामविवेचनम्।
स्वप्ने तद्वर्णदर्शित्वं भवत्यस्मिन् भविष्यति।

कफजरक्तपित्तलक्षणमाह—

सान्द्रं सपाण्डुसस्नेहं पिच्छिलञ्च कफान्वितं।

वातज रक्तपित्तलक्षणमाह—

श्यावारुणं सफेनञ्च तनु रूक्षञ्च वातिकं।

पैत्तिकरक्तपित्तलक्षणमाह—

रक्तपित्तं कषायाभं कृष्णं गोमूत्रसन्निभं।
मेचकागारधूमाभ मञ्जनाभञ्च पैत्तिकं।

संसृष्टस्य तथा सन्निपातस्य रक्तपित्तस्य लक्षणमतिदिशन्नाह—

संसृष्टलिङ्गं संसर्गात्त्रिलिङ्गं सान्निपातिकं।

मार्गविशेषकृतस्य कफादिसम्बन्धस्य प्रतिपादनार्थमाह—

ऊर्द्ध्वगं कफसंसृष्ट मधोगं पवनानुगं।
द्विमार्गं कफवाताभ्या मुभाभ्या मनुवर्त्तते। *

मार्गभेदेन साध्यासाध्यत्वमाह—

ऊर्द्ध्वं साध्य मधो याप्य मसाध्यं युगपद्गतं।

साध्यत्वमाह—

एकमार्गं बलवतो नातिवेगं नवोत्थितं।
रक्तपित्तं सुखे काले साध्यं स्यान्निरुपद्रवं।

---

* अत्रातीवसुलभप्रतीतिश्चरकोक्तिर्यथा—"मार्गौ पुनरस्य द्वौ—ऊर्द्ध्वञ्चाधश्च तद्बहुश्लेष्मणि शरीरे श्लेष्मसंसर्गादूर्द्ध्वं प्रपद्यमानं कर्णनासिकानेत्रास्येभ्यः प्रच्यवते। बहुवाते तु शरीरे वातसंसर्गादधः प्रपद्यमानं मूत्रपुरीषमार्गाभ्यां प्रच्यवते। बहुवातश्लेष्मणि तु शरीरे वातश्लेष्मसंसर्गाद्द्वावपि मार्गौ प्रपद्यते। तौ मार्गौ प्रपद्यमानं सर्व्वेभ्य एव यथोक्तेभ्यः खेभ्यः प्रच्यवते शरीरस्य।

दोषावस्थाभेदेन साध्यासाध्ययाप्यत्वमाह—

एकदोषानुगं साध्यं द्विदोषं याप्यमुच्यते ।
यत्त्रिदोषमसाध्यं स्यान्मन्दाग्ने रतिवेगवत् ।
व्याधिभिः क्षीणदेहस्य वृद्धस्यानश्नतश्च यत् ।
यच्चोभयाभ्यां मार्गाभ्यामतिमात्रं प्रवर्त्तते ।
तुल्यं कुणपगन्धेन रक्तं कृष्णमतीव च ।
क्षीणस्य कासमानस्य यच्च तच्च न सिध्यति ।
यद्द्विदोषानुगं यद्वा शान्तं शान्तं प्रकुप्यति ।
मार्गान्मार्गं चरेद् यद्वा याप्यं पित्तमसृक् च तत् ।

रक्तपित्तस्योपद्रवमाह—

दौर्ब्बल्यं श्वासकासज्वरवमथुमदाः पाण्डुतादाहमूर्च्छाः
भुक्ते घोरो विदाहस्त्वधृतिरपि सदा हृद्यतुला च पीड़ा ।
तृष्णा कोष्ठस्य भेदः शिरसि च तपनं पूतिनिष्ठीवनत्वं ।
भक्तद्वेषाविपाकौ विकृतिरपि भवेत् रक्तपित्तोपसर्गाः ।

वर्ज्जनीयस्य लक्षणमाह—

मांसप्रक्षालनाभं क्वथितमिव च यत् कर्द्दमाम्भोनिभञ्चा
मेदःपूयास्रकल्पं यकृदिव यदि वा पक्वजम्बूफलाभं ।
यत् कृष्णं यच्च नीलं भृशमति कुणपं यत्र चोक्ता विकारा ।
स्तद्वर्ज्ज्यं रक्तपित्तं सुरपतिधनुषा यच्च तुल्यं विभाति ।

अपरमसाध्यलक्षणमाह—

येन चोपहतो रक्तं रक्तपित्तेन मानवः ।
पश्येद्दृश्यं वियच्चापि तच्चासाध्यमसंशयम् ।

लोहितं छर्द्दयेद्यस्तु बहुशो लोहितेक्षणः।
लोहितोद्गारदर्शी च म्रियते रक्तपैत्तिकः।

राजयक्ष्माधिकारः।

यक्ष्मणो निरुक्तिं प्रागुत्पत्तिञ्चाह—

यस्मात् स राज्ञः प्रागासीद्राजयक्ष्मा ततो मतः।
स यक्ष्मा हुङ्कृतोऽश्विभ्यां मानुषं लोकमागतः।
लब्ध्वा चतुर्विधं हेतुं समाविशति मानवम्।

यक्ष्मणो हेतुचतुष्टयमाह—

अयथाबलमारम्भं वेगसन्धारणं क्षयम्।
यक्ष्मणः कारणं विद्याच्चतुर्थं विषमाशनं।

यक्ष्मण स्त्रिदोषजत्वमाह—

एक एव मतः शोषः सन्निपातात्मको ह्यतः।
उद्रेकात्तत्र लिङ्गानि दोषाणां निपतन्ति हि।

यक्ष्मपूर्व्वरूपमाह—

कासाङ्गमर्द्दकफसंस्रवतालुशोष-
वम्यग्निसादमदपीनसकासनिद्राः।
शोषे भविष्यति भवन्ति स चापि जन्तुः
शुक्लेक्षणो भवति मांसपरो रिरंसुः॥
स्वप्नेषु काकशुकशल्लकिनीलकण्ठा
गृध्रा स्तथैव कपयः कृकलासकाश्च।

तं बाहयन्ति स नदी विजलाश्च पश्ये-
च्छुष्कां स्तरून् पवनधूमदवार्दितांश्च। (क)

तत्र साहसिकं यक्ष्माणमाह—

युद्धाध्ययनभाराध्वलङ्घनप्लवनादिभिः।
पतनैरभिघातैर्वा साहसैर्वा तथापरैः।
अयथाबलमारम्भैर्जन्तोरुरसि विक्षते।
वायुःप्रकुपितो दोषावुदीर्य्योभौ विधावति।

साहसजस्य यक्ष्मण एकादशरूपाण्याह—

स शिरःस्थः शिरःशूलं करोति गलमाश्रितः।
कण्ठोद्धंसञ्च कासञ्च स्वरभेद मरोचकम्।
पार्श्वशूलञ्च पार्श्वस्थो वर्च्चोभेदं गुदे स्थितः।
जृम्भां ज्वरञ्च सन्धिस्थ उरस्थश्चोरसो रुजम्।
क्षणनाच्चोरसो रक्तं कासमानः कफानुगम्।
जर्ज्जरेणोरसा क्रच्छ्रमुरःशूली निरस्यति।
इति साहसिकं यक्ष्मा रूपैरेतैः प्रपद्यते।

(क) **प्रपूत्तिः**—पूर्वरूपं प्रतिश्यायो दौर्बल्यं दोषदर्शनम्। अदोषेष्वपि भावेषु काये वीभत्सदर्शनम्! घृणित्व मश्नतश्चापि बलमांसपरिक्षयः। स्त्रीमद्यमांस-प्रियता प्रियताचावगुण्ठने। मक्षिकाघुणकेशानां तृणानां पतनानि च। प्रायोऽन्नपाने केशानां नखानाञ्चाभिवर्द्धनम्। पतत्त्रिभिः पतङ्गैश्चश्वापदैश्चाभिधर्षणम्। स्वप्ने केशास्थि-राशीनां भस्मनश्चाधिरोहणम्। जलाशयानां शैलानां वनानां ज्योतिषामपि। शुष्यतां क्षीयमानानां पततां यच्च दर्शनम्। प्राग्रूपं बहुरूपस्य तज्ज्ञेयं राजयक्ष्मणः।

वेगसन्धारणजं यक्ष्माणमाह—

ह्रीमत्वाद्वा घृणित्वाद्वा भयाद्वा वेगमागतम् ।
वातमूत्रपुरीषाणां निगृह्णाति यदा नरः ।
तदा वेगप्रतीघातात् वातपित्ते समीरयन् ।
ऊर्द्ध्वं तीर्य्यगधः कुर्य्याद्विकारान् कुपितोऽनिलः ।

वेगरोधजस्य यक्ष्मण एकादशरूपाण्याह—

प्रतिश्यायश्च कासश्च स्वरभेदमरोचकम् ।
पार्श्वशूलं शिरःशूलं ज्वरमंसावमर्द्दनं ।
अङ्गमर्द्दं मुहुश्छर्द्दिर्वर्च्चोभेदं त्रिलक्षणम् ।
रूपाण्येकादशैतानि यक्ष्मा यैरुच्यते महान् ।

क्षयजं यक्ष्माणमाह—

हर्षोत्कण्ठाभयत्रासक्रोधशोकातिकर्षणात् ।
व्यवायानशनाभ्याञ्च शुक्रमोजश्च हीयते ।
ततः स्नेहक्षयाद्वायुर्वृद्धो दोषानुदीरयन् ।

क्षयजस्य यक्ष्मण एकादशरूपाण्याह—

प्रतिश्यायं ज्वरं कासमङ्गमर्द्दं शिरोरुजम् ।
श्वासं विड्भेदमरुचिं पार्श्वशूलं स्वरक्षयम् ।
करोति चांससन्ताप मेकादश मिहाङ्गहृत् ।
लिङ्गान्याविदयन्त्येतानेकादशमहागदम् ।
संप्राप्तं राजयक्ष्माणं क्षयात् प्राणक्षयप्रदम् ।

विषमाशनजं यक्ष्माणमाह—

विविधान्यन्नपानानि वैषम्येन समश्नतः ।
जनयन्त्यामयान् घोरान् विषमान् मारुतादयः ।

स्रोतांसि रुधिरादीनां वैषम्याद्विषमं गता: ।
रुध्वा रोगाय कल्पन्ते पुष्यन्ति न च धातव: ।

विषमाशनजस्य यक्ष्मण एकादशरूपाण्याह—

प्रतिश्यायं प्रसेकञ्च कासं छर्द्दिमरोचकम् ।
ज्वरमंसाभितापञ्च छर्द्दनं रुधिरस्य च ।
पार्श्वशूलं शिर:शूलं स्वरभेदमथापि वा ।
कफपित्तानिलकृतं लिङ्गं विद्याद् यथाक्रमम् ।

हेतुलक्षणनिर्देशमुपसंहरन्नाह—

इति व्याधिसमूहस्य रोगराजस्य हेतुजम् ।
रूपमेकादशविधम् हेतुश्चोक्तश्चतुर्विध: ।

स्वस्थस्य धातुपोषणप्रकारमाह—

यथास्वेनोष्मणा पाकं शारीरा यान्ति धातव: ।
स्रोतसा च यथास्वेन धातु: पुष्यति धातुना ।

धातुक्षयविवरणं साधारणसंप्राप्तिञ्चाह—

स्रोतसां सन्निरोधाच्च रक्तादीनाञ्च संक्षयात् ।
धातूष्मणाञ्चापचयाद्राजयक्ष्मा प्रवर्त्तते ।
तस्मिन् काले पचत्यग्नि र्यदन्नं कोष्ठमाश्रितम् ।
मलीभवति तत् प्राय: कल्पते किञ्चिदोजसे ।
रस: स्रोत:सु रुद्धेषु स्वस्थानस्थो विदह्यते ।
स ऊर्द्ध्वं कासवेगेन बहुरूप: प्रवर्त्तते ।

सामान्येन यक्ष्मण एकादशरूपाणि षड्रूपाणि चाह—

जायन्ते व्याधयश्चात: षड़ेकादशवा पुन: ।

येषां सङ्घातयोगेन राजयक्ष्मेति कल्प्यते ।
कासोऽंसतापो वैस्वर्य्यं ज्वरः पार्श्वशिरोरुजः ।
शोणितश्लेष्मणश्छर्दिः श्वासः कोष्ठामयोऽरुचिः ।
रूपाण्येकादशैतानि यक्ष्मिणः षड़िमानि वा ।
कासोज्वरः पार्श्वशूलं स्वरवर्च्चो गदोऽरुचिः ।

साध्यासाध्यत्वमाह—

सर्व्वैरर्द्धैस्त्रिभिर्वापि लिङ्गै र्मांसबलक्षये ।
युक्तोवर्ज्ज्यश्चिकित्स्यस्तु सर्व्वरूपोऽप्यतोऽन्यथा ।

एकादशरूपाणि विवृणोति—

घ्राणमूले स्थितः श्लेष्मा रुधिरं पित्तमेव वा ।
मारुताध्मातशिरसोमारुतं श्यायते प्रति ।
प्रतिश्यायस्ततो घोरो जायते देहकर्षणः ।
पिच्छिलं बहुलं विस्रं हरितं श्वेतपीतकम् ।
कासमानो रसं यक्ष्मी निष्ठीवति कफानुगम् ।
अंसपार्श्वाभितापश्चतापः पादकरस्य च ।
ज्वरः सर्व्वाङ्गगश्चेति लक्षणं राजयक्ष्मणः ।
वातात् पित्तात् कफाद्रक्तात् कासवेगात् सपीनसात् ।
स्वरभेदो भवेद् वाताद्रुक्षः क्षाम स्वलः खरः ।
तालुकण्ठपरिप्लोषः पित्ताद्वक्तमसूयते ।
कफान्मन्दो विवद्धश्च स्वरः खुरुखुरायते ।
सन्नोरक्तविवन्धत्वात् स्वरः कृच्छ्रात् प्रवर्त्तते ।
कासातिवेगात् करुणः पीनसात् कफवातिकः ।

पार्श्वशूलन्त्वनियतं सङ्कोचायामलक्षणम्।
शिरःशूलं ससन्तापं यक्ष्मिणः स्यात् सगौरवम्।
अतिखिन्ने शरीरे तु यक्ष्मिणो विषमाशनात्।
कण्ठात् प्रवर्त्तते रक्तं श्लेष्माचोत्क्लिष्टसञ्चितः।
रक्तं विवद्धमार्गत्वात् मांसादीन् नानुपद्यते।
आमाशयस्थमुत्क्लिष्टं बहुत्वात् कण्ठमेति वा।
वातश्लेश्मविवन्धत्वादुरसः श्वासमृच्छति।
दोषैरुपहते चाग्नौ सपिच्छमतिसार्य्यते।
पृथग्दोषैः समस्तैर्व्वा जिह्वाहृदयसंश्रितैः।
जायतेऽरुचिराहारे दुष्टैरर्थैश्च मानसैः।

असाध्यलक्षणमाह—

महाशनं क्षीयमानमतीसारनिपीड़ितं।
शूनमुष्कोदरञ्चैव यक्ष्मिणं परिवर्ज्जयेत्।
शुक्लाक्ष मन्नद्वेष्टारमूर्द्ध्वश्वासनिपीड़ितं।
कृच्छ्रेण बहुमेहन्तं यक्ष्मा हन्तीह मानवं।

चिकित्सायोग्यत्वमाह—

ज्वरानुबन्धरहितं बलवन्तं क्रियासहम्।
उपक्रमेदात्मवन्तं दीप्ताग्निमकृशं नरं।

धातुक्षय-क्षतक्षीणाधिकारः।

व्यवायादिजनितधातुक्षयानां राजयक्ष्मत्वं निरसन्नाह—

व्यवायशोकवार्द्धक्यव्यायामाध्वोपवासतः।
व्रणोरःक्षतपीड़ाभ्यां शोषानन्ये वदन्ति हि।
केषाञ्चिदेव शोषोहि कारणैर्भेदमागतः।
न तत्र दोष लिङ्गानां समस्तानां निपातनम्।
क्षया एव हि ते ज्ञेयाः प्रत्येकं धातुसंक्षयात्।

व्यवायशोषलक्षणमाह—

व्यवायशोषी शुक्लाक्षः क्षयलिङ्गैरुपद्रुतः।
पाण्डुदेहो यथापूर्व्वं क्षीयन्ते चास्य धातवः।
प्रध्यानशीलः स्रस्ताङ्गः शोकशोष्यपि तादृशः।

जराशोषलक्षणमाह—

जराशोषी कृशो मन्दः स्वल्पबुद्धिबलेन्द्रियः।
कम्पनोऽरुचिमान् भिन्नकांस्यपात्रहतः स्वरः।
ष्ठीवति श्लेष्मणा हीनं गौरवारतिपीड़ितः।
संप्रस्रुतास्यनासाक्षः शुष्करुक्षमलच्छविः।

अध्वशोषलक्षणमाह—

अध्वशोषी च स्रस्ताङ्गः संभृष्टपरुषच्छविः।
प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः।

व्यायामशोषलक्षणमाह—

व्यायामशोषी भूयिष्ठ मेभिरेव समन्वितः।
लिङ्गैरुरःक्षतकृतैः संयुक्तश्च क्षतं विना॥

व्रणशोषलक्षणमाह—

रक्तक्षयाद्वेदनाभि स्तथैवाहारयन्त्रणात्।
व्रणितस्य भवेच्छोषः स चासाध्यतमो मतः।

क्षतनिदानमाह—

धनुषाऽऽयास्यतोऽत्यर्थं भारमुद्वहतो गुरु ।
युध्यमानस्य बलिभिः पततो विषमोच्चतः।
वृषं हयं वा धावन्तं दम्यं वान्यं निगृह्णतः।
शिलाकाष्ठाश्मनिर्घातान् क्षिपतो निघ्नतः परान्।
अधीयानस्य वात्युच्चै दूरं वा व्रजतो द्रुतं।
महानदीर्वा तरतो हयैर्वा सह धावतः।
सहसोत्पततो दूरं तूर्णं चाति प्रनृत्यतः।
तथान्यैः कर्म्मभिः क्रूरैर्भृशमभ्याहतस्य वा।
विक्षते वक्षसि व्याधि र्बलवान् समुदीर्य्यते।
स्त्रीषु चातिप्रसक्तस्य रूक्षाल्पप्रमिताशिनः।

तस्य लक्षणमाह—

उरो विरुज्यतेऽत्यर्थं भिद्यतेऽथविभज्यते।
प्रपीड्यते ततः पार्श्वे शुष्यत्यङ्गं प्रवेपते।
क्रमाद्वीर्य्यं बलं वर्णोरुचिरग्निश्च हीयते।
ज्वरो व्यथा मनोदैन्यं विड्भेदाग्निवधावपि।
दुष्टः श्यावः सुदुर्गन्धः पीतो विग्रथितो बहुः।
कासमानस्य चाभीक्ष्णं कफः सासृक्प्रवर्त्तते।
स क्षतः क्षीयतेऽत्यर्थं तथा शुक्रौजसोः क्षयात्।

पूर्व्वरूपमाह—

अव्यक्तलक्षणं तस्य पूर्व्वरूपमिति स्मृतं।

क्षतक्षीणयोर्विशिष्टलक्षणमाह—

उरोरुक् शोणितच्छर्द्दिः कासोवैशेषिकः क्षते।
क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटिग्रहः।

अवस्थाविशेषेण साध्यासाध्ययाप्यत्वमाह—

अल्पलिङ्गस्य दीप्ताग्नेः साध्योबलवतो नवः।
परिसंवत्सरो याप्यः सर्व्वलिङ्गन्तु वर्ज्जयेत्।

कासाधिकारः।

काससामान्यहेतुं संप्राप्तिञ्चाह—

१ धूमोपघाताद्रजसस्तथैव। व्यायामरूक्षान्न निषेवनाच्च।
विमार्गगत्वाच्च हि भोजनस्य। वेगावरोधात् क्षवथो स्तथैव।
प्राणोह्युदानानुगतः प्रदुष्टः। संभिन्नकांस्यस्वनतुल्यघोषः।
निरेति वक्त्रात् सहसा सदोषो। मनोषिभिः कास इति प्रदिष्टः।

काससंप्राप्तेरभेदात् कथं कासवेदनाशब्दानामनेकरूपतेत्याह—

हेतुभेदात् प्रतीघातभेदो वायोः सरंहसः।
यद्रुजाशब्दवैषम्यं कासानामुपजायते।

काससंख्यामाह—

पञ्चकासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः।
क्षयायोपेक्षिताः सर्व्वे बलिनश्चोत्तरोत्तरं।

कासपूर्व्वरूपमाह—

पूर्व्वरूपं भवेत्तेषां शूकपूर्णगलास्यता ।
कण्ठे कण्डूश्च भोज्याना मवरोधश्च जायते ।

वातकासनिदानविशेषमाह—

रूक्षशीतकषायाल्पप्रमितानशनं स्त्रियः ।
वेगधारणमायासो वातकासप्रवर्त्तकाः ।

वातकासलक्षणमाह—

हृच्छङ्खमूर्द्धोदरपार्श्वशूली क्षामाननः क्षीणबलस्वरौजाः ।
प्रसक्तवेगस्तु समीरणेन भिन्नस्वरः कासति शुष्कमेव ।

पित्तकासनिदानविशेषमाह—

कटुकोष्णविदाह्यम्ल क्षाराणामतिसेवनम् ।
पित्तकासकरं क्रोधः सन्तापश्चाग्निसूर्य्यजः ।

पित्तकासलक्षणमाह—

उरोविदाहज्वरवक्त्रशोषैरभ्यर्द्दितस्तिक्तमुखस्तृषार्त्तः ।
पित्तेन पीतानि वमेत् कटूनि कासेत् सपाण्डुः परिदह्यमानः (क)

कफकासनिदानविशेषमाह—

गुर्व्वभिष्यन्दिमधुरस्निग्धस्वप्नाविचेष्टनैः ।
वृद्धः श्लेष्मानिलं रुद्ध्वा कफकासं करोति हि ।

कफकासलक्षणमाह—

प्रलिप्यमानेन मुखेन सीदन् शिरोरुजार्त्तः कफपूर्णदेहः ।

(क) प्रपूर्त्तिः—प्रततं कासमानश्च ज्योतींषीव च पश्यति । श्लेष्माणं पित्त-संसृष्टं निष्ठीवति च पैत्तिकी ।

अभक्तरुग्गौरवकण्डुयुक्तः कासेऽङ्कृशं सान्द्रकफः कफेन। (ख)

क्षतजकासस्य निदानसम्प्राप्तीआह—

अतिव्यवायभाराध्वयुद्धाश्वगजविग्रहैः।
रूक्षस्योरःक्षतं वायुर्गृहीत्वा कासमाचरेत्।

तस्य लक्षणमाह—

स पूर्व्वं कासते शुष्कं ततःष्ठीवेत् सशोणितं।
कण्ठेन रुजतात्यर्थं विरुग्णेनेव चोरसा।
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना।
दुःखस्पर्शेन शूलेन भेदपीड़ाभितापिना।
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यपीड़ितः।
पारावत इवाकूजन् कासवेगात् क्षतोद्भवात्।

शुक्रक्षयजकासनिदानमाह—

विषमासात्म्यभोज्यातिव्यवायाद्वेगनिग्रहात्।
घृणिनां शोचतां नृणां व्यापन्नेऽग्नौ त्रयोमलाः।
कुपिताः क्षयजं कासं कुर्य्युर्देहक्षयप्रदं।

तस्य लक्षणमाह—

दुर्गन्धं हरितं रक्तं ष्ठीवेत् पूयोपमं कफम्।
स्थानादुत्कासमानस्य हृदयं मन्यते च्युतम्।
अकस्मादुष्णशीतार्त्तो बह्वाशी दुर्व्वलः कृशः।

(ख) प्रपूर्त्तिः—बहुलं मधुरं स्निग्धं निष्ठीवति घनं कफम्। कासमानो ऽतिरुग्वक्षः सम्पूर्णमिव मन्यते।

ज्वरोमिथ्याकृतिस्तस्य पार्श्वरुक् पीनसोऽरुचिः ।
भिन्नसङ्घातवर्च्चस्त्वं स्वरभेदोऽनिमित्ततः ।

अवस्थाविशेषेण चतक्षयजयोः कासयोः साध्यत्वं याप्यत्वञ्चाह—

इत्येषः क्षयजः कासः क्षीणानां देहनाशनः ।
साध्यो बलवतां वा स्याद्याप्यस्त्वेवं क्षतोत्थितः ।
नवौ कदाचित् सिध्येतामपि पादगुणान्वितौ ।

जरानिमित्तधातुक्षयजस्य कासस्य याप्यत्वमाह—

स्थविराणां जराकासः सर्व्वो याप्यः प्रकीर्त्तितः ।
त्रीन् पूर्व्वान् साधयेत् साध्यान् पथ्यैर्याप्यांस्तु यापयेत् ।

श्वासहिक्काधिकारः ।

श्वासहिक्कासाधारणनिदानमाह—

विदाहिगुरुविष्टम्भिरुक्षाभिष्यन्दिभोजनैः ।
शीतपानाशनस्थानरजोधूमातपानिलैः ।
व्यायामकर्म्मभाराध्ववेगाघातापतर्पणैः ।
आमप्रदोषादानाहरुक्षान्नविषमाशनात् ।
दौर्व्वल्यान्मर्म्मणो घाताद्द्वन्द्वात् शुद्ध्यतियोगतः ।

येभ्योरोगेभ्यश्च हिक्काश्वासौ प्रवर्त्तेते तानाह—

अतीसारज्वरच्छर्द्दिप्रतिश्यायक्षयक्षतात् ।
रक्तपित्तादुदावर्त्तादिविसूच्यलसकादपि ।
पाण्डुरोगाद्विषाच्चैव प्रवर्त्तेते गदाविमौ ।

श्वासस्य विशेषनिदानं संप्राप्तिञ्चाह—

कासवृद्ध्या भवेच्छ्वासः पूर्व्वैर्वा दोषकोपणैः ।
कफोपरुद्धगमनः पवनोविष्वगास्थितः ।
प्राणोदकान्नवाहीनि दुष्टः स्रोतांसि दूषयन् ।
उरःस्थः कुरुते श्वासमामाशयसमुद्भवम् ।

श्वासस्य निरुक्तिमाह—

विहाय प्रकृतिं वायुः प्राणोऽथ कफसंयुतः ।
श्वासयत्यूर्द्ध्वगोभूत्वा तं श्वासं परिचक्षते ।

श्वासस्य भेदानाह—

महोर्द्ध्वच्छिन्नतमकक्षुद्रभेदैस्तु पञ्चधा ।
भिद्यते स महाव्याधिः श्वास एको विशेषतः ।

श्वासस्य पूर्वरूपाण्याह—

प्राग्रूपं तस्य हृत्पीड़ा शूलमाध्मान मेव च ।
आनाहो वक्त्रवैरस्यं शङ्खनिस्तोद एव च ।

श्वासस्य संप्राप्तिमाह—

यदा स्रोतांसि संरुध्य मारुतः कफपूर्व्वकः ।
विष्वग् व्रजति संरुद्धस्तदा श्वासान् करोति हि ।

महाश्वासस्य लक्षणमाह—

उद्धूयमानवातो यः शब्दवद्दुःखितो नरः ।
उच्चैः श्वसिति संरुद्धो मत्तर्षभ इवानिशं ।
प्रनष्टज्ञानविज्ञान स्तथा विभ्रान्तलोचनः ।
विवृताच्याननो बद्धमूत्रवर्च्चा विशीर्णवाक् ।

दीनः प्रश्वसितञ्चास्य दूराद्विज्ञायते भृशं।
महाश्वासोपसृष्टस्तु क्षिप्रमेव विपद्यते।

ऊर्द्ध्वश्वासलक्षणमाह—

ऊर्द्ध्वं श्वसिति यो दीर्घं नच प्रत्याहरत्यधः।
श्लेष्मावृतमुखस्रोतः क्रुद्धगन्धवहार्द्दितः।
ऊर्द्ध्वदृष्टिर्विपश्यंस्तु विभ्रान्ताक्ष इतस्ततः।
प्रमुह्यन् वेदनार्त्तश्च शुष्कास्योऽरतिपीड़ितः।
ऊर्द्ध्वश्वासे प्रकुपिते ह्यधः श्वासो निरुध्यते।
मूह्यतस्ताम्यतश्चोर्द्ध्वं श्वासस्तस्यैव हन्त्यसून्।

छिन्नश्वासस्य लक्षणमाह—

यस्तु श्वसिति विच्छिन्नं सर्व्वप्राणेन पीड़ितः।
न वा श्वसिति दुःखार्त्तो मर्म्मच्छेदरुगर्द्दितः।
आनाहस्वेदमूर्च्छार्त्तो दह्यमानेन वस्तिना।
विप्लुताक्षः परिक्षीणः श्वसन् रक्तैकलोचनः।
विचेताः परिशुष्कास्यो विवर्णः प्रलपन्नरः।
छिन्नश्वासेन विच्छिन्नः स शीघ्रं विजहात्यसून्।

तमकश्वासस्य निदानसंप्राप्ती आह—

प्रतिलोमं यदा वायुः स्रोतांसि प्रतिपद्यते।
ग्रीवां शिरश्च संगृह्य श्लेष्माणं समुदीर्य्य च।
करोति पीनसं तेन रुद्धो घुर्घुरकं तथा।
अतीवतीव्रवेगञ्च श्वासं प्राणप्रपीडकं।
प्रताम्यति स वेगेन तृष्यते सन्निरुध्यते।

प्रमोहं कासमानश्च स गच्छति मुहुर्मुहुः।
श्लेष्मण्यमुच्यमाने तु भृशं भवति दुःखितः।
तस्यैव च विमोक्षान्ते मुहूर्त्तं लभते सुखं।
तथास्योद्ध्वंसते कण्ठः कृच्छ्राच्छक्नोति भाषितुं।
न चापि लभते निद्रां शयानः श्वासपीड़ितः।
पार्श्वे तस्यावगृह्णाति शयानस्य समीरणः।
आसीनो लभते सौख्यमुष्णञ्चैवाभिनन्दति।
उच्छ्रिताक्षो ललाटेन स्विद्यता भृशमार्त्तिमान्।
विशुष्कास्यो मुहुःश्वासो मुहुश्चैवावधम्यते।

तमकस्योपशय-साध्यत्वयाप्यत्वान्याह—

मेघाम्बुशीतप्राग्वातैः श्लेष्मलैश्च विवर्द्धते।
स याप्यस्तमकः श्वासः साध्यो वा स्यान्नवोत्थितः।

विशिष्टलक्षणतया तमकस्य संज्ञान्तरमाह—

ज्वरमूर्च्छापरीतस्य विद्यात् प्रतमकन्तु तं।

तमकस्यैवापरहेतुलक्षणञ्चाह—

उदावर्त्तरजोजीर्णक्लिन्नकायनिरोधजः।
तमसा वर्द्धतेऽत्यर्थं शीतैश्चाशु प्रशाम्यति।
मज्जतस्तमसीवास्य विद्यात् सन्तमकन्तु तम्।

क्षुद्रश्वासस्य लक्षणमाह—

किञ्चिदारभमानस्य यस्य श्वासः प्रवर्त्तते।
निषसस्यैति शान्तिञ्च स क्षुद्र इति संज्ञितः।
क्षुद्रश्वासो न सोऽत्यर्थं दुःखेनाङ्गप्रबाधकः।

हिनस्ति न स गात्राणि नच दुःखो यथेतरे ।
न च भोजनपानानां निरुणद्ध्युचितां गतिं ।
नेन्द्रियाणां व्यथां नापि काञ्चिदापादयेद्रुजं ।
स साध्य उक्तो बलिनः सर्वे चाव्यक्तलक्षणाः ।

श्वासानां साध्यत्वासाध्यत्वमाह—

क्षुद्रः साध्योमत स्तेषां तमकः कृच्छ्र उच्यते ।
त्रयः श्वासा न सिध्यन्ति तमको दुर्बलस्य च ।

हिक्कायाः स्वरूपं निर्वचनञ्चाह—

मुहुर्मुहु र्वायुरुदेति सस्वनो
यकृत्प्लीहान्त्राणि मुखादिवाक्षिपन् ।
सघोषवानाशु हिनस्त्यसून् यत
स्ततस्तु हिक्केत्यभिधीयते बुधैः ।

श्वासहिक्कयो र्हेत्वादितुल्यत्वमाह—

श्वासैकहेतुप्राग्रूपसंख्याप्रकृतिसंश्रयाः
हिक्का भवन्ति पञ्चात्र तासां लिङ्गं पृथक् शृणु ।

हिक्कानां नाम दोषसम्पर्कञ्चाह—

अन्नजां यमलां क्षुद्रां गम्भीरां महतीं तथा ।
वायुःकफेनानुगतः पञ्च हिक्काः करोति हि ।

अन्नजां हिक्कामाह—

पानान्नैरतिसंयुक्तैः सहसा पीड़ितोऽनिलः ।
हिक्कयत्यूर्द्ध्वगोभूत्वा तां विद्यादन्नजां भिषक् ।

यमलामाह—

चिरेण यमलैर्वेगै र्या हिक्का संप्रवर्त्तते।
कम्पयन्ती शिरोग्रीवं यमलां तां विनिर्द्दिशेत्॥

क्षुद्रिकालक्षणमाह—

विकृष्टकाले र्या वेगैर्मन्दैः समभिवर्त्तते।
क्षुद्रिका नाम सा हिक्का जत्रुमूलात् प्रधाविता॥

गम्भीरामाह—

नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी।
अनेकोपद्रववती गम्भीरा नाम सा स्मृता।

महाहिक्कामाह—

मर्माण्युत्पीड़यन्तीव सततं या प्रवर्त्तते।
महाहिक्केति सा ज्ञेया सर्वगात्रविकम्पिनी॥

असाध्यलक्षणमाह—

आयम्यते हिक्कतो यस्य देहो
दृष्टिश्चोर्द्ध्वं नाम्यते यस्य नित्यं।
क्षीणोऽन्नद्विट् क्षौति यश्चातिमात्रं
तौ द्वौ चान्त्यौ वर्ज्जयेद्धिक्कमानौ।

अवस्थाविशेषेण सर्वासामसाध्यलक्षणमाह—

अतिसञ्चितदोषस्य भक्तच्छेदकृशस्य च।
व्याधिभिः क्षीणदेहस्य वृद्धस्यातिव्यवायिनः।
आसां या सा समुत्पन्ना हिक्का हन्त्याशु जीवितं॥

यमिका यथा साध्यासाध्या वाख्यात्तदाह—

यमिका च प्रलापार्त्तिमोहतृष्णासमन्विता।
अक्षीणश्चाप्यदीनश्च स्थिरधात्विन्द्रियश्च यः।
तस्य साधयितुं शक्या यमिका हन्त्यतोऽन्यथा।

स्वरभेदाधिकारः।

स्वरभेदस्य निदानपूर्विकां संप्राप्तिमाह—

अत्युच्चभाषणविषाध्ययनाभिघात-
संदूषणैः प्रकुपिताः पवनादयस्तु।
स्रोतःसु ते स्वरवहेषु गताः प्रतिष्ठां
हन्युःस्वरं भवति चापि हि षड् विधः सः।

उक्तं षड् विधत्वं विभजते—

वातादिभिः पृथक् सर्व्वैं र्मेदसा च क्षयेण च।

वातजस्वरभेदमाह—

वातेन कृष्णनयनाननमूत्रवर्च्चाः।
भिन्नं शनै र्वदति गर्द्दभवत् खरञ्च।

पित्तजस्वरभेदमाह—

पित्तेन पीतनयनाननमूत्रवर्च्चाः।
याङ्गलेन स च दाहसमन्वितेन।

कफजस्वरभेदमाह—

ब्रूयात् कफेन सततं कफरुद्धकण्ठः।
स्वल्पं शनैर्वदति चापि दिवा विशेषात्। (क)

त्रिदोषस्वरभेदमाह—

सर्व्वात्मके भवति सर्व्वविकारसम्पत्।
तच्चाप्यसाध्यमृषयः स्वरभेदमाहुः।

क्षयकृतस्वरभेदमाह—

धुप्येत वाक् क्षयकृते क्षयमाप्नुयाच्च।
वागेष चापि हतवाक् परिवर्ज्जनीयः।

मेदोजस्वरभेदमाह—

अन्तर्गतं स्वर मलच्यपद स्थिरेण
मेदोऽन्वयाद्वदति दिग्धगल स्तृषार्त्तः।

असाध्यलक्षणमाह—

क्षीणस्य वृद्धस्य कृशस्य वापि। चिरोत्थितो यश्च सहोपजातः।
मेदस्विनः सर्वसमुद्भवश्च स्वरामयो यो न स सिद्धिमेति।

अरोचकाधिकारः।

अरोचकनिदानमाह—

वातादिभिः शोकभयातिलोभ क्रोधैर्मनोघ्नाशनरूपगन्धैः।
अरोचकाःस्युः

(क) प्रपूर्त्तिः—वातजे स्वरभेदे—"चामीकरचश्चलः स्वरः। शूकपूर्णाभकण्ठत्वं स्निग्धोष्णोपशयोऽनिलात्। पित्तजे—तालुगलयोः शोषः, वक्तुमसमर्थत्वं, कफजे—लिम्पन्निव कफात् कण्ठं मन्दः खुरुखुरायते।

वातजारोचके आस्यवैरस्यलक्षणमाह—

परिहृष्टदन्तः कषायवक्त्रश्च मतोऽनिलेन। (ख)

पित्तारोचके आस्यवैरस्यलक्षणमाह—

कट्वम्लमुष्णं विरसञ्च पूति पित्तेन विद्या

कफारोचके आस्यवैरस्य लक्षणमाह—

ल्लवणञ्च वक्त्रं।

माधुर्य्यपैच्छिल्यगुरुत्वशैत्यविवद्धसंवद्धयुतं कफेन।

आगन्तुरोचके मुखवैरस्यादिकमाह—

अरोचके शोकभयातिलोभ-

क्रोधाद्यहृद्याशुचिगन्धजे स्यात्।

स्वाभाविकञ्चास्य मथारुचिश्च

त्रिदोषजारोचके मुखवैरस्यलक्षणमाह—

त्रिदोषजे नैकरसं भवेत्तु।

वाताद्यरोचकानां लक्षणमाह—

हृच्छूलपीड़नयुतं पवनेन पित्तात्

तृड्दाहचोषवहुलं सकफप्रसेकं।

श्लेष्मात्मकं वहुरुजं वहुभिश्च विद्या-

द्वैगुण्यमोहजड़ताभि रथापरञ्च।

(ख) प्रपूर्त्तिः—अरोचकशब्देनात्र अरोचकभक्तद्वेषाभक्तच्छन्दान्ता द्वेष-पर्य्यायाः वोद्धव्याः। कैश्चिदेषां परस्परं भेदः क्रियते। तथा च वृद्धभोजः—प्रक्षिप्तन्तु मुखे चान्नं जन्तोर्न स्वदते मुहुः। अरोचकः स विज्ञेयो भक्तद्वेष मतः शृणु। चिन्तयित्वा तु मनसा दृष्ट्वा श्रुत्वा तु भोजनम्। द्वेष मायाति यो जन्तु र्भक्तद्वेष स उच्यते। यस्य नान्ने भवेत् श्रद्धा सोऽभक्तच्छन्द उच्यते। कुपितस्य भयार्त्तस्य यश्च भक्तनिरोधजः।

छर्द्यधिकारः।

वमनस्य साधारणनिदानमाह—

दुष्टैर्दोषैः पृथक् सर्वैर्वीभत्सालोचनादिभिः।
छर्दयः पञ्च विज्ञेयास्तासां लक्षणमुच्यते।
अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरति।
अकाले चातिमात्रैश्च तथाऽसात्म्यैश्च भोजनैः।
श्रमाद्भयात्तथोद्वेगादजीर्णात् क्रिमिदोषतः।
नार्य्याश्चापन्नसत्त्वाया स्तथातिद्रुतमश्नतः।
वीभत्सैर्हेतुभिश्चान्यैर्द्रुतमुत्क्लेशितोबलात्।

वमनस्य निरुक्तिमाह—

छादयत्याननं वेगैरर्दयन्नङ्गभञ्जनैः।
निरुच्यते छर्दिरिति दोषो वक्त्रं प्रधावितः।

वमीनां पूर्व्वरूपमाह—

हृल्लासोद्गाररोधश्च प्रसेको लवणस्तनुः।
द्वेषोऽन्नपाने च भृशं वमीनां पूर्व्वलक्षणं।

वातजवमनस्य निदानविशेषमाह—

व्यायामतीक्ष्णौषधशोकरोग-। भयोपवासादतिकर्षितस्य।
क्रुद्धो महास्रोतसि मातरिश्वा। दोषान् समुत्क्षिप्य तदूर्द्धमस्यन्
आमाशयोद्रेकक्कतश्च मर्म्म-। प्रपीड़येच्छर्दिमुदीरयेच्च।

वातजवमनस्य लक्षणमाह—

हृत्पार्श्वपीड़ामुखशोषशीर्ष-। नाभ्यर्त्तिकासस्वरभेदतोदैः।

उद्गारशब्दप्रबलं सफेनं । विच्छिन्नकृष्णं तनुकं कषायं ।
कृच्छ्रेणचाल्पं महता च वेगे- । नार्त्तोऽनिलाच्छर्द्दयतीह दुःखं ।

पित्तजवमनस्य निदानविशेषमाह—

अजीर्णकट्वम्लविदाह्यशीतैः । रामाशये पित्तमुदीर्णवेगम् ।
रसायनोभिर्विसृतं प्रपीड्य । मर्म्मोर्द्ध्वमागत्यवमिं करोति ।

पित्तजवमनस्य लक्षणमाह—

मूर्च्छापिपासामुखशोषमूर्द्ध- । ताल्वक्षिसन्तापतमोभ्रमार्त्तः ।
पीतं भृशोष्णं हरितं सतिक्तं । धूम्रञ्च पित्तेन वमेत् सदाहं ।

कफजवमनस्य निदानविशेषमाह—

स्निग्धातिगुर्व्वामविदाहिभोज्यैः । स्वप्नादिभिश्चैव कफोऽतिवृद्धः ।
उरःशिरोमर्म्मरसायनीश्च । सर्व्वाः समावृत्य वमिं करोति ।

कफजवमनस्य लक्षणमाह—

तन्द्रास्यमाधुर्य्यकफप्रसेक- । सन्तोषनिद्रारुचिगौरवार्त्तः ।
स्निग्धं घनं स्वादु कफात् प्रभूतं । सरोमहर्षौ ऽल्परुजं वमेत्तु ।

त्रिदोषजवमनस्य निदानविशेषमाह—

समश्नतः सर्व्वरसान् प्रसक्त । मामप्रदोषर्त्तुविपर्य्ययैश्च ।
सर्व्वे प्रकोपं युगपत् प्रपन्ना । श्छर्द्दिं त्रिदोषं जनयन्ति दोषाः ।

त्रिदोषजवमनस्य लक्षणमाह—

शूलाविपाकारुचिदाहतृष्णा- । श्वासप्रमोह-प्रबला प्रसक्तं । (क)
छर्द्दिस्त्रिदोषाल्लवणाम्लनील- । सान्द्रोष्णरक्तं वमतां नृणां स्यात् ।

(क) प्रपूर्त्तिः—पित्तजे क्षारोदकनिभं, कफजे च श्लेष्मतन्तुगवाचितं लवणाञ्च वमेदिति पठनीयम् ।

सर्व्वासां छर्द्दीनामसाध्यलक्षणमाह—

विट्स्वेदमूत्राम्बुवहानि वायुः। स्रोतांसि संरुध्य यदोर्द्ध्वमेति।
उत्सन्नदोषस्य समाचितं तं। दोषं समुद्धूय नरस्य कोष्ठात्।
विण्मूत्रयोस्तत्समगन्धवर्णं। तृट्श्वासहिक्कार्त्तियुतं प्रसक्तं।
प्रच्छर्द्दयेद्दुष्टमिहातिवेगा। त्तयार्द्दितश्चाशु विनाश मेति।

आगन्तुजां छर्द्दिमाह—

वीभत्सजा दौर्हृदजामजा च। असात्म्यजा च क्रिमिजा च या हि
सा पञ्चमी

आगन्तुवमने दोषसम्बन्धं दर्शयति—

तांश्चविभावयेच्च दोषोच्छ्रयेणैव यथोक्तमादौ।

क्रिमिजाया लक्षणमाह—

शूलहृल्लासबहुला क्रिमिजा च विशेषतः।
क्रिमिहृद्रोगतुल्येन लक्षणेन च लक्षिता।

असाध्यलक्षणमाह—

क्षीणस्य या छर्द्दिरतिप्रसक्ता। सोपद्रवा शोणित-पूययुक्ता।
सचन्द्रिकां तां प्रवदेदसाध्यां। साध्याञ्चिकित्सेन्निरुपद्रवाञ्च।

वमनस्योपद्रवमाह—

कासः श्वासोज्वरो हिक्का तृष्णा वैचित्यमेव च।
हृद्रोगस्तमकश्चैव ज्ञेया श्छर्द्देरुपद्रवाः।

तृष्णाधिकारः।

तृष्णाया निदानपूर्विकां संप्राप्तिमाह—

संक्षोभशोकश्रममद्यपानात्।
रुक्षाम्लशुष्कोष्णकटूपयोगात्।
धातुक्षयाल्लङ्घनसूर्य्यतापात्।
पित्तञ्च वातश्च भृशं प्रवृद्धौ।
स्रोतांसि संदूषयतः समेतौ।
यान्यम्बुवाहीनि शरीरिणां हि।
स्रोतःस्वपांवाहिषु दूषितेषु।
जायेत तृष्णा प्रवला ततस्तु।

तृष्णापूर्व्वरूपाण्याह—

ताल्वोष्ठकंठास्यविशोषदाह-। सन्तापमोहभ्रमविप्रलापाः।
पूर्वाणि रूपाणि भवन्ति तासा-। मुत्पत्तिकालेषु विशेषतो हि।

संख्यामाह—

वातात् पित्तात् कफात् तृष्णा सन्निपाताद्रसक्षयात्।
षष्ठी स्यादुपसर्गाच्च वातपित्ते तु कारणम्।

सामान्यलक्षणमाह—

मुखशोषो जलातृप्ति रन्नद्वेषः स्वरक्षयः।
कण्ठौष्ठजिह्वाकार्कश्यं जिह्वानिष्क्रमणं क्लमः।
प्रलापश्चित्तविभ्रंस स्तृड्ग्रहोक्ता स्तथामयाः।
सर्वासामेव तृष्णाना मेतत् सामान्यलक्षणम्।

वातजतृष्णामाह—

क्षामास्यता मारुतसंभवायां। तोदस्तथा शङ्खशिरःसु चापि।
स्रोतोनिरोधो विरसञ्च वक्त्रं शीताभिरद्भिश्च विवृद्धिमेति।

पित्तजतृष्णामाह—

मूर्च्छान्नविद्वेषविलापदाहा। रक्तेक्षणत्वं प्रततश्च शोषः।
शीताभिनन्दा मुखतिक्तता च। पित्ताल्पिकायां परिदूयनञ्च।

उष्णक्लान्तस्य सहसा शीताम्भो भजतस्तृषम्।
उष्मा रुद्धो गतः कोष्ठं यां कुर्य्यात् पित्तजैव सा।
या च पानातिपानोत्था तीक्ष्णाग्नेः स्नेहजा च या।

कफजां सर्व्वजाञ्चाह—

स्निग्धगुर्व्वम्ललवणभोजनेन कफोद्भवा।
कफो रुणद्धि कुपितस्तोयवाहिषु मारुतम्।
स्रोतःसु स कफस्तेन पङ्कवच्छोष्यते ततः।
शूकैरिवाचितःकण्ठो निद्रा मधुरवक्त्रता।
आध्मानं शिरसोजाड्यं स्तैमित्यच्छर्द्यरोचकाः।
आलस्यमविपाकश्च सर्वैः स्यात् सर्वलक्षणा।

क्षतजतृष्णामाह—

क्षतस्य रुक्शोणित-निर्गमाभ्यां तृष्णा चतुर्थी क्षतजा मता तु।
तयाभिभूतस्य निशादिनानि गच्छन्ति दुःखं पिवतोऽपि तोयम्।

रसक्षयजतृष्णामाह—

रसक्षयाद् या क्षयसम्भवा सा। तयाभिभूतश्च निशादिनेषु
पेपीयतेऽम्भः स सुखं न याति। तां सन्निपातादिति केचिदाहुः।

तस्या लक्षणमाह—

रसक्षयोक्तानि च लक्षणानि। तस्यामशेषेण भिषग्व्यवस्येत्॥

उपसर्गात्मिकां तृष्णामाह—

शोषमोहज्वराद्यन्यदीर्घरोगोपसर्गतः।
या तृष्णा जायते तीव्रा सोपसर्गात्मिका स्मृता।

तस्या एव लक्षणं कृच्छ्रसाध्यताञ्चाह—

दीनस्वरः प्रत्याख्यन् दीनः संशुष्कवक्त्रगलतालुः।
भवति खलु सोपसर्गात्तृष्णा सा शोषिणी कष्टा।

असाध्यलक्षणमाह—

सर्वास्त्वतिप्रसक्ता रोगकृशानां वमिप्रयुक्तानां।
घोरोपद्रवयुक्ता तृष्णा मरणाय विज्ञेया।
क्षीणं विचित्तं बधिरं तृषार्त्तं विवर्ज्जयेन्निर्गतजिह्वमाशु॥

मदमूर्च्छासन्न्यासाधिकारः।

मदमूर्च्छासन्न्यासानां साधारणनिदानसम्प्राप्तीश्चाह—

यदा तु रक्तवाहीनि रससंज्ञावहानि च।
पृथक् पृथक् समस्ता वा स्रोतांसि कुपिता मलाः॥
मलिनाहारशीलस्य रजोमोहावृतात्मनः।
प्रतिहत्यावतिष्ठन्ते जायन्ते व्याधयस्तदा।

मोहसामान्यत्वेऽपि मदादीनां विशिष्टत्वमाह—

मदमूर्च्छायसन्न्यासास्तेषां विद्याद्विचक्षणः
यथोत्तरं बलाधिक्यं हेतुलिङ्गोपशान्तिषु।

मदस्य निदानपूर्व्विकां सम्प्राप्तिमाह—

दुर्व्वलश्चेतसः स्थानं यदा वायुः प्रपद्यते
मनोविक्षोभयन् जन्तोः संज्ञां संमोहयेत्तदा।
पित्तमेवं कफश्चैवं मनोविक्षोभयन् नृणां।
संज्ञां नयत्याकुलतां विशेषश्चात्र वक्ष्यते।

वातमदलक्षणमाह—

सक्तानल्पद्रुताभाष श्चलस्खलितचेष्टितम्।
विद्याद्वातमदाविष्टं रूक्षश्यावारुणाकृतिम्।

पित्तमदलक्षणमाह—

सक्रोधपरुषाभाषं संप्रहारकलिप्रियम्।
विद्यात्पित्तमदाविष्टं रक्तपीतासिताकृतिम्।

कफमदलक्षणमाह—

स्वल्पसम्बद्धवचनं तन्द्रालस्यसमन्वितम्।
विद्यात् कफमदाविष्टं पाण्डुं प्रध्यानतत्परं।

सन्निपातमदलक्षणमाह—

सर्व्वाण्येतानि रूपाणि सन्निपातकृते मदे।

मद्यविषरुधिरजानां मदानां चातुर्विध्यमाह—

यश्च मद्यमदः प्रोक्तो विषजो रौधिरश्च यः।
सर्व एते मदा नर्त्ते वातपित्तकफत्रयात्।

मूर्च्छापूर्व्वरूपमाह—

हृत्पीड़ा जृम्भणं ग्लानिः संज्ञादौर्व्बल्यमेव च।
सर्वासां पूर्वरूपाणि

मूर्च्छायाः षड्विधत्वमुक्त्वा सर्व्वासु पित्तप्राधान्यं दर्शयति—

वातादिभिः शोणितेन मद्येन च विषेण च ।
षट्स्वप्येतासु पित्तन्तु प्रभुत्वेनावतिष्ठते ।

वातमूर्च्छालक्षणमाह—

नीलम्बा यदि वा कृष्णमाकाश मथवारुणं ।
पश्यंस्तमः प्रविशति शीघ्रञ्च प्रतिबुध्यते ।
वेपथुश्चाङ्गमर्द्दश्च प्रपीड़ा हृदयस्य च ।
कार्श्यं श्यावारुणच्छाया मूर्च्छाये वातसम्भवे ।

पित्तमूर्च्छालक्षणमाह—

रक्तं हरितवर्णं वा वियत्पीतमथापि वा ।
पश्यंस्तमः प्रविशति सस्वेदश्च प्रबुध्यते ।
सपिपासः ससन्तापो रक्तपीतारुणेक्षणः ।
संभिन्नवर्चाः पीताभो मूर्च्छाये पित्तसम्भवे ।

कफजमूर्च्छालक्षणमाह—

मेघसङ्काशमाकाशमावृतं वा तमोघनैः ।
पश्यंस्तमः प्रविशति चिराच्च प्रतिबुध्यते ।
गुरुभिः प्रावृतैरङ्गैर्यथैवार्द्रेण चर्म्मणा ।
सप्रसेकः सहृल्लासो मूर्च्छाये कफसम्भवे ।

रक्तजमूर्च्छामाह—

पृथिव्यापस्तमोरूपं रक्तगन्धस्तदन्वयः ।
तस्माद्रक्तस्य गन्धेन मूर्च्छन्ति भुवि मानवाः ।
द्रव्यस्वभाव इत्येके दृष्ट्वा यदभिमुह्यति ।

रक्तजमूर्च्छालक्षणमाह—

स्तब्धाङ्गदृष्टिस्त्वसृजा गूढ़ोच्छ्वासश्च मूर्च्छितः।

विषमद्यजे प्राह—

गुणास्तीव्रतरत्वेन स्थितास्तु विषमद्ययोः।
त एव तस्मात्ताभ्यान्तु मोहौ स्यातां यथेरितौ।

मद्यजमूर्च्छालक्षणमाह—

मद्येन विलपन् शेते नष्टविभ्रान्तमानसः।
गात्राणि विक्षिपन् भूमौ जरां यावन्न याति तत्।

विषजमूर्च्छालक्षणमाह—

वेपथुस्वप्नतृष्णाः स्युस्तमश्च विषमूर्च्छिते।
वेदितव्यं तीव्रतरं यथास्वं विषलक्षणैः।

मूर्च्छादिभ्यः सन्न्यासस्य भेदकं लक्षणमाह—

दोषेषु मदमूर्च्छाया हृतवेगेषु देहिनां।
स्वयमेवोपशाम्यन्ति संन्यासोनौषधैर्व्विना।

सन्न्यासलक्षणमाह—

वाग्देहमनसां चेष्टा माक्षिप्यातिबला मलाः।
संन्यस्यन्त्यबलं जन्तुं प्राणायतनमाश्रिताः।
स ना संन्याससंन्यस्तः काष्ठीभूतो मृतोपमः।
प्राणैर्व्विमुच्यते शीघ्रं मुक्त्वा सद्यःफलां क्रियां।

मूर्च्छादीनां भेदमाह—

मूर्च्छा पित्ततमःप्राया रजःपित्तानिलाद्भ्रमः।
तमोवातकफात्तन्द्रा निद्रा श्लेष्मतमोभवा।

तन्द्रालक्षणमाह—

इन्द्रियार्थेष्वसंवित्ति गौरवं जृम्भणं क्लमः ।
निद्रार्त्तस्येव यस्येहा तस्य तन्द्रां विनिर्द्दिशेत् ।

भ्रममाह—

चक्रवद्भ्रमतो गात्रं भूमौ पतति सर्व्वदा ।
भ्रमो रोग इति ज्ञेयो रजःपित्तानिलात्मकः ।

मदात्ययाधिकारः ।

हृदयस्य ओजःसत्वाद्याश्रयत्वमाह—

रसधात्वादिमार्गाणां सत्त्वबुद्धीन्द्रियात्मनाम् ।
प्रधानस्यौजसश्चैव हृदयं स्थान मुच्यते ।

मद्यं कथंकारं चेतोविकारं नयतीत्याह—

मद्यं हृदयमाविश्य स्वगुणै रोजसोगुणान् ।
दशभिर्दश संक्षोभ्य चेतो नयति विक्रियाम् ।

मद्यस्य दशगुणानाह—

लघूष्णतीक्ष्णसूक्ष्माम्लव्यवायाशुगमेव च ।
रूक्षं विकासि विशदं मद्यं दशगुणं स्मृतम् ।

ओजसो दशगुणानाह—

गुरु शीतं मृदु श्लक्ष्णं बहुलं मधुरं स्थिरम् ।
प्रसन्नं पिच्छिलं स्निग्धमोजोदशगुणं तथा ।

मद्यगुणैर्नोजोगुणविघातं दर्शयति—

गुरुत्वं लाघवाच्छैत्यमौष्ण्यादम्लस्वभावतः ।
माधुर्य्यं मार्द्दवं तैक्ष्ण्यात् प्रसादश्चाशुभावनात् ।

रौच्यात् स्नेहं व्यवायित्वात् स्थिरत्वं स्रच्णतामपि।
विकासिभावात् पैच्छिल्यं वैशद्यात् सान्द्रतां तथा।
सौच्म्यात् मद्यं विहन्त्येव मोजसः स्वगुणैर्गुणान्।
सत्त्वं तदाश्रयञ्चाशु संक्षोभ्य जनयेन्मदम्।

मदात्ययानां त्रिदोषजत्वमाह—

वातात् पित्तात् कफात् सर्व्वैश्चत्वारः स्युर्मदात्ययाः।
सर्व्वेऽपि सर्व्वैर्जायन्ते व्यपदेशस्तु भूयसा।

मदात्ययसामान्यलचणमाह—

सामान्यलच्चणं तेषां प्रमोहो हृदयव्यथा।
विड्भेदः प्रततं तृष्णा सौम्याग्नेयो ज्वरोऽरुचिः।
शिरःपार्श्वास्थिहृत्कम्पो मर्म्मभेदस्त्रिकग्रहः।
उरोविवन्धस्तिमिरं कासः श्वासः प्रजागरः।
स्वेदोऽतिमात्रं विष्टम्भः श्वयथुश्चित्तविभ्रमः।
प्रलापश्छर्द्दिरुत्क्लेशो भ्रमोदुःस्वप्नदर्शनम्।

वातप्रायस्य मदात्ययस्य निदानसम्प्राप्तिमाह—

स्त्रीशोकभयभाराध्वकर्म्मभि र्योऽतिकर्षितः।
रूक्षाल्पप्रमिताशी वा यः पिवत्यतिमात्रया।
रूचं परिणतं मद्यं निशि निद्रां विहत्य च।
करोति तस्य तच्छीघ्रं वातप्रायं मदात्ययम्।

तस्य लचणमाह—

हिक्काकासशिरःकम्पपार्श्वशूलप्रजागरै।
र्विद्याद्वहुप्रलापस्य वातप्रायं मदात्ययम्।

पित्तप्रायस्य निदानमाह—

तीक्ष्णोष्णं मद्यमम्लं वा योऽतिमात्रं निषेवते ।
अम्लोष्णतीक्ष्णभोजी च क्रोधनोऽग्न्यातपप्रियः ।
तस्योपजायते पित्ताद्विशेषेण मदात्ययः ।

तस्य लक्षणमाह—

तृष्णादाहज्वरस्वेदमूर्च्छातीसारविभ्रमैः ।
विद्याद्धरितवर्णस्य पित्तप्रायं मदात्ययम् ।

तस्य साध्यत्वासाध्यत्वमाह—

स तु वातोल्वणस्याशु प्रशमं याति हन्ति वा ।

कफप्रायस्य निदानसंप्राप्ती आह—

तरुणं मधुरप्रायं गौड़ं पैष्टिक मेव वा ।
मधुरस्निग्धगुर्वाशी यः पिबत्यतिमात्रया ।
अव्यायामदिवास्वप्नशय्यासनसुखे रतः ।
मदात्ययं कफप्रायं स शीघ्र मधिगच्छति ।

तस्य लक्षणमाह—

छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवैः
विद्याच्छीतपरीतस्य कफप्रायं मदात्ययं ।

त्रिदोषजस्य लक्षणमाह—

शरीरदुःखं बलवत् सम्मोहो हृदयव्यथा ।
अरुचिः प्रतता तृष्णा ज्वरः शीतोष्णलक्षणः ।
शिरःपार्श्वास्थिसन्धीनां विद्युत्तुल्या च वेदना ।
जायतेऽतिबला जृम्भा स्फुरणं वेपनं श्रमः ।

उरोविबन्धः कासश्च हिक्काश्वासःप्रजागरः।
शरीरकम्पः कर्णाक्षिमुखरोगस्त्रिकग्रहः।
छर्द्यतीसारहृत्क्लेशो वातपित्तकफात्मकः।

परमदस्य लक्षणमाह—

श्लेष्मोच्छ्रयोऽङ्गगुरुता विरसास्यता च।
विण्मूत्रसक्तिरथ तन्द्रिररोचकश्च।
लिङ्गं परस्य च मदस्य वदन्ति तज्ज्ञाः।
तृष्णा रुजा शिरसि सन्धिषु चापि भेदः।

पानाजीर्णलक्षणमाह—

आध्मानमुग्र मथचोद्गिरणं विदाहः
पानेऽजरां समुपगच्छति लक्षणानि।

पानविभ्रमलक्षणमाह—

हृद्गात्रतोदकफसंस्रवकण्ठधूमा।
मूर्च्छावमिज्वरशिरोरुजनप्रदाहाः।
द्वेषः सुरान्नविकृतेष्वपि तेषु तेषु
तं पानविभ्रममुशन्त्यखिलेन धीराः।

ध्वंसकविक्षेपयो र्निदानमाह—

विच्छिन्नमद्यः सहसा योऽतिमद्यं निषेवते।
ध्वंसको विक्षेपश्चैव रोगस्तस्योपजायते।

ध्वंसकलक्षणमाह—

श्लेष्मप्रकोपः कण्ठास्य शोषः शब्दासहिष्णुता।
तन्द्रा निद्राभियोगश्च ज्ञेयं ध्वंसकलक्षणम्।

विक्षेपलक्षणमाह—

हृत्कण्ठरोगः सम्मोहश्छर्द्दिरङ्गरुजा ज्वरः।
तृष्णा कास शिरःशूल मेतद्विक्षेपलक्षणम्।

अवस्थावशादेतयोः कष्टसाध्यत्वमाह—

व्याध्युपक्षीणदेहस्य दुश्चिकित्स्यतमौ मतौ।

असाध्यलक्षणमाह—

हीनोत्तरौष्ठमतिशीतममन्ददाहं
तैलप्रभास्यमपि पानहतं त्यजेत्तु।
जिह्वौष्ठदन्तमसितन्त्वथवापि नीलं
पीते च यस्य नयने रुधिरप्रभे वा।
हिक्काज्वरौ वमथुवेपथुपार्श्वशूलाः
कासभ्रमावपि च पानहतं भजन्ते।

मद्यदोषमाह—

मद्ये मोहोभयं शोकः क्रोधोमृत्युश्च संश्रिताः।
सोन्मादं मदमूर्च्छाद्याः सापस्मारापतानकाः।
यत्रैकः स्मृतिविभ्रंशस्तत्र सर्व्वमसाधुवत्।
इत्येवं मद्यदोषज्ञा मद्यं गर्हन्ति यत्नतः।

युक्तिहीनपानस्यैव दोषत्वमाह—

सत्यमेते महादोषा मद्यस्योक्ता न संशयः।
अहितस्यातिमात्रस्य पीतस्य बिधिवर्ज्जनम्।

पानयुक्तिमाह—

अन्नपानवयोव्याधिबलकालत्रिकाणि षट्
त्रीणदोषां स्त्रिबिधं सत्त्वं ज्ञात्वा मद्यं पिबेत् सदा।

तेषां विकाराणामष्टानां योजना युक्तिरुच्यते।
यथायुक्त्या पिवन् मद्यं मद्यदोषै र्न युज्यते।

युक्तियुक्तस्य मद्यस्य गुणमाह—

प्रीणनं वृंहणं बल्यं भयशोकश्रमापहम्।
स्वापनं नष्टनिद्रानां स्वरवर्णप्रसादनम्।

मद्यवर्ज्जनस्य महत् फलमाह—

निवृत्तः सर्व्वमद्येभ्यो नरो यः स्याज्जितेन्द्रियः।
शरीरमानसै र्धीमान् विकारैर्न स युज्यते।

दाहाधिकारः।

मद्यजं दाहमाह—

त्वचं प्राप्तः स पानोष्मा पित्तरक्ताभिमूर्च्छितः।
दाहं प्रकुरुते घोरं पित्तवत्तत्र भेषजं।

रक्तजमाह—

कृत्स्नदेहानुगं रक्त मुद्रिक्तं दहति ध्रुवं।
स उष्यते तृष्यते वा ताम्राभस्ताम्रलोचनः।
लोहगन्धाङ्गवदनो वह्निनेवावकीर्य्यते।
पित्तज्वरसमः पित्तात् स चाप्यस्य विधिःस्मृतः।

तृष्णानिरोधजं दाहमाह—

तृष्णानिरोधादब्धातौ क्षीणे तेजः समुद्गतं।
सवाह्याभ्यन्तरं देहं प्रदहेन्मन्दचेतसः।
संशुष्कगलताल्वोष्ठो जिह्वां निष्कृष्य वेपते।

रक्तपूर्णकोष्ठस्य दाहमाह—

असृजः पूर्णकोष्ठस्य दाहोऽन्यः स्यात् सुदुस्तरः ।

धातुक्षयजं दाहमाह—

धातुक्षयोक्तो यो दाहस्तेन मूर्च्छातृड़र्द्दितः ।
क्षामस्वरः क्रियाहीनः स सीदेद्भृशपीड़ितः ।

क्षतजं दाहमाह—

क्षतजोऽनश्नतश्चान्नं शोचतश्चाप्यनेकधा ।
तेनान्तर्दह्यतेऽत्यर्थं तृष्णादाहप्रलापवान् ।

मर्माभिघातजं दाहमाह—

मर्म्माभिघातजोऽप्यस्ति सोऽसाध्यः सप्तमोमतः ।

असाध्यलक्षणमाह—

सर्व्व एव च वर्ज्ज्याः स्युः शीतगात्रस्य देहिनः ।

उन्मादभूतोन्मादाधिकारः ।

उन्मादनिरुक्तिमाह—

मदयन्त्युद्गता दोषा यस्मादुन्मार्गमागताः ।
मानसोऽयमतो व्याधिरुन्माद इति कीर्त्तितः ।

तस्य भेदमाह—

एकैकशः सर्व्वशश्च दोषैरत्यर्थमूर्च्छितैः ।
मानसेन च दुःखेन स च पञ्चविधो मतः ।
विषाद्भवपि षष्ठश्च

सामान्यहेतुमाह—

विरुद्धदुष्टाशुचिभोजनानि प्रधर्षणं देवगुरुद्विजानां।
उन्मादहेतु र्भयहर्षपूर्व्वो मनोऽभिघातो विषमाश्च चेष्टाः।

संप्राप्तिमाह—

तैरल्पसत्त्वस्य मलाः प्रदुष्टा बुद्धेर्निवासं हृदयं प्रदूष्य।
स्रोतांस्यधिष्ठाय मनोवहानि प्रमोहयन्त्याशु नरस्य चेतः।

पूर्व्वरूपमाह—

मोहोद्वेगौ स्वनः श्रोत्रे गात्राणामपकर्षणम्।
अत्युत्साहोऽरुचिश्चान्ने स्वप्ने कलुषभोजनम्।
वायुनोन्मथनञ्चापि भ्रमश्चंक्रमतस्तथा।
यस्य स्यादचिरेणैव मुन्मादं सोऽधिगच्छति।

सामान्यरूपमाह—

धीविभ्रमः सत्त्वपरिप्लवश्च पर्य्याकुला दृष्टि रधीरता च।
अबद्धवाक्त्वं हृदयञ्च शून्यं सामान्यमुन्मादगदस्य लिङ्गं। (क)

वातजस्य विशेषहेतुमाह—

रुक्षाल्पशीतान्नविरेकधातु-। क्षयोपवासैरनिलोऽतिवृद्धः।
चिन्तादिदुष्टं हृदयं प्रदूष्य। बुद्धिं स्मृतिञ्चाप्युपहन्ति शीघ्रं।

तस्य लक्षणमाह—

तत्र वातात् कृशाङ्गता।
अस्थाने रोदनाक्रोश-हसित-स्मित-नर्त्तनम्।
गीतवादित्र-वागङ्गविक्षेपास्फोटनानि च।

(क) प्रपूर्त्तिः—देहदुःखसुखभ्रष्टो भ्रष्टसारथिवद्रथः। भ्रमत्यचिन्तितारम्भः।

असाम्ना वेणुवीणादिशब्दानुकरणं मुहुः ।
आस्यात् फेनागमोऽजस्र मटनं बहुभाषिता ।
अलङ्कारोऽनलङ्कारे रयानैर्गमनोद्यमः ।
गद्भिरभ्यवहार्य्येषु तल्लाभेवावमानता ।
उत्पिण्डितारुणाचित्व जीर्णे चान्नेगदोद्भवः ।

पित्तजस्य हेतुमाह—

अजीर्णकट्वम्लविदाह्यशीतै । र्भोज्यैश्चितं पित्तमुदीर्णवेगं ।
उन्मादमत्युग्रमनात्मकस्य । हृदि स्थितं पूर्व्ववदाशु कुर्य्यात् ।

तस्य लक्षणमाह—

अमर्षसंरम्भविनग्नभावाः । सन्तर्ज्जनातिद्रवणौष्ण्यरोषाः ।
प्रच्छायशीतान्नजलाभिलाषः । पीता च भा पित्तकृतस्य लिङ्गं(क)

कफजस्य हेतुमाह—

संपूरणैर्मन्दविचेष्टितस्य । सोष्मा कफो मर्म्मणि संप्रदुष्टः ।
बुद्धिं स्मृतिञ्चाप्युपहत्य चित्तं । प्रमोहयन् संजनयेद्विकारम् ।

तस्य लक्षणमाह—

वाक्चेष्टितं मन्दमरोचकश्च ।
नारीविविक्त-प्रियता च निद्रा
छर्द्दिश्च लाला च वलश्च भुङ्क्तो
नखादिशौक्ल्यञ्च कफात्मके स्यात् । (ख)

(क) प्रपूर्त्तिः—"असत्यज्वलनज्वालातारकादीपदर्शनम्"।

(ख) प्रपूर्त्तिः—वैभत्स्यं, शौचविद्वेषः, आनने श्वयथुः, उन्मादो बलवान्-रात्रौ ।

सन्निपातस्य हेतुरूपसाध्यत्वासाध्यत्वान्याह—

सर्व्वात्मके त्रिभिरपि व्यतिमिश्रितानि।
रूपाणि वातकफपित्तकृतानि विद्यात्।
सम्पूर्णलक्षणमसाध्य मुदाहरन्ति।
सर्व्वात्मकं क्वचिदपि प्रवदन्ति साध्यम्।

मानसदुःखजस्य हेतुसंप्राप्ती आह—

चौरैर्नरेन्द्रपुरुषैररिभि स्तथान्यै
र्वित्रासितस्य धनबान्धवसंक्षयाद्वा।
गाढ़ं क्षते मनसि च प्रियया रिरंसो
र्जायेत चोत्कटतमो मनसो विकारः।

तस्य लक्षणमाह—

चित्रं ब्रवीति च मनोऽनुगतं विसंज्ञो
गायत्यथो हसति रोदिति चापि मूढ़ः।

विषजमाह—

रक्तेक्षणो हतबलेन्द्रियभाः सुदीनः
श्यावाननो विषकृतेऽथ भवेद्विसंज्ञः।

असाध्यलक्षणमाह—

अवाङ्मो वाप्युदङ्मो वा क्षीणमांसबलो नरः।
जागरूको ह्यसन्देह मुन्मादेन विनश्यति।

भूतोत्थमुन्मादमाह—

अमर्त्यवाग्विक्रमवीर्य्यचेष्टो।
ज्ञानादिविज्ञानबलादिभि र्यः।

उन्मादकालोऽनियतश्च यस्य ।
भूतोत्थमुन्मादमुदाहरेत्तं ।

देवजुष्टमाह—

सन्तुष्टः शुचिरतिदिव्यमाल्यगन्धो
निस्तन्द्री रवितथसंस्कृतप्रभाषी ।
तेजस्वी स्थिरनयनो वरप्रदाता
ब्रह्मण्यो भवति नरः स देवजुष्टः ।

देवशत्रुजुष्टमाह—

संस्वेदी द्विजगुरुदेवदोषवक्ता
जिह्माक्षो विगतभयो विमार्गदृष्टिः ।
सन्तुष्टो न भवति चान्नपानजातै-
र्दुष्टात्मा भवति सदेवशत्रुजुष्टः ।

गन्धर्वग्रहजुष्टमाह—

हृष्टात्मा पुलिनवनान्तरोपसेवी
स्वाचारः प्रियपरिगीतगन्धमाल्यः ।
नृत्यन् वै प्रहसति चारु चाल्पशब्दं
गन्धर्वग्रहपरिपीड़ितो मनुष्यः ।

यक्षग्रहजुष्टमाह—

ताम्राक्षः प्रियतनुरक्तवस्त्रधारी
गम्भीरो द्रुतगति रल्पवाक् सहिष्णुः ।
तेजस्वी वदति च किं ददामि कस्मै
यो यक्षग्रहपरिपीड़ितो मनुष्यः ।

पितृग्रहाभिजुष्टमाह—

प्रेतानां स दिशति संस्तरेषु पिण्डान्
शान्तात्मा जलमपि चापसव्यवस्त्रः।
मांसेप्सुस्तिलगुड़पायसाभिकाम
स्तद्भक्तो भवति पितृग्रहाभिजुष्टः।

भुजङ्गजुष्टमाह—

यस्तूर्व्यां प्रसरति सर्पवत् कदाचित्
सृक्कण्यौ विलिहति जिह्वया तथैव।
क्रोधालुर्गुड़मधुदुग्धपायसेप्सु
र्ज्ञातव्यो भवति भुजङ्गमेन जुष्टः।

राक्षसजुष्टमाह—

मांसासृग्विविधसुराविकारलिप्सु
र्निर्लज्जो भृश मतिनिष्ठुरोऽतिशूरः।
क्रोधालुर्विपुलबलो निशाविहारी
शौचद्विड् भवति स राक्षसैर्गृहीतः।

पिशाचजुष्टमाह—

उद्धस्तः कृशपरुषोऽचिरप्रलापी
दुर्गन्धो भृशमशुचि स्तथातिलोलः।
बह्वाशी विजनवनान्तरोपसेवी
व्याचेष्टन् भ्रमति रुदन् पिशाचजुष्टः।

असाध्यलक्षणमाह—

स्थूलाक्षो द्रुतमटनः स फेनलेही
निद्रालुः पतति कम्पते च यो हि।

यस्माद्द्रिद्विरदनगादिविच्युतः सन्
संस्पृष्टो न भवति वार्द्धकेन जुष्टः ।

देवादीनां ग्रहणकालमाह—

देवग्रहाः पौर्णमास्या मसुराः सन्ध्ययोरपि ।
गन्धर्व्वाः प्रायशोऽष्टम्यां यक्षाश्च प्रतिपद्यथ ।
पितृग्राः कृष्णक्षये हिंस्युः पञ्चम्यामपि चोरगाः ।
रक्षांसि रात्रौ पैशाचाश्चतुर्द्दश्यां विशन्ति हि ।

प्रविविक्षवो ग्रहा कथं न दृश्यन्त इत्याह—

दर्पणादीन् यथा छाया शीतोष्णं प्राणिनो यथा ।
स्वमणिं भास्कराचिंश्च यथा देहञ्च देहधृक् ।
विशन्ति च न दृश्यन्ते ग्रहास्तद्वच्छरीरिणः ।

अपस्माराधिकारः ।

अपस्मारस्य निरुक्तिमाह—

स्मृति र्भूतार्थविज्ञान मपस्य परिवर्ज्जने ।
अपस्मार इति प्रोक्त स्ततोऽयं व्याधिरन्तकृत् ।

अपस्मारोत्पत्तिकारणस्य चित्ताभिघातस्य हेतूनाह—

मिथ्यादियोगेन्द्रियार्थकर्म्मणा मभिसेवनात् ।
विरुद्धमलिनाहारविहारकुपितैर्मलैः ।
वेगनिग्रहशीलाना महिताशुचिभोजिनाम् ।
रजस्तमोऽभिभूतानां गच्छताञ्च रजःस्वलां

तथा कामभयोद्वेगक्रोधशोकादिभिर्भृशम् ।
चेतस्यभिहते पुंसा मपस्मारोऽभिजायते ।

पूर्वरूपमाह—

हृत्कम्पः शून्यता स्वेदो ध्यानं मूर्च्छा प्रमूढ़ता ।
निद्रानाशश्च तस्मिंश्च भविष्यति भवत्यथ ।

अपस्मारसामान्यरूपमाह—

संज्ञावहेषु स्रोतःसु दोषव्याप्तेषु मानवः ।
रजस्तमःपरीतेषु मूढ़ो भ्रान्तेन चेतसा
विक्षिपन् हस्तपादौ च विजिह्मभ्रु र्विलोचनः ।
दन्तान् खादन् वमन् फेनं विवृताक्षः पतेत् क्षितौ
अल्पकालान्तरश्चापि पुनः संज्ञां लभेत सः ।
सोऽपस्मार इति प्रोक्तः

संख्यामाह—

स च दृष्टश्चतुर्विधः ।
वातपित्तकफैर्नृणाञ्चतुर्थः सन्निपाततः ।

वातजलक्षणमाह—

कम्पते प्रदशेद्दन्तान् फेनोद्वामी श्वसित्यपि ।
परुषारुणकृष्णानि पश्येद्रूपाणि चानिलात् ।

पित्तजलक्षणमाह—

पीतफेनाङ्गवक्त्राक्षः पीतासृग्रूपदर्शकः ।
सतृष्णोष्णानलव्याप्त-लोकदर्शी च पैत्तिकः ।

श्लेष्मजलक्षणमाह—

शुक्लफेनाङ्गवक्त्राक्षः शीतहृष्टाङ्गजो गुरुः।
पश्येच्छुक्लानि रूपाणि श्लैष्मिको मुच्यते चिरात्।

वाताद्यपस्मारेषु प्रत्येकमेकैकलक्षणमाह—

हृदि तोदस्तृड़ुत्क्लेदस्त्रिष्वप्येतेषु संख्यया।

वाताद्यपस्माराणां साधारणलक्षणमाह—

प्रलापः कूजनं क्लेशः प्रत्येकन्तु भवेदिह।

त्रिदोषजलक्षणमाह—

सर्व्वैरेतैः समस्तैश्च लिङ्गैर्ज्ञेय स्त्रिदोषजः।

असाध्यलक्षणमाह—

अपस्मारः स चासाध्यः यः क्षीणस्यानवश्च यः।
प्रस्फुरन्तं सुबहुशः क्षीणं प्रचलितभ्रुवं।
नेत्राभ्याञ्च विकुर्व्वाण मपस्मारो विनाशयेत्।

स्वमतेनापस्मारस्य दोषजत्वं प्रदर्श्य परमतेनागन्तुकत्वमाह—

अनिर्मित्तागमाद् व्याधे र्गमनादकृतेऽपि च।
आगमाच्चाप्यपस्मारं वदन्त्यन्ये न दोषजम्।

परमतनिराकरणाय स्वमतमाह—

क्रमोपयोगाद्दोषाणां क्षणिकत्वात्तथैव च।
आगमाद् वैश्वरूपाच्च स तु निर्व्वर्ण्यते बुधैः।

कारणसद्भावाद् कथमपस्मारः सन्ततं नस्यादित्याशङ्क्याह—

देवे वर्षत्यपि भूमौ यथा वीजानि कानिचित्।
शरदि प्रतिरोहन्ति तथा व्याधिसमुच्छ्रयाः।

एतदेव स्पष्टीकुर्व्वन्नाह—

स्थायिनः केचिदल्पेन कालेनाभिप्रवर्द्धिताः ।
दर्शयन्ति विकारांस्तु विश्वरूपान्निसर्गतः ।

अपस्मारो दोषजो न तु भूतावेशज इति सिद्धान्तमाह—

अपस्मारो महाव्याधिस्तस्माद्दोषज एव तु ।

वातव्याध्यधिकारः ।

सामान्यहेतुमाह—

रूक्षशीताल्पलघ्वन्नव्यवायातिप्रजागरैः ।
विषमादुपचाराच्च दोषासृक्स्रावणादपि ।
लङ्घन-प्लवनात्यध्व-व्यायामादिविचेष्टितैः ।
धातूनां संक्षयाच्चिन्ताशोकरोगातिकर्षणात् ।
वेगसन्धारणादामादभिघातादभोजनात् ।
मर्म्माबाधाद्गजोष्ट्राश्व शीघ्रयानापतंसनात् ।

धातुक्षयाद्वातकोपमाह—

धातुक्षयकरैर्वायुः कुप्यत्यतिनिषेवितैः ।
चरन् स्रोतःसु रिक्तेषु भृशं तान्येव पूरयन् ।

मार्गावरणेन वातप्रकोपमाह—

तेभ्योऽन्यदोषपूर्णेभ्यः प्राप्यवाऽऽवरणं वली ।
करोति विविधान् व्याधीन् सर्व्वाङ्गैकाङ्गसंश्रयान् ।

पूर्व्वरूपमाह—

अव्यक्तलक्षणं तेषां पूर्व्वरूपमिति स्मृतं ।
आत्मरूपन्तु यद्व्यक्त मपायो लघुता पुनः ।

कुपितोऽनिलो यत् करोति तदाह—

सङ्कोचः पर्व्वणां स्तम्भोभङ्गोऽस्थ्नां पर्व्वणामपि।
रोमहर्षः प्रलापश्च पाणिपृष्ठशिरोग्रहः।
खञ्जपाङ्गुल्यकुब्जत्वं शोषोऽङ्गानामनिद्रता।
गर्भशुक्ररजोनाशः स्पन्दनं गात्रसुप्तता।
शिरोनासाक्षिजत्रूणां ग्रीवायाश्चापि हुण्डनं।
भेदस्तोदोऽर्त्तिराक्षेपो मुहुश्चायास एव च।
एवं विधानि रूपाणि करोति कुपितोऽनिलः।
हेतुस्थानविशेषाच्च भवेद्रोगविशेषकृत्।

स एवाशयाङ्गधातुविशेषान् प्राप्य यत् करोति तदाह—

तत्र कोष्ठाश्रिते दुष्टेनिग्रहो मूत्रवर्च्चसोः।
ब्रध्नहृद्रोगगुल्मार्शःपार्श्वशूलञ्च मारुते।

सर्व्वाङ्गाश्रितस्य वायोर्लक्षणमाह—

सर्व्वाङ्गकुपिते वाते गात्रस्फुरण-भञ्जनं।
वेदनाभिः परीतश्च स्फुटन्तीवास्य सन्धयः।

गुदस्थितस्य लक्षणमाह—

ग्रहोविण्मूत्रवातानां शूलाध्मानाश्मशर्कराः।
जङ्घोरुत्रिकपात्पृष्ठ-रोगशोषौ गुदे स्थिते।

आमाशयस्थितस्य लक्षणमाह—

रुक् पार्श्वोदरहृन्नाभे स्तृष्णोद्गारविसूचिकाः।
कासः कण्ठास्यशोषश्च श्वासश्चामाशये स्थिते।

पक्काशयस्थितस्य लक्षणमाह--

पक्काशयस्थोऽन्त्रकूजं शूलाटोपौ करोति च।
कृच्छ्रमूत्रपुरीषत्वमानाहं त्रिकवेदनां।

इन्द्रियाधिष्ठितस्य लक्षणमाह—

श्रोत्रादिष्विन्द्रियवधं कुर्य्याद्दुष्टसमीरणः।

त्वग्गतस्य लक्षणमाह—

त्वग्रुक्षा स्फुटिता सुप्ता कृशा कृष्णा च तुद्यते।
आतन्यते सरागा च पर्व्वरुक् त्वग्गतेऽनिले।

रक्तगतस्य लक्षणमाह—

रुजास्तीव्राः ससन्तापा वैवर्ण्यं कृशतारुचिः।
गात्रे चारूंषि भुक्तस्य स्तम्भश्चासृग्गतेऽनिले।

मांसमेदोगतस्य लक्षणमाह—

गुर्व्वङ्गं तुद्यतेऽत्यर्थं दण्डमुष्टिहतं यथा।
सरुक् श्रमितमत्यर्थं मांसमेदोगतेऽनिले।

शुक्रगतस्य लक्षणमाह—

क्षिप्रं मुञ्चति बध्नाति शुक्रं गर्भमथापि वा।
विकृतिं जनयेच्चापि शुक्रस्थः कुपितोऽनिलः।

शिरागतस्य लक्षणमाह—

शरीरं मन्दरुक्शोफं शुष्यति स्पन्दतेऽपि वा।
सुप्तास्तन्व्यो महत्यो वा सिरा वाते सिरागते।

स्नायुगतस्य लक्षणमाह—

सर्व्वाङ्गैकाङ्गरोगांश्च कुर्य्यात् स्नायुगतोऽनिलः।

सन्धिगतस्य लक्षणमाह—

वातपूर्णदृतिस्पर्शः शोफः सन्धिगतेऽनिले ।
प्रसारणाकुञ्चनयोरप्रवृत्तिः सवेदना ।

आक्षेपकस्य सामान्यलक्षणमाह—

यदा तु धमनोः सर्व्वाः कुपितोऽभ्येति मारुतः ।
तदाक्षिपत्याशुमुहुर्मुहुर्देहं मुहुश्चरः ।
मुहुर्मुहुश्चाक्षेपणादाक्षेपक इति स्मृतः ।*

आक्षेपकस्यैवावस्थाविशेषापतन्त्रकापतानकावाह—

क्रुद्धःस्वैः कोपनैर्वायुः स्थानादूर्द्धं प्रपद्यते ।
पीड़यन् हृदयं गत्वा शिरः शङ्खौ च पीड़यन् ।
धनुर्व्वन्नमयेद्गात्राण्याक्षिपेन्मोहयेत्तदा ।
स कृच्छ्रादुच्छ्वसेच्चापि स्तब्धाक्षोऽथ निमीलकः ।
कपोतइव कूजेच्च निःसंज्ञः सोपतन्त्रकः ।
दृष्टिंसंस्तभ्य संज्ञाञ्च हत्वा कण्ठेन कूजति ।
हृदि मुक्ते नरः स्वास्थ्यं याति मोहं व्रजेत पुनः ।
वायुना दारुणं प्राहुरेके तदपतानकं ।†

दण्डापतानकमाह—

कफान्वितो भृशं वायु स्तास्वेव यदि तिष्ठति ।
दण्डवत् स्तम्भयेद्देहं स तु दण्डापतानकः ।

---

* आक्षेपकश्चतुर्द्धा—अपतानकः, संसृष्टाक्षेपकः, केवलाक्षेपकः, अभिघातजश्च ।

† अपतानकस्त्रिधा—दण्डापतानकः, अन्तरायामो वहिरायामश्च ।

अन्तरायामबहिरायामयोः साधारणरूपमाह—

धनुस्तुल्यं नमेद् यस्तु स धनुस्तम्भसंज्ञकः।

धनुस्तम्भसंज्ञकमन्तरायाममाह—

अङ्गुलीगुल्फजठरहृद्वक्षोगलसंश्रितः।
स्नायुप्रतान मनिलो यदाक्षिपति वेगवान्।
तदास्याभ्यन्तरायामं कुरुते मारुतो बली॥
अन्तर्धनुरिवाङ्गञ्च वेगैस्तम्भञ्च नेत्रयोः।
करोति जृम्भां दशनं दशनानां कफोद्वमम्।
पार्श्वयोर्वेदनां वाक्य-हनु-पृष्ठ-शिरोग्रहम्।
धनुस्तम्भं विजानीयादन्तरायामसंज्ञितम्।

धनुस्तम्भसंज्ञकं बाह्यायाममाह—

बाह्यस्नायु-प्रतानस्थो बाह्यायामं करोति च।
देहस्य बहिरायामात् पृष्ठतो नीयते शिरः।
उरश्चोत्क्षिप्यते तत्र कन्धरा चावमृद्यते।
दन्तेष्वास्ये च वैवर्ण्यं प्रस्वेदः स्रस्तगात्रता।
बाह्यायामं धनुस्तम्भं वक्षःकट्यूरुभञ्जनम्।
तमसाध्यं बुधाः प्राहुः—

व्रणायाममाह—

व्रणं मर्म्माश्रितं प्राप्य समीरणः समीरणात्।
व्यायच्छन्ति तनुं दोषा सर्व्वामापदमस्तकम्।
तृष्यतः पाण्डुगात्रस्य व्रणायामः स वर्ज्जितः।

संसृष्टाचेपक-केवलाचेपकावाह—

कफपित्तान्वितो वायुर्वायुरेव च केवलः ।
कुर्य्यादाक्षेपकं त्वन्यं

अभिघातजमाचेपकमाह—

चतुर्थमभिघातजं ।

अपतानकाख्यस्याचेपकस्यासाध्यत्वमाह—

गर्भपातनिमित्तश्च शोणितातिस्रवाच्च यः ।
अभिघातनिमित्तश्च न सिद्ध्यत्यपतानकः ।

एकाङ्गवातव्याधिमाह—

गृहीत्वाऽर्द्धं तनोर्वायुः शिराःस्नायु र्विशोष्य च ।
पक्षमन्यतमं हन्ति सन्धिबन्धान् विमोक्षयन् ।
कृत्स्नार्द्धकायस्तस्य स्यादकर्म्मण्यो विचेतनः ।
एकाङ्गरोगं तं केचिदन्ये पक्षवधं विदुः ।

सर्व्वाङ्गाश्रितमाह—

सर्व्वाङ्गरोगस्तद्वच्च सर्व्वकायाश्रितेऽनिले ।

दोषान्तरसंसृष्टस्य वायोर्विशेषलक्षणमाह—

दाहसन्तापमूर्च्छाः स्यु र्वायौ पित्तसमन्विते ।
शैत्यशोथगुरुत्वानि तस्मिन्नेव कफान्विते ।

पक्षवधस्य साध्यत्वकष्टसाध्यत्वादिकमाह—

शुद्धवातहतं पक्षं कृच्छ्रसाध्यतमं विदुः ।
साध्यमन्येन संयुक्त मसाध्यं क्षयहेतुकं ।

अर्द्दितमाह—

शिरसा भारहरणादतिहास्यप्रभाषणात्।
उत्त्रास-वक्त्र-क्षवथु-स्वर-कार्म्मुककर्षणात्।
विषमादुपधानाच्च कठिनानाञ्च चर्व्वणात्।
वायुर्विवृद्धस्तैस्तैश्च वातलैरुर्द्ध्वमास्थितः।
गर्भिणी-सूतिका-बाल-वृद्ध-क्षीणेष्वसृक्क्षये।
वक्रीकरोति वक्त्रार्द्धं मुक्तं हसितमीक्षितम्।
ततोऽस्य कम्पते मूर्द्धा वाक्सङ्गः स्तब्धनेत्रता।
दन्तचालः स्वरभ्रंशः श्रुतिहानिः क्षवग्रहः।
गन्धाघ्राणं स्मृतेर्मोहः त्रासः सुप्तस्य जायते।
निष्ठीवः पार्श्वतो यायादेकस्याक्ष्णो निमीलनम्।
जत्रोरुर्द्ध्वं रुजा तीव्रा शरीरार्द्धेऽधरेऽपि वा।
तमाहुरर्द्दितं केचिदेकायाममथापरे।

तस्यैवासाध्यत्वमाह—

क्षीणस्यानिमिषाक्षस्य प्रसक्ताऽव्यक्तभाषिणः।
न सिध्यत्यर्द्दितं गाढ़ं त्रिवर्षं वेपनस्य च॥

आक्षेपकादीनामर्द्दितान्तानां वेगित्वमाह—

गते वेगे भवेत् स्वास्थ्यं सर्व्वेष्वाक्षेपकादिषु।

हनुग्रहमाह—

जिह्वानिर्लेखनाच्छुष्कभक्षणादभिघाततः।
कुपितो हनुमूलस्थः स्रंसयित्वानिलो हनू।

करोति विवृतास्यत्वमथवा संवृतास्यतां।
हनुग्रहः स तेन स्यात् कृच्छ्राच्चर्व्वणभाषणं।

मन्यास्तम्भमाह—

दिवास्वप्नासनस्थानविवृतोर्द्ध्वनिरीक्षणैः।
मन्यास्तम्भं प्रकुरुते स एव श्लेष्मणावृतः।

जिह्वास्तम्भमाह—

वाग्वाहिनीशिरासंस्थो जिह्वां स्तम्भयतेऽनिलः।
जिह्वास्तम्भः स तेनान्नपानवाक्येष्वनीशता।

शिराग्रहमाह—

रक्तमाश्रित्य पवनः कुर्य्यान्मूर्द्धधराः शिराः।
रूक्षाः सवेदनाः कृष्णाः सोऽसाध्यः स्याच्छिराग्रहः।

गृध्रसीमाह—

स्फिक्पूर्व्वा कटिपृष्ठोरुजानुजङ्घा-पदं क्रमात्।
गृध्रसी स्तम्भरुक् तोदैर्गृह्णाति स्पन्दते मुहुः।
वातात्

वातकफात्मकगृध्रसीलक्षणमाह—

वातकफात्तन्द्रा गौरवारोचकान्विता।

विश्वचीमाह—

तलं प्रत्यङ्गुलीनां याः कण्डरा बाहुपृष्ठतः।
बाह्वोः कर्म्मक्षयकरी विश्वची चेति सोच्यते।

क्रोष्टुकशीर्षमाह—

वातशोणितजः शोथो जानुमध्ये महारुजः।
ज्ञेयः क्रोष्टुकशीर्षस्तु स्थूलः क्रोष्टुकशीर्षवत्।

खञ्जमाह—

वायुः कट्याश्रितः सक्थ्नः कण्डरामाक्षिपेद् यदा ।
खञ्जस्तदा भवेज्जन्तुः पङ्गुः सक्थ्नोर्द्वयो र्वधात् ।

कलायखञ्जमाह—

प्रक्रामन् वेपते यस्तु खञ्जन्निव च गच्छति ।
कलायखञ्जं तं विद्यात् मुक्तसन्धिप्रबन्धनं ।

वातकण्टकमाह—

रुक्पादे विषमन्यस्ते श्रमाद्वा जायते यदा ।
वातेन गुल्फमाश्रित्य तमाहुर्वातकण्टकं ।

पाददाहमाह—

पादयोः कुरुते दाहं पित्तासृक् सहितोऽनिलः ।
विशेषतश्चंक्रमतः पाददाहं तमादिशेत् ।

पादहर्षमाह—

हृष्येते चरणौ यस्य भवेताञ्चापि सुप्तके ।
पादहर्षः स विज्ञेयः कफवातप्रकोपतः ।

अवबाहुकमाह—

अंसदेशस्थितो वायुः शोषयेदंसबन्धनं ।
शिराश्चाकुञ्च्य तत्रस्थो जनयेदवबाहुकं ।

मूकमिन्मिनादिकमाह—

आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः
नरान् करोत्यक्रियकान् मूकमिन्मिनगद्गदान् ।

वाधिर्य्यमाह—

यदा शब्दवहं स्रोतोवायुरावृत्य तिष्ठति।
शुद्धः श्लेष्मान्वितो वापि बाधिर्य्यं तेन जायते।

कर्णशूलमाह—

हनुशङ्खशिरोग्रीवं यस्य भिन्दन्निवानिलः।
कर्णयोः कुरुते शूलं कर्णशूलं तदुच्यते।

तूनीमाह—

अधो या वेदना याति वर्च्चोमूत्राशयोत्थिता।
भिन्दतीव गुदोपस्थं सा तुनी नाम नामतः।

प्रतितूनीमाह—

गुदोपस्थोत्थिता या तु प्रतिलोमं प्रधाविता।
वेगैः पक्वाशयं याति प्रतितुनीति सोच्यते।

आध्मानमाह—

आटोपमत्युग्ररुज माध्मातमुदरं भृशं।
आध्मानमिति तं विद्याद्घोरं वातनिरोधजं।

प्रत्याध्मानमाह—

विमुक्तपार्श्वहृदयं तदेवामाशयोत्थितं।
प्रत्याध्मानं विजानीयात् कफव्याकुलितानिलं।

वाताष्ठीलामाह—

नाभेरधस्तात् संजातः सञ्चारी यदि वा चलः।
अष्ठीलावद् घनग्रन्थि रूर्द्धमायत उन्नतः।
वाताष्ठीलां विजानीयाद् बहिर्मार्गावरोधिनीं।

प्रत्यष्ठीलामाह—

एतामेव रुजोपेतां वातविरमूत्ररोधिनीं।
प्रत्यष्ठीलामिति वदेज्जठरे तीर्य्यगुत्थितां।

वेपथुमाह—

सर्व्वाङ्गकम्पः शिरसो वायु र्वेपथुसंज्ञकः।

खल्लीमाह—

खल्वो तु पादजङ्घोरुकरमूलावमोटनी।

वायोरावरणभेदमाह—

वायोरावरणं वाऽतो बहुभेदं प्रवक्ष्यते।

पित्तावृतस्य लिङ्गमाह—

लिङ्गं पित्तावृते दाहस्तृष्णा शूलं भ्रमः क्लमः।
कट्वम्ललवणोष्णैश्च विदाहः शीतकामिता।

कफावृतस्य लिङ्गमाह—

शीतगौरवशूलानि कट्वाद्युपशयो ऽधिकम्।
लङ्घनायासरूक्षोष्णकामिता च कफावृते।

रक्तावृतस्य लिङ्गमाह—

रक्तावृते सदाहार्त्तिस्त्वङ्मांसान्तरजो भृशम्।
भवेत् सरागः श्वयथु र्जायन्ते मण्डलानि च।
कठिनाश्च विवर्णाश्च पीड़काः श्वयथुस्तथा।

मांसावृतस्य लिङ्गमाह—

हर्षः पिपीलिकानाञ्च संचार इव मांसगे।

मेदसावृतस्य लिङ्गमाह—

चलः स्निग्धो मृदुः शीतः शोफोऽङ्गेष्वरुचिस्तथा ।
आढ्यवात इति ज्ञेयः स कृच्छ्रो मेदसावृतः ।

अस्थ्यावृतस्य लिङ्गमाह—

स्पर्शमस्थ्यावृते तूष्णं पीड़नञ्चाभिनन्दति ।
संभज्यते स्विद्यति च सूचीभिरिव तुद्यते ।

मज्जावृतस्यलिङ्गमाह—

मज्जावृते विनामः स्यात् जृम्भणं परिवेष्टनम् ।
शूलन्तु पीड्यमाने च पाणिभ्यां लभते सुखम् ।

शुक्रावृतस्य लिङ्गमाह—

शुक्रावेगोऽतिवेगो वा निष्फलत्वञ्च शुक्रगे ।

अन्नावृतस्य लिङ्गमाह—

भुक्ते कुक्षौ च रुक् जीर्णे शाम्यत्यन्नावृते ऽनिले ।

वर्चसावृतस्य लिङ्गमाह—

वर्चसोऽति विबन्धोऽधः स्वे स्थाने परिकृन्तति ।
व्रजतस्तु जरां स्नेहो भुक्ते चानह्यते नरः ।
चिरात् पीड़ितमन्नेन दुःखं शुष्कं शकृत् सृजेत् ।
श्रोणीवङ्क्षणपृष्ठेषु रुग्विलोमश्च मारुतः ।
अस्वस्थं हृदयञ्चैव वर्चसा त्वावृतेऽनिले ।

पित्तकफावृतस्य प्राणवायोर्लिङ्गमाह—

प्राणे पित्तावृते छर्द्दिर्दाहश्चैवोपजायते ।
दौर्बल्यं मदनं तन्द्रा वैरस्यञ्च कफावृते ।

पित्ताकफावृतस्योदानवायोर्लक्षणमाह—

उदाने पित्तयुक्ते तु दाहो मूर्च्छा भ्रमः क्लमः।
रुजोऽतिवृद्धि स्तापश्च योनिमोहनपायुषु।
अस्वेदहर्षौ मन्दोऽग्निः शीतता च कफावृते।

पित्तकफावृतस्य समानवायोर्लक्षणमाह—

स्वेददाहौष्णमूर्च्छाः स्युः समाने पित्तसंवृते।
कफेन सङ्गे विण्मूत्रे गात्रहर्षश्च जायते।

पित्तकफावृतस्यापानवयोर्लक्षणमाह—

अपाने पित्तयुक्ते तु दहौष्णत्यं रक्तमूत्रता।
अधःकाये गुरुत्वञ्च शीतता च कफावृते।

पित्तकफावृतस्य व्यानवायोर्लक्षणमाह—

व्याने पित्तावृते दाहो गात्र विक्षेपणं क्लमः।
गुरुभनो दण्डकश्चापि शूल शोथौ कफावृते।

वायूनामन्यान्यावरणप्रकारं लक्षणञ्चाह—

मारुतानां हि पञ्चाना मन्यान्यावरणे शृणु।
लिङ्गं व्याससमासाभ्यामुच्यमानं मयानघ।
प्राणोवृणोत्यपानादीन् प्राणं वृण्वन्ति तेऽपि च।
उदानाद्या स्तथान्यान्यम् सर्व एव यथाक्रमम्।
विंशतिर्वरणान्येतान्युल्वणानां परस्परम्।
मारुतानां हि पञ्चानां तानि सम्यक् प्रतर्कयेत्।
सर्वेन्द्रियाणां शून्यत्वं ज्ञात्वा स्मृतिवलक्षयम्।

आवृतवातजनितानां रोगानां दुःसाध्यत्वमाह—

आवृता वायवोऽज्ञाता ज्ञाता वा वत्सरं स्थिताः।
प्रयत्नेनापि दुःसाध्या भवेयु र्वाऽनुपक्रमः।

उपद्रवमाह—

हृद्रोगो विद्रधिः प्लीहा गुल्मातीसार एव च।
भवन्त्युपद्रवास्तेषा मावृतानामुपेक्षणात्।

हनुस्तम्भादीनामसाध्यत्वादिकमाह—

हनुस्तम्भार्द्दिताक्षेपपक्षाघातापतानकाः।
कालेन महताव्यानां यत्नात् सिद्ध्यन्ति वा न वा।
नरान् बलवत स्त्वेतान् साधयेन्निरुपद्रवान्।
वीसर्पदाहरुक्सङ्ग-मूर्च्छारुच्यग्निमार्द्दवैः।
क्षीणमांसबलं वाता घ्नन्ति पक्षवधादयः।
शूनं सुप्तत्वचं भग्नं कम्पाध्मान-निपीड़ितं।
रुजार्त्तिमन्तञ्च नरं वातव्याधि र्विनाशयेत्।

वातादीनां दुर्विज्ञेयत्वमाह—

लोके वाय्वर्कसोमानां दुर्विज्ञेया यथा गतिः।
तथा शरीरे वातस्य पित्तस्य च कफस्य च।
क्षयं वृद्धिं समत्वं च तथैवावरणं भिषक्।
विज्ञाय पवनादीनां न प्रमुह्यति कर्म्मसु।

प्रकृतिस्थितानां वायूनां लिङ्गं कार्य्यञ्चाह—

अव्याहतगतिर्य्यस्य स्थानस्थः प्रकृतिस्थितः।
वायुःस्यात् सोऽधिकं जीवेद्वीतरोगः समाःशतम्।

वातरक्ताधिकारः ।

निदानमाह—

विदाह्यन्नं विरुद्धञ्च तत्तच्चासृक्प्रदूषणम् ।
भजतां विधिहीनञ्च स्वप्नजागरमैथुनम् ।
प्रायेण सुकुमाराणा मचंक्रमणशीलिनाम् ।
अभिघातादशुद्धेश्च नृणामसृजि दूषिते ।
कषायकटुतिक्ताल्परूक्षाहारादभोजनात्
हयोष्ट्रयानयानाम्बुक्रीड़ाप्लवनलङ्घनात् ।
उष्णेचात्यध्वगमनाद्व्यवायाद्वेगनिग्रहात् ।

संप्राप्ति माह—

वायुर्विवृद्धो वृद्धेन रक्तेनावारितः पथि ।
क्रुद्ध स्तद्दूषयेद्रक्तं तज्ज्ञेयं वातशोणितम् ।

तस्याश्रयं दर्शयति—

तस्य स्थानं करौ पादावङ्गुल्यः पर्व्वसन्धयः ।
कृत्वाऽऽदौ हस्तपादे तु मूलं देहे विधावति ।

पूर्वरूपमाह—

स्वेदोऽत्यर्थं न वा कार्ष्ण्यं स्पर्शाज्ञत्वं क्षतेऽतिरुक् ।
सन्धिशैथिल्यमालस्यं सदनं पीड़कोद्गमः ।
जानुजंघोरुकट्यंस-हस्तपादाङ्गसन्धिषु ।
निस्तोदः स्फुरणं भेदो गुरुत्वं सुप्तिरेव च ।

कण्डूःसन्धिषु रुग्भूत्वा भूत्वा नश्यति चासकृत्।
वैवर्ण्यं मण्डलोत्पत्तिर्वातासृक् पूर्व्वलक्षणं।

अस्य द्वैविध्यमाह—

उत्तानमथगम्भीरं द्विविधं तत् प्रचक्षते।
त्वङ्मांसाश्रयमुत्तानं गम्भीरन्त्वन्तराश्रयम्।

उत्तानस्य लक्षणमाह—

कण्डू-दाह-रुगायास-तोद-स्फुरण-कुञ्चनै।
रन्विता श्यावरक्ता त्वग्बाह्ये ताम्रा तथेष्यते।

गम्भीरस्य लक्षणमाह—

गम्भीरे श्वयथुः स्तब्धः कठिणोऽन्तर्भृशार्त्तिमान्।
श्यावस्ताम्रोऽथवा दाह-तोद-स्फुरण-पाकवान्।
रुग्विदाहान्वितोऽभीक्ष्णं वायुः सन्ध्यस्थिमज्जसु।
छिन्दन्निव चरत्यन्तर्वक्रीकुर्व्वंश्च वेगवान्।
करोति खञ्जं पङ्गुं वा शरीरे सर्व्वतश्चरन्।

उभयाश्रितस्य लक्षणमाह—

सर्व्वैर्लिङ्गैश्च विज्ञेयं वातासृगुभयाश्रम्।

वातसंसृष्टस्य लक्षणमाह—

वातेऽधिकेऽधिकं तत्र शूलस्फुरण-भञ्जनं।
शोथस्य रौक्ष्यं कृष्णत्व-श्यावता-वृद्धिहानयः।
धमन्यङ्गुलीसन्धीनां सङ्कोचोऽङ्गग्रहोऽतिरुक्।
शीतद्वेषानुपशयौ स्तम्भ-वेपथु-सुप्तयः।

रक्ते शोथोऽतिरुक्तोदस्ताम्रश्चिमिचिमायते।
स्निग्धरूक्षैः शमं नैति कण्डूक्लेदसमन्वितः।

पित्तसंसृष्टस्य लक्षणमाह—

पित्ते विदाहः सम्मोहः स्वेदो मूर्च्छा मदस्तृषा।
स्पर्शासहत्वं रुग्रागः शोथः पाको भृशोष्मता।

कफसंसृष्टस्य लक्षणमाह—

कफे स्तैमित्यगुरुतासुप्तिस्निग्धत्वशीतताः।
कण्डूर्मन्दा च रुग्द्वन्द्वं सर्व्वलिङ्गञ्च सङ्करात्।

असाध्यलक्षणमाह—

आजानु स्फुटितं यच्च प्रभिन्नं प्रस्नुतञ्च यत्।
उपद्रवैश्च यज्जुष्टं प्राणमांसक्षयादिभिः।
वातरक्तमसाध्यं स्याद् याप्यं सम्वत्सरोत्थितं।

उपद्रवमाह—

अस्वप्नारोचकश्वासमांसकोथशिरोग्रहाः।
मूर्च्छातिमदरुक्तृष्णाज्वरमोहप्रवेपकाः।
हिक्कापाङ्गुल्यवीसर्पपाकतोदभ्रमक्लमाः।
अङ्गुलीवक्रतास्फोटदाहमर्म्मग्रहार्व्वुदाः।
एतैरुपद्रवैर्व्वर्ज्ज्यं मोहेनैकेन वापि यत्।

याप्यत्वादिकमाह—

अक्षतस्नोपद्रवं याप्यं साध्यं स्यान्निरुपद्रवं।
एकदोषानुगं साध्यं नवं याप्यं द्विदोषजं।
त्रिदोषजमसाध्यं स्याद् यस्य च स्युरुपद्रवाः।

ऊरुस्तम्भाधिकारः ।

निदानसंप्राप्तिलक्षणान्याह—

शीतोष्णद्रवसंशुष्कगुरुस्निग्धै र्निषेवितैः ।
जीर्णाजीर्णे तथायाससङ्क्षोभस्वप्नजागरैः ।
सश्लेषमेदः पवनः साममत्यर्थसञ्चितं ।
अभिभूयेतरं दोष मुरुचेत् प्रतिपद्यते ।
सक्थ्यस्थीनि प्रपूर्य्यान्तः श्लेषणा स्तिमितेन च ।
तदा स्तभ्नाति तेनोरु स्तब्धौ शीतावचेतनौ ।
परकीयाविव गुरू स्याता मतिभृशव्यथौ ।
ध्यानाङ्गमर्द्द-स्तैमित्य-तन्द्रा-छर्द्द्यरुचिज्वरैः ।
संयुक्तौ पादसदन-कृच्छ्रोद्धरणसुप्तिभिः ।
तमूरुस्तम्भमित्याहु राढ्यवातमथापरे ।

पूर्व्वरूपमाह—

प्राग्रूपं तस्य निद्रातिध्यानं स्तिमितता ज्वरः ।
रोमहर्षोऽरुचिश्छर्द्दि र्जङ्घोर्व्वोः सदनं तथा ।

मोहप्रयुक्तस्नेहजनितमनुपशयं विवृणोति—

वातशङ्किभिरज्ञानात्तस्य स्यात् स्नेहनात् पुनः ।
पादयोः सदनं सुप्तिः कृच्छ्रादुद्धरणं तथा ।
जङ्घोरुग्लानिरत्यर्थं शश्वच्चादाहवेदने ।
पादश्च व्यथते न्यस्तं शीतस्पर्शं न वेत्ति च ।

संस्थाने पीड़ने गत्यां चालने चाप्यनीश्वरः।

अन्यनेयौ हि संभग्नावूरुपादौ च मन्यते।
यदा दाहार्त्तितोदार्त्तो वेपनः पुरुषो भवेत्।
ऊरुस्तम्भस्तदा हन्यात् साधयेदन्यथा नवं।

आमवाताधिकारः।

निदानसंप्राप्तिलक्षणान्याह—

विरुद्धाहारचेष्टस्य मन्दाग्नेर्निश्चलस्य च।
स्निग्धं भुक्तवतोह्यन्नं व्यायामं कुर्व्वतस्तथा।
वायुना प्रेरितो ह्यामः श्लेष्मस्थानं प्रधावति।
तेनात्यर्थं विदग्धोऽसौ धमनीः प्रतिपद्यते।
वातपित्तकफैर्भूयो दूषितः सोऽन्नजो रसः।
स्रोतांस्यभिष्यन्दयति नानावर्णोऽतिपिच्छिलः।
जनयत्याशु दौर्व्वल्यं गौरवं हृदयस्य च।
व्याधीनामाश्रयो ह्येष आमसंज्ञोऽति दारुणः।
युगपत् कुपितावन्त स्त्रिकसन्धि प्रवेशकौ।
स्तब्धं वा कुरुतो गात्र मामवातः स उच्यते।

सामान्यलक्षणमाह—

अङ्गमर्द्दोऽरुचिस्तृष्णा चालस्यं गौरवं ज्वरः।
अपाकः शूनताङ्गानामामवातस्य लक्षणं।

अतिवृद्धस्य रूपमाह—

स कष्टः सर्व्वरोगाणां यदा प्रकुपितो भवेत्।
हस्तपादशिरोगुल्फत्रिकजानूरुसन्धिषु।
करोति सरुजं शोथं यत्र दोषः प्रपद्यते।
स देशोरुज्यतेऽत्यर्थं व्याविद्ध इव वृश्चिकैः।

दोषभेदेन विशेषलक्षणान्याह—

पित्तात् सदाहरागञ्च सशूलं पवनानुगं।
स्तिमितं गुरुकण्डूञ्च कफदुष्टं तमादिशेत्।

उपद्रवमाह—

जनयेत् सोऽग्निदौर्व्वल्यं प्रसेकारुचिगौरवं।
उत्साहहानिं वैरस्यं दाहञ्च बहुमूत्रतां।
कुक्षौ कठिनतां शूलं तथा निद्रा-विपर्य्ययं।
तृट्छर्द्दिभ्रममूर्च्छाश्च हृद्ग्रहं विड्विबद्धतां।
जाड्यान्त्रकूजमानाहं कष्टांश्चान्यानुपद्रवान्।

साध्ययाप्यत्वादिलक्षणमाह—

एकदोषानुगः साध्यो द्विदोषो याप्य उच्यते।
सर्व्वदेहचरः शोथः स कृच्छ्रः सान्निपातिकः।

———

शूलाधिकारः ।

प्रागुत्पत्तिमाह—

अनङ्गनाशाय हरस्त्रिशूलं मुमोच कोपान्मकरध्वजस्य ।
तमापतन्तं सहसा निरीक्ष्य भयार्द्दितो विष्णुतनुं प्रविष्टः ।
स विष्णुहुङ्कार विमोहितात्मा पपात भूमौ प्रथितः स शूलः ।
स पञ्चभूतानुगतं शरीरं प्रदूषयत्यस्य हि पूर्व्वसृष्टिः ।

संख्यामाह—

दोषैः पृथक् समस्तामद्वन्द्वैः शूलोऽष्टधा भवेत् ।

सर्व्वेषु वायुप्राधान्यमाह—

सर्व्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः ।

वातशूलनिदानमाह—

व्यायामयानादतिमैथुनाच्च प्रजागराच्छीतजलातिपानात् ।
कलायमुद्गाढ़किकोरदूषा-दत्यर्थरुक्षाध्यशनाभिघातात् ।
कषायतिक्तातिविरूढ़जान्नविरुद्धवल्लूरकशुष्कशाकात् ।
विट्शुक्रमूत्रानिलवेगरोधात् शोकोपवासादतिहास्यभाष्यात् ।

तस्य स्थानमाह—

वायुः प्रवृद्धोजनयेद्धि शूलं हृत्पार्श्वपृष्ठत्रिकवस्तिदेशे ।

वृद्ध्यागमनयोः कालमाह—

जीर्णे प्रदोषे च घनागमे च शीते च कोपं समुपैति गाढ़ं ।

लक्षणमाह—

मुहुर्मुहुस्चोपशमप्रकोपी विड्-वातसंस्तम्भनतोदभेदैः ॥

तस्योपशयमाह—

संस्वेदनाभ्यञ्जनमर्द्दनाद्यैः स्निग्धोष्णभोज्यैश्च शमं प्रयाति ॥

पित्तशूलनिदानमाह—

क्षारातितीक्ष्णोष्णविदाहितैल-निष्पावपिण्याककुलत्थयूषैः ।
कट्वम्लसौवीरसुराविकारैः क्रोधानलायासरविप्रतापैः ।
ग्राम्यातियोगादशनैर्विदग्धैः पित्तं प्रकुप्याशु करोति शूलं ॥

स्थानं लक्षणञ्चाह—

तृष्णामोहदाहार्त्तिकरं हि नाभ्यां संस्वेदमूर्च्छाभ्रमचोषयुक्तं ॥

वृद्ध्यागमनयोः कालमाह—

मध्यन्दिने कुप्यति चार्द्धरात्रे विदाहकाले जलदात्यये च ।

तस्योपशयमाह—

शीते च शीतैः समुपैति शान्तिं सुस्वादुशीतैरपि भोजनैश्च ॥

कफशूलमाह—

आनूपवारिजकिलाटपयोविकारै
र्मांसेक्षुपिष्टकृशरातिलशष्कुलीभि ।
रन्यैर्बलासजनकैरपि हेतुभिश्च
श्लेष्मा प्रकोपमुपगम्य करोति शूलं ।

लक्षणमाह—

हृल्लासकासमदनारुचिसंप्रसेकै

रामाशये स्तिमितकोष्ठशिरोगुरुत्वैः।

वृद्ध्यागमनयोः कालमाह—

भुक्ते सदैव हि रुजं कुरुतेऽतिमात्रं

सूर्य्योदयेऽथ शिशिरे कुसुमागमे च।

त्रिदोषजशूलमाह—

सर्व्वेषु दोषेषु च सर्व्वलिङ्गं विद्याद्भिषक्सर्व्वभवं हि शूलं।

दोषभेदेनासाध्यत्वमाह—

सुकष्टमेनं विषवज्रकल्पं विवर्ज्जनीयं प्रवदन्ति तज्ज्ञाः।

एकदोषोत्थितः साध्यः कृच्छ्रसाध्यो द्विदोषजः।

सर्व्वदोषोत्थितो घोर स्त्वसाध्यो भूर्य्युपद्रवः।

आमशूलमाह—

आटोपहृल्लासवमीगुरुत्वस्तैमित्यमानाहकफप्रसेकैः।

कफस्य लिङ्गेन समानलिङ्गमामोद्भवं शूलमुदाहरन्ति।

दोषभेदेन स्थानान्याह—

वातात्मकं वस्तिगतं वदन्ति पित्तात्मकञ्चापि वदन्ति नाभ्यां।

हृत्पार्श्व-कुक्षौ कफसन्निविष्टं सर्व्वेषु देशेषु च सन्निपातं।

वस्तिहृत्पार्श्वपृष्ठेषु स शूलः कफवातिकः।

कुक्षौ हृन्नाभिमध्येषु स शूलः कफपैत्तिकः।

दाहज्वरकरो घोरोविज्ञेयो वातपैत्तिकः।

परिणामशूलमाह—

स्वैर्निदानैः प्रकुपितोवायुः सन्निहितस्तदा ।
कफपित्ते समावृत्य शूलकारी भवेद्वली ।
भुक्ते जीर्य्यति यच्छूलं तदेव परिणामजं ।
तस्य लक्षणमप्येतत् समासेनाभिधीयते ।

वातजपरिणामशूलमाह—

आध्मानाटोपविण्मूत्रविबन्धारतिवेपनैः ।
स्निग्धोष्णोपशमप्रायं वातिकं तद्वदेद्भिषक् ।

पित्तजपरिणामशूलमाह—

तृष्णादाहारतिस्वेदं कट्वम्ललवणोत्तरं ।
शूलं शीतशमप्रायं पैत्तिकं लक्षयेद्बुधः ।

कफजपरिणामशूलमाह—

छर्द्दि-हृल्लास-संमोहं स्वल्परुग् दीर्घसन्तति ।
कटुतिक्तोपशान्तञ्च तच्च ज्ञेयं कफात्मकं ।

द्विदोषजमाह—

संसृष्टलक्षणं तेषां द्विदोषं परिकल्पयेत् ।

असाध्यलक्षणमाह—

त्रिदोषजमसाध्यन्तु क्षीणमांसबलानलं ।
वेदनातितृषा मूर्च्छा आनाहो गौरवं ज्वरः ।
भ्रमोऽरुचिः कृशत्वञ्च बलहानिस्तथैव च ।
उपद्रवा दशैवैते यस्य शूलेषु नास्ति सः ।

अन्नद्रवाख्यं शूलमाह—

जीर्णे जीर्य्यत्यजीर्णे वा यच्छूलमुपजायते।
पथ्यापथ्यप्रयोगेन भोजनाभोजनेन च।
न शमं याति नियमात् सोऽन्नद्रव उदाहृतः।
अन्नद्रवाख्यशूलेषु न तावत् स्वास्थ्यमश्नुते।
वान्तमात्रे जरत्पित्ते शूलमाशु व्यपोहति।

पार्श्वशूलमाह—

रुणद्धि मारुतं श्लेष्मा कुक्षिपार्श्वव्यवस्थितः।
स संरुद्धः करोत्याशु ध्मानं गुड़्गुड़ायनम्।
सूचीभिरिव निस्तोदः कृच्छ्रोच्छ्वासी तदा नरः।
नान्नं वाञ्छति नो निद्रामुपैत्यर्त्तिनिपीड़ितः।
पार्श्वशूलः स विज्ञेयः कफानिलसमुद्भवः।

कुक्षिशूलमाह—

प्रकुप्यति यदा कुक्षौ वह्निमाक्रम्य मारुतः।
तदास्य भोजनं भुक्तं सोपस्तम्भं न पच्यते।
उच्छ्वसित्यामशक्तता शूलेनाहन्यते मुहुः।
नैवासने न शयने तिष्ठन्न लभते सुखम्।
कुक्षिशूल इति ख्यातो वातादामसमुद्भवः।

हृच्छूलमाह—

कफोत्पत्तावरुद्धस्तु मारुतो रसमूर्च्छितः।
हृदिस्थः कुरुते शूलमुच्छ्वासरोधकं परम्।
स हृच्छूल इति ख्यातो रसमारुतसम्भवः।

वस्तिशूलमाह—

संरोधात् कुपितोवायु र्वस्तिमावृत्य तिष्ठति।
वस्तिवङ्क्षणनाभोषु ततः शूलोऽस्यजायते।
विरमूत्रवातसंरोधी वस्तिशूलः स मारुतात्।

मूत्रशूलमाह—

नाभ्यां वङ्क्षणपार्श्वेषु कुक्षौ मेढ्रान्त्रमर्द्दकः।
मूत्रमावृत्य गृह्णाति मूत्रशूलः स मारुतात्।

विट्शूलमाह—

वायुः प्रकुपितो यस्य रुक्षाहारस्य देहिनः।
मलं रुणद्धि कोष्ठस्थं मन्दीकृत्य तु पावकम्।
शूलं सञ्जनयंस्तीव्रं स्रोतांस्यावृत्य तस्य हि।
दक्षिणं यदि वा वामं कुक्षिमादाय जायते।
सर्व्वत्र वर्द्धते क्षिप्रं शूलं तत्र सघोषवत्।
पिपासा वर्द्धते तीव्रा भ्रमोमूर्च्छा च जायते।
उच्चारितो मूत्रितश्च न शान्ति मधिगच्छति।
विट्शूल मेतज्जानीयात् भिषक् परमदारुणम्॥

उदावर्त्तानाहाधिकारः।

उदावर्त्त निदानमाह—

वातविरमूत्रजृम्भाश्रुक्षवोद्गारवमीन्द्रियः।
क्षुत्तृष्णोच्छ्वासनिद्रानां धृत्योदावर्त्तसम्भवः।

अपानवायोर्वेगविधारणात् ये रोगास्तानाह—

वातमूत्रपुरीषाणां सङ्गाध्मानं क्लमोरुजा।
जठरे वातजाश्चान्ये रोगाः स्युर्वातनिग्रहात्।

पुरीषोदावर्त्तस्य लक्षणमाह—

आटोपशूलौ परिकर्त्तिका च सङ्गः पुरीषस्य तथोर्द्ध्ववातः।
पुरीषमास्यादथवा निरेति पुरीषवेगेऽभिहते नरस्य।

मूत्रोदावर्त्तस्य लक्षणमाह—

वस्तिमेहनयोः शूलं मूत्रकृच्छ्रं शिरोरुजा।
विनामो वङ्क्षणानाहः स्याल्लिङ्गं मूत्रनिग्रहे।

जृम्भोदावर्त्त लक्षणमाह—

मन्यागलस्तम्भशिरोविकारा जृम्भोपघातात् पवनात्मकाः स्युः।
तथाक्षिनासावदनामयाश्च भवन्ति तीव्राः सह कर्णरोगैः।

अश्रुजोदावर्त्त लक्षणमाह—

आनन्दजं वाप्यथ शोकजं वा नेत्रोदकं प्राप्तममुञ्चतो हि।
शिरोगुरुत्वं नयनामयाश्च भवन्ति तीव्राः सह पीनसेन।

क्षवोदावर्त्त लक्षणमाह—

मन्यास्तम्भः शिरःशूल मर्द्दितार्द्धावभेदकौ।
इन्द्रियाणाञ्च दौर्व्वल्यं क्षवथोः स्याद्विधारणात्।

उद्गारोदावर्त्त लक्षणमाह—

कण्ठास्य पूर्णत्वमतीवतोदः कूजश्च वायो रथवाप्रवृत्तिः।
उद्गारवेगेऽभिहते भवन्ति घोरा विकाराः पवनप्रसूताः।

छर्द्युदावर्त्तलक्षणमाह—

कण्डूकोठारुचिव्यङ्ग-शोथपाण्ड्वामयज्वराः ।
कुष्ठवीसर्पहृल्लासा छर्द्दिनिग्रहजा गदाः ।

शुक्रोदावर्त्तलक्षणमाह—

मूत्राशये वै गुदमुष्कयोश्च शोथोरुजा मूत्रविनिग्रहश्च ।
शुक्राश्मरी तत् स्रवणं भवेच्च ते ते विकारा विहते च शुक्रे ।

क्षुधोदावर्त्तलक्षणमाह—

तन्द्राङ्गमर्द्दावरुचिः श्रमश्च क्षुधाभिघातात् कृशता च दृष्टेः ।

तृष्णोदावर्त्तलक्षणमाह—

कण्ठास्यशोषः श्रवणावरोध स्तृष्णाविघाताद्धृदये व्यथा च ।

उच्छ्वासोदावर्त्तलक्षणमाह—

श्रान्तस्य निःश्वासविनिग्रहेण हृद्रोगमोहावथवापि गुल्मः ।

निद्रोदावर्त्तलक्षणमाह—

जृम्भाङ्गमर्द्दोऽक्षिशिरोऽतिजाड्यं निद्राभिघातादथवापि तन्द्रा ।
वहूनन्यांश्च लभते विकारान् वातकोपजान् ।

आनाहमाह—

आमं शकृद्वा निचितं क्रमेण भूयोविवद्धं विगुणानिलेन ।
प्रवर्त्तमानं न यथास्वमेनं विकारमानाह मुदाहरन्ति ।
तस्मिन् भवन्त्यामसमुद्भवे तु तृष्णाप्रतिश्यायशिरोविदाहाः ।

आमाशये शूलमथो गुरुत्वं हृत्स्तम्भ उद्गारविघातनञ्च।
स्तम्भः कटीपृष्टपुरीषमूत्रे शूलोऽथ मूर्च्छा शकृतश्च छर्दिः।
शोथश्च पक्काशयजे भवन्ति तथालसोत्थानि च लक्षणानि।

असाध्यलक्षणमाह—

तृष्णार्दितं परिक्लिष्टं क्षीणं शूलैरुपद्रुतं।
शकृद्वमन्तं मतिमानुदावर्त्तिनमुत्सृजेत्।

गुल्माधिकारः।

गुल्मसाधारणनिदानमाह—

ज्वरच्छर्द्यतिसाराद्यै र्वमनाद्यैश्चकर्म्मभिः।
कर्शितो वातलान्यत्ति शीतं वाम्बु बुभुक्षितः।
यः पिवत्यनु चान्नानि लङ्घनं प्लवनादिकम्।
सेवते देहसंक्षोभि छर्दिं वा समुदीरयेत्।
अनुदीर्णानुदीर्णान् वा वातादीन् न विमुञ्चति।
स्नेहस्वेदा वनभ्यस्य शोधनं वा निषेवते।
शुद्धो वाश्च विदाहीनि भजते स्यन्दनानि वा।

साधारणसंप्राप्तिमाह—

वातोल्वणास्तस्य मलाः पृथक् क्रुद्धा द्विशोऽथवा।
सर्वे वा रक्तयुक्ता वा महास्रोतोऽनुशायिनः।

ऊर्द्ध्वाधोमार्गमावृत्य कुर्वते शूलपूर्वकम्।
स्पर्शोपलभ्यं गुल्माख्यमुत्प्लुतं ग्रन्थिरूपिणम्। *

संख्यामाह—

गुल्मोऽष्टधा पृथग्दोषैः संसृष्टैर्निचयं गतैः।
आर्त्तवस्य च दोषेण नारीणां जायतेऽष्टमः।

गुल्मपूर्व्वरूपमाह—

उद्गारबाहुल्यपुरीषबद्धतृप्त्यक्षमत्वान्त्रविकूजनानि।
आटोपमाध्मानमपक्तिशक्तिरासन्नगुल्मस्य वदन्ति चिह्नम्।

सर्व्वगुल्मसामान्यलक्षणमाह—

अरुचिः कृच्छ्रविण्मूत्रवातताऽन्त्रविकूजनं।
आनाहश्चोर्द्ध्ववातत्वं सर्वगुल्मेषु लक्षयेत्।

वातगुल्महेतुमाह—

रूक्षान्नपानं विषमातिमात्रं विचेष्टनं वेगविनिग्रहश्च।
शोकोऽभिघातोऽतिमलक्षयश्च निरन्नता चानिलगुल्महेतुः

---

* प्रपूर्त्तिः—वातादिगुल्मानां चरकोक्ता संप्राप्तिर्यथा—"स (वायुः) प्रकुपितो महास्रोतोऽनुप्रविश्य रौक्ष्यात् कठिनीकृत्याप्लुत्य पिण्डितोऽवस्थानं करोति। हृदि वस्तौ पार्श्वयोर्नाभ्यां वा शूलमुपजनयति। तत् (पित्तं) प्रकुपितं मारुत आमाशयैकदेशे संवर्त्य तानेव वेदनाप्रकारानुपजनयति य उक्ता वातगुल्मे। तं (श्लेष्माणं) प्रकुपितं मारुत आमाशयैकदेशे संवर्त्य तानेव वेदनाप्रकारानुपजनयति य उक्ता वातगुल्मे।

वातजस्य निदानपूर्व्विकां संप्राप्तिमाह—

कर्षनात् कफविट्पित्तैर्मार्गस्यावरणेन वा।
वायुः कृताशयः कोष्ठे रौच्यात् काठिन्यमागतः।
स्वतन्त्रः स्वाश्रये दुष्टः परतन्त्रः पराश्रये।
पिण्डितत्वा दमूर्त्तोऽपि मूर्त्तत्वमिव संश्रितः।

वातगुल्मलक्षणमाह—

वातान्मन्याशिरःशूलं ज्वरप्लीहान्त्रकूजनम्।
व्यधः सूच्येव विट्सङ्गः कृच्छ्रादुच्छ्वसनं मुहुः।
स्तम्भो गात्रे मुखे शोषः कार्श्यं विषमवह्निता।
रूक्षकृष्णत्वगादित्वं चलत्वादनिलस्य च।
अनिरूपितसंस्थानस्थानवृद्धिक्षयव्यथः।
पिपीलिकाव्याप्त इव गुल्मः स्फुरति तुद्यते।
करोति जीर्णे त्वधिकं प्रकोपं भुक्ते मृदुत्वं समुपैति यश्च।
वातात् स गुल्मो न च तत्र रूक्षं कषायतिक्तं कटु चोपशेते।

पित्तगुल्महेतुमाह—

ज्वरः पिपासा वदनाङ्गरागः शूलं महज्जीर्य्यति भोजने च।
स्वेदो विदाहो व्रणवच्च गुल्मः स्पर्शासहः पैत्तिकगुल्मरूपं।

पित्तगुल्मलक्षणमाह—

कट्वम्लतीक्ष्णोष्णविदाहिरूक्षक्रोधातिमद्यार्कहुताशसेवा।
आमाभिघातो रुधिरञ्च दुष्टं पैत्तस्य गुल्मस्य निमित्त मुक्तं।

श्लेष्मजत्रिदोषजयोर्हेतुमाह—

शीतं गुरुस्निग्धमचेष्टनञ्च संपूरणं प्रस्वपनं दिवा च।
गुल्मस्य हेतुः कफसम्भवस्य सर्व्वस्तु दुष्टो निचयात्मकस्य।

कफगुल्मलक्षणमाह—

स्तैमित्यशीतज्वरगात्रसाद-हृल्लासकासारुचिगौरवाणि ।
शैत्यं रुगल्पा कठिनोन्नतत्वं गुल्मस्य रूपाणि कफात्मकस्य ।

द्वन्द्वजगुल्मानाह—

स्वदोषस्थानधामानः स्वे स्वे काले च रुक्कराः ।
प्रायस्त्रयस्तु द्वन्द्वोत्था गुल्माः संसृष्टलक्षणाः ।

त्रिदोषजगुल्मलक्षणमाह—

महारुजं दाहपरीतमश्मवद्घनोन्नतं शीघ्रविदाहि दारुणं ।
मनःशरीराग्निवलापहारिणं त्रिदोषजं गुल्ममसाध्यमादिशेत् ।

रक्तगुल्मस्य निदानसंप्राप्तिलक्षणान्याह—

ऋतौ वा नवसूता वा यदि वा योनिरोगिणी ।
सेवते वातलानि * स्त्री क्रुद्धस्तस्याः समीरणः ।
निरुणद्ध्यार्त्तवं योन्यां प्रतिमासमवस्थितम् ।
कुक्षिं करोति तद् गर्भलिङ्गमाविष्करोति च ।
हृल्लासदौहृदस्तन्यदर्शनं चामतादिकम् ।
क्रमेण वायुसंसर्गात् पित्तयोनितया च तत् ।
शोणितं कुरुते तस्या वातपित्तोत्थगुल्मजान् ।
रुक्स्तम्भदाहातीसारतृड्ज्वरादीनुपद्रवान् ।
गर्भाशये च सुतरां शूलं दुष्टासृगाश्रये ।
योन्याश्च स्रावदौर्गन्ध्यतोदस्पन्दनवेदनाः ।

---

* ऋतावनाहारतया भयेन विरूक्षणैर्वेगविधारणैश्च ।

गर्भलक्षणाद्रक्तगुल्मस्य विलक्षणं लक्षणमाह—

न चाङ्गै गर्भवद्गुल्मः स्फुरत्यपि च शूलवान्।
पिण्डीभूतः स एवास्याः कदाचित् स्पन्दतेऽचिरात्।
न चास्या वर्द्धते कुक्षिर्गुल्म एव तु वर्द्धते।

विद्रधिगुल्मयोर्भेदं दर्शयति—

स्वदोषसंश्रयो गुल्मः सर्वो भवति तेन सः।
पाकं चिरेण भजते नैव वा विद्रधिः पुनः।
पच्यते शीघ्र मत्यर्थं दुष्टरक्ताश्रयत्वतः।
अतः शीघ्रविदाहित्वाद् विद्रधिः सोऽभिधीयते।

बाह्याभ्यन्तरगुल्मलक्षणमाह—

गुल्मेऽन्तराश्रये वस्तिकुक्षिहृत्प्लीहवेदनाः।
अग्निवर्णवलभ्रंशो वेगानाञ्चाप्रवर्त्तनम्।
अतो विपर्य्ययो बाह्ये कोष्ठाङ्गेषु तु नातिरुक्।
वैवर्ण्यमवकाशस्य वहिरुन्नतताधिकम्।

असाध्यलक्षणमाह—

सञ्चितः क्रमशो गुल्मो महावास्तुपरिग्रहः।
कृतमूलः सिरानद्धा यदा कूर्म इवोत्थितः।
दौर्वल्यारुचिहृल्लासकासच्छर्द्द्यरतिज्वरैः।
तृष्णातन्द्राप्रतिश्यायैर्युज्यते स न सिध्यति।
गृहीत्वा सज्वरं श्वास-च्छर्द्यतीसारपीड़ितं।
हृन्नाभिहस्तपादेषु शोथः कर्षति गुल्मिनं।

श्वासः शूलं पिपासान्नविद्वेषो ग्रन्थिमूढ़ता।
जायते दुर्बलत्वञ्च गुल्मिनो मरणाय वै।

हृद्रोगाधिकारः।

निदानमाह—

अत्युष्णगुर्वन्नकषायतिक्त-श्रमाभिघाताध्यशनप्रसङ्गैः।
संचिन्तनैर्वेगविधारणैश्च हृदामयः पञ्चविधः प्रदिष्टः।

संप्राप्तिमाह—

दूषयित्वा रसं दोषा विगुणा हृदयं गताः।
हृदि वाधां प्रकुर्वन्ति हृद्रोगन्तं प्रचक्षते।

वातजमाह—

वातेन शूल्यतेऽत्यर्थं तुद्यते स्फुटतीव च।
भिद्यते शुष्यति स्तब्धं हृदयं शून्यता द्रवः।
अकस्माद् दीनता शोको भयं शब्दासहिष्णुता।
वेपथुर्वेष्टनं मोहः श्वासरोधोऽल्पनिद्रता।

पित्तजमाह—

पित्तात् तृष्णा भ्रमोमूर्च्छा दाहः स्वेदोऽम्लकः क्लमः।
छर्द्दनञ्चाम्लपित्तस्य धूमकः पीतता ज्वरः।

श्लेष्मजमाह—

श्लेष्मणा हृदयं स्तब्धं भारिकं साश्मगर्भवत्।
कासाग्निसादनिष्ठीवनिद्रालस्यारुचिज्वराः।

सन्निपातं क्रिमिजञ्च हृद्रोगमाह—

सर्वलिङ्ग स्त्रिभि र्दोषैः क्रिमिभिः श्यावनेत्रता ।
तमःप्रवेशो हृल्लासः शोषः कण्डूः कफस्रुतिः ।
हृदयं प्रततञ्चात्र क्रकचेनेव दार्य्यते ॥

उपद्रवनाह—

क्लमः सादो भ्रमः शोषो ज्ञेया स्तेषामुपद्रवाः ।
क्रिमिजे क्रिमिजातीनां श्लैष्मिकाणाञ्च ये मताः ।

मूत्रकृच्छ्राधिकारः ।

निदानं संख्याञ्चाह—

व्यायामतीक्ष्णौषधरुक्षमद्य प्रसङ्गनित्यद्रुतपृष्ठयानात् ।
आनूपमांसाध्यशनादजीर्णात् स्युर्मूत्रकृच्छ्राणि नृणां तथाष्टौ ।

अष्टत्वं विभजते—

वातेन पित्तेन कफेन सर्व्वैस्तथाभिघातैः ।
शकृदश्मरीभ्यां तथापरः शर्करया सुकष्टः ।

संप्रातिमाह—

पृथक् मलाःस्वैः कुपिता निदानैः सर्व्वेऽथवा कोपमुपेत्य वस्तौ ।
मूत्रस्य मार्गं परिपीड़यन्ति यदा तदा मूत्रयतीह कृच्छ्रात् ।

वातजमूत्रकृच्छ्रमाह—

तीव्रा हि रुग्वङ्क्षणवस्तिमेढ्रे स्वल्पं मुहुर्मूत्रयतीह वातात् ।

कफजमाह—

पीतं सरक्तं सरुजं सदाहं कृच्छ्रं मुहुर्मूत्रयतीह पित्तात्।

पित्तजमाह—

वस्तेः सलिङ्गस्य गुरुत्वशोथौ मूत्रं सपिच्छं कफमूत्रकृच्छ्रे।

सन्निपातजमाह—

सर्वाणि रूपाणि तु सन्निपातात्।
भवन्ति तत् कृच्छ्रतमं हि कृच्छ्रं।

अभिघातजमाह—

मूत्रवाहिषु शल्येन क्षतेष्वभिहतेषु वा।
मूत्रकृच्छ्रं तदाघाताज्जायते भृशदारुणं।

तस्य लक्षणमतिदेशिनाह—

वातकृच्छ्रेन तुल्यानि तस्य लिङ्गानि निर्द्दिशेत्।

शकृज्जं मूत्रकृच्छ्रमाह—

शकृतस्तु प्रतीघातात् वायुर्विगुणतां गतः।
आध्मानं वातशूलञ्च मूत्रसङ्गं करोति च।

अश्मरीजं मूत्रकृच्छ्रमाह—

अश्मरीहेतु तत्पूर्व्वं मूत्रकृच्छ्रमुदाहरेत्।

शर्कराजं मूत्रकृच्छ्रमाह—

हृत्पीड़ा वेपथुःशूलं कुक्षावग्निश्च दुर्व्वलः।
तया भवति मूर्च्छा च मूत्रकृच्छ्रञ्च दारुणं।

प्रपूर्त्तिः—शुक्रं दोषैरुपहतं मूत्रमार्गे विधावति। सशुक्रं मूत्रयेत् कृच्छ्रात् वस्तिमेहनशूलवान्।

मूत्रवेगनिरस्ताभिः प्रशमं याति वेदना ।
यावदस्याः पुनर्नैति गुड़िका स्रोतसो मुखं ।

मूत्रघाताधिकारः ।

मूत्रघातानाह—

जायन्ते कुपितैर्दोषैर्मूत्र घातास्त्रयोदश ।
प्रायो मूत्रविघाताद्यैर्वातकुण्डलिकादयः ।

वातकुण्डलि [illegible]माह—

रौक्ष्याद्वेगविघाताद्वा वायु र्वस्तौ सवेदनः ।
मूत्रमाविश्य चरति विगुणः कुण्डलीकृतः ।
मूत्रमल्पाल्पमथवा सरुजं वा प्रवर्त्तते
वातकुण्डलिकां तान्तु व्याधिं विद्यात् सुदारुणं ।

अष्ठीलामाह—

आध्मापयन् वस्तिगुदं रुद्ध्वावायुश्चलोन्नतं ।
कुर्य्यात्तीव्रार्त्तिमष्ठोलां मूत्रविण्मार्गरोधिनीं ।
वेगं विधारयेद् यस्तु मूत्रस्याकुशलो नरः ।
निरुणद्धि मुखं तस्य वस्ते र्वस्तिगतोऽनिलः ।
मूत्रसङ्गो भवेत्तेन वस्तिकुक्षिनिपोड़ितः ।
वातवस्तिः स विज्ञेयो व्याधिःकृच्छ्रप्रसाधनः ।

मूत्रातीतमाह—

सन्धार्य्य वेगं मूत्रस्य यो भूयः स्रष्टुमिच्छति ।
तस्य नाभ्येति यदि वा कथञ्चित् संप्रवर्त्तते ।

प्रवाहतो मन्दरुजमल्पमल्पं पुनः पुनः ।
मूत्रातीतन्तु तं विद्यान्मूत्रवेगविघातजम् ।

मूत्रजठरमाह—

विधारणात् प्रतिहतं वातोदावर्त्तितं यदा ।
नाभेरधस्तादुदरं मूत्रमापूरयेत्तदा ।
कुर्य्यात्तीव्ररुगाध्मानमपक्तिं मलसंग्रहं ।
तन्मूत्रजठरं विद्यादधोवस्तिनिरोधनम् ।

मूत्रोत्सङ्गमाह—

मूत्रस्रोतःपथच्छिद्रवैगुण्येनानिलेन वा ।
आक्षिप्तमल्पमूत्रन्तु वस्तौ नालेऽथवा मणौ ।
स्थित्वा स्रवेच्छनैः पश्चात् सरुजं वाथवारुजं ।
मूत्रोत्सङ्गः स विच्छिन्नतच्छेषगुरुशेफसः ।

मूत्रग्रन्थिमाह—

रक्तं वातकफाद्दुष्टं वस्तिद्वारे सुदारुणम् ।
ग्रन्थिं कुर्य्यात् स कृच्छ्रेण सृजेन्मूत्रं तदावृतं ।
अश्मरीसमशूलं तं मूत्रग्रन्थिं प्रचक्षते ।
वस्तौ वाप्यथवा नाभौ मणौवा यस्य देहिनः ।

मूत्रक्षयमाह—

रुक्षस्य क्लान्तदेहस्य वस्तिस्थौ पित्तमारुतौ ।
मूत्रक्षयं सरुग्दाहं जनयेतां तदाह्वयं ।

मूत्रशुक्रमाह—

मूत्रितस्य स्त्रियं यातो वायुना शुक्रमुद्धतं।
स्थानाच्च्युतं मूत्रयतः प्राक् पश्चाद्वा प्रवर्त्तते।
भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते।

उष्णवातमाह—

पित्तं व्यायामतीक्ष्णोष्णाभोजनाध्वातपादिभिः।
प्रवृद्धं वायुनाक्षिप्तं वस्त्युपस्थार्त्तिदाहवत्।
मूत्रं प्रवर्त्तयेत् पीतं सरक्तं रक्तमेव वा।
उष्णं पुनः पुनः कृच्छ्रादुष्णवातं वदन्ति तम्।

मूत्रसादमाह—

पित्तं कफोद्वावपि वा संहन्येतेऽनिलेन चेत्।
कृच्छ्रान्मूत्रं तदा पीतं श्वेतं रक्तं घनं सृजेत्।
सदाहं रोचनाशङ्खचूर्णवर्णं भवेत्तु तत्।
शुष्कं समस्तवर्णं वा मूत्रसादं वदन्ति तं।

(क) प्रपूर्त्तिः—सुश्रुते तु द्वौ मूत्रसादौ पृथगेव पठितौ यथा—

विशदं पीतकं मूत्रं सदाहं वहलन्तथा।
शुष्कं भवति यच्चापि रोचणाचूर्णसन्निभं।
मूत्रौकसादं तं विद्याद्रोगं पित्तकृतं बुधः।
शुष्कं भवति यच्चापि शङ्खचूर्णप्रपाण्डुरम्।
पिच्छिलं संहतं श्वेतं तथा कृच्छ्रं प्रवर्त्तते।
मूत्रौकसादं तं विद्यादामयं चापरं कफात्।

विड्विघातमाह—

रूक्षदुर्बलयोर्वातेनोदावर्त्तं शकृद् यदा ।
मूत्रस्रोतोऽनुपद्येत विट्संसृष्टं तदा नरः ।
विड्गन्धं मूत्रयेत् कृच्छ्रात् विड्विघातं विनिर्द्दिशेत् ।

वातकुण्डलमाह—

द्रुताध्वलङ्घनायासैरभिघातात् प्रपीड़नात् ।
स्वस्थानाद्वस्तिरुद्वृत्तः स्थूलस्तिष्ठति गर्भवत् ।
शूलस्पन्दनदाहार्त्तो विन्दुं विन्दुं स्रवत्यपि ।
पीड़ितस्तु स्रवेद्धारां संस्तम्भोद्वेष्टनार्त्तिमान् ।
वस्तिकुण्डलमाहुस्तं घोरं शस्त्रविषोपमं ।
पवनप्रबलं प्रायो दुर्निवारमबुद्धिभिः ।

तत्र दोषानुबन्धमाह—

तस्मिन् पित्तान्विते दाहः शूलं मूत्रविवर्णता ।
श्लेष्मणा गौरवं शोथः स्निग्धं मूत्रं घनं सितं ।

तस्य साध्यत्वासाध्यत्वमाह—

श्लेष्मरुद्धविलो वस्तिः पित्तोदीर्णो न सिध्यति ।
अविभ्रान्तविलः साध्यो न तु यः कुण्डलीकृतः ।
स्याद्वस्तौ कुण्डलीभूते तृण्मोहः श्वास एव च ।

अश्मर्य्यधिकारः ।

आदावश्मर्य्या आधारं वस्तिं विवृणोति—

नाभिपृष्ठकटीमुष्कगुदवङ्क्षणशेफसां ।
एकद्वारस्तनुत्वक्को मध्ये वस्ति रधोमुखः ।
अलाव्वा इव रूपेण सिरास्नायुपरिग्रहः ।

वस्तौ मूत्रसञ्चयं दर्शयति—

अधोमुखोऽपि वस्ति र्हि मूत्रवाहिसिरामुखैः । (क)
जाग्रतः स्वपतश्चैव स निस्यन्देन पूर्य्यते ।
आमुखात् सलिले न्यस्तः पार्श्वेभ्यः पूर्य्यते नवः ।
घटो यथा तथा विद्धि वस्ति र्मूत्रेण पूर्य्यते ।

संप्राप्तिमाह—

एवमेव प्रवेशेन वातः पित्तं कफोऽपिवा ।
मूत्रयुक्त उपस्नेहात् प्रविश्य कुरुतेऽश्मरीम् ।
अप्सु स्वच्छास्वपि यथा निषिक्तासु नवे घटे ।
कालान्तरेण पङ्कःस्यादश्मरीसम्भवस्तथा ।
संहन्त्यापो यथा दिव्या मारुतोऽग्निश्च वैद्युतः ।
तद्वद्बलासं वस्तिस्थ मुष्मा संहन्ति सानिलः ।

संख्यामाह—

वातपित्तकफैस्तिस्रश्चतुर्थी शुक्रजापरा ।
प्रायः श्लेष्माश्रयाः सर्वा अश्मर्य्यः स्युर्यमोपमाः । (ख)

(क) प्रपूर्त्तिः—मूत्रवाहिन्यौ मूत्रधमन्यौ द्वे तच्छाखाभूतास्तु वह्वः ।

(ख) प्रपूर्त्तिः—तिस्रोऽश्मर्य्यो भवन्ति श्लेष्माधिष्ठानास्तद् यथा—श्लेष्मणा

पूर्वरूपमाह—

यथास्वं वेदनावर्णं दुष्टं सान्द्रमथाविलम् ।
पूर्वरूपेऽश्मनः कृच्छ्रान्मूत्रं सृजति मानवः ।
वस्त्याध्मानं तदासन्नदेशेषु परितोऽतिरुक् ।
मूत्रे वस्त्वसगन्धत्वं कृच्छ्रात्सादो ज्वरोऽरुचिः ।

सामान्यलक्षणमाह—

सामान्यलिङ्गं रुङ्नाभिसेवनीवस्तिमूर्द्धसु ।
विशीर्णधारं मूत्रं स्यात् तया मार्गनिरोधने ।
तद्व्यपायात् सुखं मेहेदच्छं गोमेदकोपमं ।
तत्संक्षोभात् क्षते सास्रमायासाच्चातिरुग् भवेत् । (ग)

वातजामाह—

तत्र वाताद्भृशं चार्त्तो दन्तान् खादति वेपते ।
गृह्णाति मेहनं नाभिं पीड़यत्यनिशं क्वणन् ।
सानिलं मुञ्चति शकृत् मुहुर्मेहति विन्दुशः ।
श्यावारुणाश्मरी चास्य स्याच्चिता कण्टकैरिव । (घ)

वातेन पित्तेन शुक्रेणेति । तत्राशोधनशीलस्यापथ्यकारिणः प्रकुपितः श्लेष्मा मूत्रसम्पृक्तोऽनुप्रविश्य वस्तिमश्मरीं जनयति ।

(ग) प्रपूर्त्तिः—ससिकतं (मूत्रं) विसृजति धावनलङ्घनप्लवनपृष्ठयानाध्वगमनैश्चास्य वेदना भवति ।

(घ) प्रपूर्त्तिः—वातयुक्तस्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि । अश्मरी चात्र श्यामा परुषा विषमा खरा कदम्बपुष्पवत् कण्टकाचिता भवति ।

पित्तजामाह—

पित्तेन दह्यते वस्तिः पच्यमान इवोष्मवान् ।
भल्लातकास्थिसंस्थाना रक्तपीतासिताश्मरी । (ङ)

श्लेष्मजामाह—

वस्ति निस्तुद्यत इव श्लेष्मणा शीतलो गुरुः ।
अश्मरी महती श्लक्ष्णा मधुवर्णाऽथवासिता । (च)
एता भवन्ति बालानां तेषामेव च भूयसा ।
आश्रयोपचयाल्पत्वात् ग्रहणाहरणे सुखा । (छ)

शुक्राश्मरीमाह—

शुक्राश्मरी तु महतां जायते शुक्रधारणात् ।
स्थानाच्युतममुक्तं हि मुष्कयोरन्तरेऽनिलः ।
शोषयत्युपसंगृह्य शुक्रं तच्छुक्रमश्मरी ।
वस्तिरुङ्मूत्रकृच्छ्रत्वं मुष्कश्वयथुकारिणी ।

(ङ) **प्रपूर्त्तिः**—पित्तयुक्तस्तु श्लेष्मा सङ्घातमुपगस्य यथोक्तां परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि ।

(च) **प्रपूर्त्तिः**—श्लेष्माश्मरी श्लेष्मलमन्नमभ्यवहरतोऽत्यर्थमुपलिप्याधः परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि । अश्मरी चात्र श्वेता स्निग्धा महती कुक्कुटाण्ड-प्रतीकाशा मधूकपुष्पवर्णा वा भवति ।

(छ) **प्रपूर्त्तिः**—प्रायेणैतास्तिस्रोऽश्मर्यो दिवास्वप्नसमशनाध्यशनशीतस्निग्ध-गुरुमधुराहारप्रियत्वाद्विशेषेण बालानां भवन्ति । तेषामेवाल्पवस्तिकायत्वादनुपचितमांस-त्वाच्च वस्तेः सुखग्रहणाहरणा भवन्ति ।

तस्यामुत्पन्नमात्रायां शुक्रमेति विलीयते ।
पीड़िते त्ववकाशेऽस्मिन् (ज)

शर्करामाह—

अश्मर्य्यः शर्करा ज्ञेया तुल्यव्यञ्जनवेदनाः ।
पवनेऽनुगुणे सा तु निरेत्यल्पा विशेषतः ।
सा भिन्नमूर्त्तिर्वातेन शर्करेत्यभिधीयते ।

तस्या लक्षणमाह—

हृत्पीड़ा सक्थिसदनं कुक्षिशूलः सवेपथुः ।
तृष्णोर्द्धगोऽनिलः कार्ष्ण्यं दौर्बल्यं पाण्डुगात्रता ।
अरोचकाविपाकौ तु शर्करार्त्ते भवन्ति हि ।

अश्मरीजानपरान् विकारानाह—

शर्करा सिकतामेहो भस्माख्योऽश्मरीवैकृतम् ।

मूत्रमार्गगताया अश्मर्य्या लक्षणमाह—

मूत्रस्रोतः प्रवृत्ता सा सक्ता कुर्य्यादुपद्रवान् ।
दौर्बल्यं सदनं कार्श्यं कुक्षिशूल मथारुचिं ।
पाण्डुत्वमुष्णवातञ्च तृष्णां हृत्पीड़नं वमिं ।

असाध्यलक्षणमाह—

प्रशून-नाभिवृषणं बद्धमूत्रं रुजातुरं ।
अश्मरी क्षपयत्याशु सिकता शर्करान्विता ।

(ज) प्रपूर्त्तिः—महतान्तु शुक्राश्मरी शुक्रनिमित्ता भवति। मैथुनाभिघातादतिमैथुनाद्वा शुक्रश्चलित मनिर्गच्छद्विमार्गगमनादनिलोऽभितः संगृह्य मेढ्रवृषणयोरन्तरे संहरति। संहृत्यचोपशोषयति सा मूत्रमार्गमावृणोति। पीड़ितस्रावे च तस्मिन्नेव देशे प्रविलयमापद्यते। तां शुक्राश्मरीमिति विद्यात्।

प्रमेहाधिकारः ।

निदानमाह—

आस्यासुखं स्वप्नसुखं दधीनि ग्राम्यौदकानूपरसाः पयांसि ।
नवान्नपानं गुड़वैकृतञ्च प्रमेहहेतुः कफकृच्च सर्वं ।
गृध्नमभ्यवहार्य्येषु स्नानचंक्रमणद्विषम् ।
प्रमेहः चिप्रमभ्येति नीचद्रुममिवाण्डजः । (क)

कफजस्य संप्राप्तिमाह—

मेदश्च मांसञ्च शरीरजञ्च क्लेदं कफो वस्तिगतं प्रदूष्य ।
करोति मेहान्—

पित्तजस्य संप्राप्तिमाह—

समुदीर्णमुष्णैस्तानेव पित्तं परिदूष्य चापि ।

वातजस्य संप्राप्तिमाह—

चीणेषु दोषेष्ववकृष्य धातून् सदूष्य मेहान् कुरुतेऽनिलश्च । (ख)

(क) **प्रपूर्त्तिः**—अपरोहेतुर्यथा—मेदोमूत्रकफावहम् । अन्नपानक्रियाजातं यत्प्रायस्तत् प्रवर्त्तकम् । स्वादम्ललवणस्निग्धगुरुपिच्छिलशीतलम् । नवधान्यसुरानूपमांसेक्षुगुड़गोरसम् । एकस्थानासनरतिः शयनं विधिवर्ज्जितम् । दिवास्वप्नाव्यायामालस्यप्रसक्तं शीतस्निग्धमधुरमेद्यद्रवान्नपानसेविनं पुरुषं जानीयात् प्रमेही भविष्यतीति ।

(ख) **प्रपूर्त्तिः**—प्रमेहानां साधारणी संप्राप्तिर्यथा—तस्य चैवं प्रवृत्तस्यापरिपक्वा एव वातपित्तश्लेष्माणो यदा मेदसा सहैकत्वमुपेत्य मूत्रवाहिस्रोतांस्यनुसृत्याधोगत्वा वस्तिमुखमाश्रित्य निर्भिद्यन्ते तदा प्रमेहान् जनयन्ति । श्लेष्मादिजानां विशिष्टा संप्राप्तिरुच्यते—तत्र वातपित्तमेदोभिरन्वितः श्लेष्मा श्लेष्मप्रमेहान् जनयति । वातकफशोणितमेदोभिरन्वितं पित्तं पित्तप्रमेहान् जनयति । कफपित्तवसामज्जमेदोभिरन्वितो वायुर्वातप्रमेहान् जनयति ।

संख्यां साध्यत्वादिकञ्चाह—

साध्याः कफोत्था दश पित्तजाः षट्
याप्या न साध्यः पवनाच्चतुष्कः ।
समक्रियत्वाद्विषमक्रियत्वान्महात्ययत्वाच्च यथा क्रमन्ते । (ग)

पूर्वरूपमाह—

स्वेदोऽङ्गगन्धः शिथिलत्वमङ्गे शय्यासनस्वप्नसुखाभिषङ्गः ।
स्यान्नेत्रजिह्वादशनोपदेहो घनाङ्गता केशनखातिवृद्धिः ।
शीतप्रियत्वं गलतालुशोषो माधुर्य्यमास्ये करपाददाहः ।
भविष्यतो मेहगणस्य रूपं मूत्रेऽभिधावन्ति पिपीलिकाश्च । (घ)

(ग) प्रपूर्त्तिः—कफादुदकेचुसुरासिकताशनैर्लवणपिष्टसान्द्रशुक्रफेनमेहा दश साध्या—दोषदूष्याणां समक्रियत्वात् । चरकमते तु उदकेचुसान्द्रसान्द्रप्रसादशुक्लशुक्र-शीतसिकताशनैर्लालामेहाश्चेति दशकफमेहाः । पित्तान्नीलहरिद्राम्लचारमञ्जिष्ठाशोणित-मेहाः षट् याप्या दोषदूष्याणां विषमक्रियत्वात् । चरकमते तु चारकालनीललोहित-मञ्जिष्ठाहरिद्रामेहाश्चेति षट् पित्तमेहाः । वातात् सर्पिर्वसाचौद्रहस्तिमेहाश्चत्वारः असाध्यतमा महात्ययिकत्वात् । कृत्स्नं शरीरं निष्पीड्य मेदोमज्ज वसायुतः । अधः प्रक्रमते वायुस्तेनासाध्यास्तु वातजाः । यथाहि वर्णानां पञ्चानामुत्कर्षापकर्ष-कृतेन संयोग-विशेषेण शवलवभ्रूकपिलकपोतमेचकादीनां वर्णानामनेकेषामुत्पत्ति-र्भवति एवमेव दोषधातुमलाहारविशेषैर्णोत्कर्षापकर्षकृतेन संयोग-विशेषेण प्रमेहानां नानाकारत्वं भवति ।

(घ) प्रपूर्त्तिः—प्रमेह पूर्व्वरूपाणामाकृतिर्यत्र दृश्यते । किञ्चिच्चाप्यधिकं मूत्रं तं प्रमेहिणमादिशेत् । कृत्स्नान्यर्द्धाणि वा यस्मिन् पूर्वरूपाणि मानवे । प्रवृत्तं मूत्रमत्यर्थं तं प्रमेहिणमादिशेत् ।

सामान्यलक्षणमाह—

सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता ।
दोषदुष्याविशेषेऽपि तत्संयोगविशेषतः । *

दश कफजमेहानाह—

अच्छं बहु सितं शीतं निर्गन्धमुदकोपमम् ।
श्लेष्मकोपान्नरो मूत्रं 'मुदमेहो' प्रमेहति ।
यस्य पर्य्युषितं मूत्रं सान्द्रीभवति भाजने ।
पुरुषं कफकोपेन तमाहुः 'सान्द्रमेहिनम्' ।
यस्य संहन्यते मूत्रं किञ्चित् किञ्चित् प्रसीदति ।
'सान्द्रप्रसादमेहीति' तमाहुः श्लेष्मकोपतः ।
शुक्लं पिष्टनिभं मूत्रमभीक्ष्णं यः प्रमेहति ।
पुरुषं कफकोपेन तमाहुः 'शुक्लमेहिनम्' ।
शुक्राभं शुक्रमिश्रं वा मुहुर्मेहति यो नरः ।
'शुक्रमेहिन' मेवाहुः पुरुषं श्लेष्मकोपतः ।
अत्यर्थशीतं मधुरं मूत्रं क्षरति यो भृशम् ।
'शीतमेहिन' माहुस्तं पुरुषं श्लेष्मकोपतः ।
मन्दं मन्दमवेगन्तु कृच्छ्रं यो मूत्रयेच्छनैः ।
'शनैर्मेहिन'माहुस्तं पुरुषं श्लेष्मकोपतः ।

---

* प्रपूर्त्तिः—धातुसम्पर्कात् पुनः सर्व्वमेहेषु मूत्रनाविलं भूरि च भवति । द्वौ प्रमेहौ सहजोऽपथ्य-निमित्तश्च भवतः । तत्र सहजो मातृपितृवीजदोषकृतः । अहिताहारजोऽपथ्यनिमित्तः । तयोः पूर्व्वेणोपद्रुतः कृशो रूक्षोऽल्पाशी पिपासुर्भृशं परिसरणशीलश्च भवति । उत्तरेण स्थूलो बह्वाशी स्निग्धः शय्यासन-स्वप्नशीलः प्रायेणेति ।

तन्तुबद्धमिवालालं पिच्छिलं यः प्रमेहति ।
आलालमेहिनं विद्यात् तं नरं श्लेष्मकोपतः ।

षट्पित्तजमेहानाह—

गन्धवर्णरसस्पर्शैर्यथा क्षारस्तथात्मकम् ।
पित्तकोपान्नरो मूत्रं 'क्षारमेही' प्रमेहति ।
मसीवर्णमजस्रं यो मूत्रमुष्णं प्रमेहति ।
पित्तस्य परिकोपेन तं विद्या'न्नीलमेहिनम्' ।

चाषपक्षनिभं मूत्रं मन्दं मेहति यो नरः ।
पित्तस्य परिकोपेन तं विद्या 'द्रक्तमेहिनम्' ।
मञ्जिष्ठारूपि योऽजस्रं भृशं विस्रं प्रमेहति ।
पित्तस्य परिकोपात्तं विद्या'न्मञ्जिष्ठमेहिनम्' ।
हरिद्रोदकसंकाशं कटुकं यः प्रमेहति ।
पित्तस्य परिकोपात्तु विद्या 'द्धारिद्रमेहिनम्' ।

वातजान् चतुरोमेहानाह—

वसामिश्रं वसाभञ्च मुहुर्मेहति यो नरः ।
'वसामेहिन'माहु स्तमसाध्यं वातकोपतः ।
मज्जानं सह मूत्रेण मुहुर्मेहति यो नरः ।
'मज्जमेहिन' माहुस्तमसाध्यं वातकोपतः ।
हस्ती मत्त इवाजस्रं मूत्रं क्षरति यो भृशम् ।
'हस्तिमेहिन' माहुस्तमसाध्यं वातकोपतः ।
कषायं मधुरं पाण्डुं रूक्षं मेहति यो नरः ।
वातकोपादसाध्यं तं प्रतीया'न्मधुमेहिनम्' ।

उपेक्षया पित्तश्लेष्मजानामपि मधुमेहत्वं दर्शयन्नाह—

सर्व्व एव प्रमेहास्तु कालेनाप्रतिकारिणः ।
मधुमेहत्वमायान्ति तदासाध्या भवन्ति हि ।

धातुक्षयावरणाभ्यां कुपितेन वातेन मधुमेहसम्भवमाह—

मधुमेहे मधुसमं जायते स किल द्विधा ।
क्रुद्धे धातुक्षयाद्वायौ दोषावृतपथेऽथवा ।

सावरणलिङ्गमाह—

आवृतो दोषलिङ्गानि सोऽनिमित्तं प्रदर्शयन् ।
क्षणात् क्षीणः क्षणात् पूर्णो भजते कृच्छ्रसाध्यतां ।

मधुमेहशब्दप्रवृत्तौ निमित्तमाह—

मधुरं यच्च मेहेषु प्रायो मध्विव मेहति ।
सर्व्वेऽपि मधुमेहाख्या माधुर्य्याच्च तनोरतः ।

कफजमेहानामुपद्रवमाह—

अविपाकोऽरुचिश्छर्द्दिर्निद्रा कासः सपीनसः ।
उपद्रवाः प्रजायन्ते मेहानां कफजन्मनां ।

पित्तजमेहानामुपद्रवमाह—

वस्तिमेहनयोस्तोदो मुष्कावदरणं ज्वरः ।
दाहस्तृष्णाम्लिकामूर्च्छा विड्भेदः पित्तजन्मनां ।

वातजमेहानामुपद्रवमाह—

वातजानामुदावर्त्तः कम्पहृद्ग्रहलोलताः ।
शूलमुन्निद्रता शोषः कासः श्वासश्च जायते । (क)

(क) प्रपूर्त्तिः—अत्रानुक्ता उपद्रवा यथा—मक्षिकोपसर्पणमालस्यं मांसोपचयः शैथिल्यं श्वासश्च श्लेष्मजन्मनाम् । हृदिशूलमरोचकं वमथुः परिधूमायनम् पाण्डुरोगः पीतविण्मूत्रनेत्रत्वञ्च पैत्तिकानां । स्तम्भः बद्धपुरीषत्वञ्चेति वातजानाम् ।

असाध्यलक्षणमाह—

मन्दोत्साहमतिस्थूलमतिस्निग्धं महाशनम् ।
मृत्युः प्रमेहरूपेण क्षिप्रमादाय गच्छति ।
यथोक्तोपद्रवारिष्ट मतिप्रस्रुतमेव च ।
पिड़कापीड़ितो गाढ़: प्रमेहो हन्ति मानवं ।
जात: प्रमेही मधुमेहिनो वा न साध्य उक्त: स हि बीजदोषात् ॥

मेहनिवृत्तिलक्षणमाह—

प्रमेहिनो यदा मूत्र मनाविलमपिच्छिलं ।
विशदं कटुतिक्तञ्च तदारोग्यं प्रचक्षते ।

पिड़कासम्भवं दर्शयन्नाह—

शराविका कच्छपिका जालिनी विनतालजी ।
मसूरिका सर्षपिका पुत्रिनी सविदारिका ।
विद्रधिश्चेति पिड़का: प्रमेहोपेक्षया दश । *
सन्धिमर्म्मसु जायन्ते मांसलेषु च धामसु ।
अन्तोन्नता तु तद्रूपा निम्नमध्या "सराविका" ।
गौरसर्षपसंस्थाना तत् प्रमाणा च सर्षपी ।
सदाहा कूर्म्मसंस्थाना ज्ञेया "कच्छपिका" बुधै: ॥
"जालिनी" तीव्रदाहा तु मांसजालसमावृता ।
अवगाढ़रुजाक्लेदा पृष्ठे वा प्युदरेऽपि वा ।
महती पीड़का नीला "विनता" नाम सा स्मृता ।
महत्यल्पचिता ज्ञेया पिड़का चापि "पुत्रिणी" ।

* तत्र वसामेदोभ्यामभिपन्नशरीरस्य त्रिभिर्दोषैश्चानुगतधातो: प्रमेहिणो दशपिड़का जायन्ते ।

मसूराकृतिसंस्थाना विज्ञेया तु "मसूरिका" ।
रक्तासितास्फोटचिता दारुणा"त्वलजी" भवेत् ।
विदारीकन्दवद्वृत्ता कठिना च "विदारिका ।"
विद्रधेर्लक्षणैर्युक्ता ज्ञेया "विद्रधिका"तु सा ।

पिड़कानामारम्भककारणमाह—

ये यन्मयाः स्मृताः मेहा स्तेषा मेतास्तु तन्मयाः ।

प्रमेहं विना पिड़कासम्भवमाह—

विना प्रमेहमप्येता जायन्ते दुष्टमेदसः ।
तावच्चैता न लक्ष्यन्ते यावद्वास्तुपरिग्रहाः ।

उपद्रवमाह—

तृट्श्वासमांससङ्कोथमोहहिक्कामदज्वराः ।
वीसर्पमर्म्मसंरोधाः पिड़कानामुपद्रवाः ।

असाध्यपिड़कालक्षणमाह—

गुदे हृदि शिरस्यंसे पृष्ठे मर्म्मसु चोत्थिताः । (क)
सोपद्रवा दुर्व्वलाग्नेः पिड़काः परिवर्ज्जयेत् ।

(क) प्रपूर्त्तिः—अथैवमस्य मेदःक्लेदादिभिरभिष्यन्नदेहस्य दोषैरनुगतधातोः प्रमेहाभिवृद्धौ मांसलेष्ववकाशेषु सन्धिषु मर्म्मसु च प्रदेशविशेषाश्रयणात् प्राणापहारिण्यो भूयः कष्टतमोपद्रवाः दश पिड़का जायन्ते सुतरां चाधःकाये। तदभिमुखा हि प्रमेहिणां दोषाः ।

मेदोऽधिकार: ।

निदानमाह—

अव्यायामदिवास्वप्नश्लेष्मलाहारसेविन: ।
मधुरोऽन्नरस: प्राय: स्नेहान्मेद: प्रवर्द्धयेत् ।
मेदसावृतमार्गत्वात् पुष्यन्त्यन्ये न धातव: ।

लक्षणमाह—

मेदस्तु चीयते तस्मादशक्त: सर्व्वकर्म्मसु ।
क्षुद्रश्वासतृषामोहस्वप्नक्राथनसादनै: ।
युक्त: क्षुत्स्वेददुर्गन्धैरल्पप्राणोऽल्पमैथुन: ।

मेदस्विन उदरवृद्धिं सोपपत्तिकमाह—

मेदस्तु सर्व्वभूतानामुदरेष्वस्थिषु स्थितं ।
अतएवोदरे वृद्धि: प्रायो मेदस्विनो भवेत् ।

मेदोरुद्धमार्गस्य वायोरग्नेश्च विकारकारित्वमाह—

मेदसावृतमार्गत्वाद्वायु: कोष्ठे विशेषत: ।
चरन् सन्धुक्षयत्यग्नि माहारं शोषयत्यपि ।
तस्मात् स शीघ्रं जरयत्याहारमभिकाङ्क्षति ।
विकारांश्चाप्नुते घोरान् कांश्चित् कालव्यतिक्रमात् ।
एतावुपद्रवकरौ विशेषादग्निमारुतौ ।
एतौ तु दहत: स्थूलं वनदावो वनं यथा ।
मेदस्यतीवसंवृद्धे सहसैवानिलादय: ।
विकारान् दारुणान् कृत्वा नाशयन्त्याशु जीवितं ।

अतिस्थूलस्य लक्षणमाह—

मेदोमांसातिवृद्धत्वा च्चलस्फिगुदरस्तनः ।
अयथोपचयोत्साहो नरोऽतिस्थूल उच्यते ॥

उदराधिकारः ।

सामान्यनिदानमाह—

रोगाः सर्वेऽपि मन्देऽग्नौ सुतरा मुदराणि च ।
अजीर्णान्मलिनैश्चान्नैर्जायन्ते मलसञ्चयात् ।
अत्युष्णलवणक्षारविदाह्यम्लरसाशनात् ।
मिथ्यासंसर्जनाद्रुक्षविरुद्धाशुचिभोजनात् ।
प्लीहार्शोग्रहणीदोषकर्षणात् कर्म्मविभ्रमात् ।
क्लिष्टानामप्रतीकारा द्रौक्ष्याद्वेगविधारणात् ।
स्रोतसां दूषणादामात् संक्षोभादतिपूरणात् ।
अर्शोवातशकृद्रोधादन्त्रस्फुटनभेदनात् ।
अतिसञ्चितदोषाणां पापं कर्म्म च कुर्व्वताम् ।

संप्राप्तिमाह—

रुद्ध्वा स्वेदाम्बुवाहीनि दोषाः स्रोतांसि सञ्चिताः ।
प्राणाग्न्यपानान् संदूष्य जनयन्त्युदरं नृणां ।

संख्यामाह—

पृथग्दोषैः समस्तैश्च प्लीहबद्धक्षतोदकैः ।
संभवन्त्युदराण्यष्टौ तेषां लिङ्गं पृथक् शृणु ।

पूर्व्वरूपमाह—

भाविनस्तस्य लक्षणम्—
क्षुन्नाशोऽन्नं चिरात् सर्व्वं सविदाहञ्च पच्यते।
जीर्णाजीर्णं न जानाति सौहित्यं सहते न च।
क्षीयते बलतः शश्वच्छ्वसित्यल्पेऽपि चेष्टिते।
बृद्धिर्विंशोऽप्रवृत्तिश्च किञ्चिच्छोथश्च पादयोः।
रुग्वस्तिसन्धौ ततता लघ्वल्पाभोजनैरपि।

सामान्यलक्षणमाह—

राजीजन्म वलीनाशो जठरे जठरेषु तु।
सर्व्वेषु तन्द्रा सदनं मलसङ्गोऽल्पवह्निता।
दाहः श्वयथुराध्मानमन्ते सलिलसम्भवः।
तेनार्त्ताः शुष्कताल्वोष्ठाः शूनपादकरोदराः।
नष्टचेष्टाबलाहाराः कृशाः प्रध्मातकुक्षयः।
स्युः प्रेतरूपाः पुरुषाः—

वातजस्य विशेषनिदानं संप्राप्तिञ्चाह—

रुक्षाल्पभोजनायासवेगोदावर्त्तकर्शनै
र्वायुः प्रकुपितः कुक्षिहृद्वस्तिगुदमार्गगः।
हत्वाग्निं कफमुद्धूय तेन रुद्धगतिस्तथा।
आचिनोत्युदरं जन्तोस्त्वङ्मांसान्तरमाश्रितः।

वातोदरलक्षणमाह—

तत्र वातोदरे शोथः पाणिपान्नाभिकुक्षिषु।
कुक्षिपार्श्वोदरकटीपृष्ठरुक् पर्व्वभेदनं।

शुष्ककासाङ्गमर्द्दाधो गुरुता मलसंग्रहः।
श्यावारुणत्वगादित्वमकस्माद्वृद्धिह्रासवत्।
सतोदभेदमुदरं तनुकृष्णसिराततं।
आध्मातदृतिवच्छब्द माहतं प्रकरोति च।
वायुश्चात्र सरुक्शब्दो विचरेत् सर्व्वतोगतिः।

पित्तोदरस्य निदानं संप्राप्तिश्चाह—

कट्वम्ललवणात्युष्णतीक्ष्णाग्न्यातपसेवनैः।
विदाह्यध्यशनाजीर्णैश्चाशु पित्तं समाचितम्।
प्राप्यानिलकफौ रुद्ध्वा मार्गमुन्मार्गमास्थितम्।
निहत्यामाशये वह्निं जनयत्युदरं ततः।

पित्तोदरलक्षणमाह—

पित्तोदरे ज्वरोमूर्च्छा दाहस्तृट् कटुकास्यता।
भ्रमोऽतीसारः पीतत्वं त्वगादावुदरं हरित्।
पीतताम्रसिरानद्धं सस्वेदं सोष्म दह्यते।
धूमायति मृदुस्पर्शं क्षिप्रपाकं प्रदूयते।

श्लेष्मोदरस्य निदानं संप्राप्तिश्चाह—

अव्यायामदिवास्वप्नस्वाद्वतिस्निग्धपिच्छिलैः।
दधिदुग्धोदकानूपमांसैश्चात्युपसेवितैः।
क्रुद्धेन श्लेष्मणा स्रोतःस्वावृतेष्वावृतोऽनिलः।
तमेव पीड़यन् कुर्य्यादुदरं बहिरन्त्वगः।

श्लेष्मोदरलक्षणमाह—

श्लेष्मोदरेऽङ्गसदनस्वापश्वयथुगौरवं ।
निद्रोत्क्लेशोऽरुचिः श्वासः कासः शुक्लत्वगादिता ।
उदरं स्तिमितं स्निग्धं शुक्लराजीततं महत् ।
चिराभिवृद्धं कठिनं शीतस्पर्शं गुरु स्थिरं ।

त्रिदोषोदरहेतुमाह—

स्त्रियोऽन्नपानं नखलोममूत्र-विड़ार्त्तवैर्युक्तमसाधुवृत्ताः ।
यस्मै प्रयच्छन्त्यरयो गरांश्च दुष्टाम्बुदूषीविषसेवनाद्वा ।
तेनाशु रक्तं कुपिताश्च दोषाः कुर्य्युः सुघोरं जठरं त्रिलिङ्गं ।

तस्य लक्षणमाह—

तच्छीतवाते भृश दुर्द्दिने च विशेषतः कुप्यति दह्यते च ।
स चातुरो मुह्यति हि प्रसक्तं पाण्डुः कृशः शुष्यति तृष्णया च ।

प्लीहोदरस्य निदानं संप्राप्तिञ्चाह—

अत्याशितस्य संक्षोभाद् यानयानादिचेष्टितैः ।
अतिव्यवायकर्म्माध्ववमनव्याधिकर्षणैः ।
वामपार्श्वाश्रितः प्लीहा च्युतःस्थानाद्विवर्द्धते ।
शोणितं वा रसादिभ्यो विवृद्धं तं विवर्द्धयेत् ।

तस्य सामान्यलक्षणमाह—

सोऽष्ठीलेवातिकठिनः प्राक्तः कूर्म्मपृष्ठवत् ।
क्रमेण वर्द्धमानश्च कुक्षावुदरमावहेत् ।
श्वासकासपिपासास्यवैरस्याध्मानरुग्ज्वरैः ।

पाण्डुत्वच्छर्दिमूर्च्छार्त्तिदाहमोहैश्च संयुतम्।
अरुणाभं विवर्णं वा नीलहारिद्रराजीमत्।

वातादिभेदेन विशेषलिङ्गमाह—

उदावर्त्तरुगानाहै र्मोहतृड्दहनज्वरैः।
गौरवारुचिकाठिन्यै र्विद्यात्तत्र मलान् क्रमात्।

यकृदुदरमाह—

सव्यान्यपार्श्वे यकृति प्रवृद्धे ज्ञेयं यकृद्दाल्युदरं तदेव॥

बद्धोदरनिदानमाह—

पक्ष्मबालैः सहान्नेन भुक्तैर्बद्धायने गुदे।
दुर्नामभिरुदावर्त्तैरन्यैर्वान्त्रोपलेपिभि।
र्वर्च्चःपित्तकफान् रुद्ध्वा करोति कुपितोऽनिलः।

तस्य लक्षणमाह—

अपानो जठरं तेन स्यु र्दाहतृड्ज्वरक्षवाः।
कासश्वासोरुसदनं शिरोहृन्नाभिपायुरुक्।
मलसङ्गोऽरुचिश्छर्दि रुदरं मूढमारुतम्।
स्थिरं नीलारुणसिराराजिमद्रोमराजि वा।
नाभेरुपरि च प्रायोगोपुच्छाकृति जायते।

छिद्रोदरस्य हेतुलिङ्गमाह—

अस्थ्यादिशल्यैः सान्नैश्चेद्भुक्तैरत्यशनेन वा।
भिद्यते पच्यते वान्त्रं तच्छिद्रैश्च चरन् बहिः।
आम एव गुदादेति ततोऽल्पाल्पं सविड्रसः।

तुल्यः कुणपगन्धेन पिच्छिलः पीतलोहितः ।
शेषश्चापूर्य्य जठरं जठरं घोरमावहेत् ।
वर्द्धते तदधोनाभेराशु चैति जलात्मताम् ।
उद्रिक्तदोषरूपञ्च व्याप्तञ्च श्वासतृड्भ्रमैः ।
छिद्रोदरमिदं प्राहुः परिस्रावीतिचापरे ।

असाध्यलक्षणमाह—

जन्मनैवोदरं सर्व्वं प्रायःकृच्छ्रतमं मतं । (क)
बलिन स्तदजाताम्बु यत्नसाध्यं नवोत्थितं ।
पक्षाद्बद्धगुदं तूर्द्ध्वं सर्व्वं जातोदकं तथा ।
प्रायो भवत्यभावाय छिद्रान्त्वं चोदरं नृणां ।

अवस्थाविशेषेण साध्यानामप्यसाध्यत्वमाह—

शूनाक्षं कुटिलोपस्थमुपक्लिन्नतनुत्वचम् ।
बलशोणितमांसाग्निपरिक्षीणञ्च वर्ज्जयेत् ।
पार्श्वभङ्गान्नविद्वेषशोथातीसारपीड़ितं ।
विरिक्तञ्चाप्युदरिणं पूर्य्यमानं विवर्ज्जयेत् ।

उदकोदरस्य निदानसंप्राप्तिलक्षणान्याह—

अत्यम्बुपानान्मन्दाग्नेः क्षीणस्यातिकृशस्य च ।
रुद्ध्वाऽम्बुमार्गाननिलः कफश्च जलमूर्च्छितः ।
वर्द्धयेतां तदेवाम्बु तत्स्थानादुदरंश्रितौ ।
ततः स्यादुदरं तृष्णागुदस्रुतिरुजायुतम् ।

(क) प्रपूर्त्तिः—वातपित्तकफप्लीहसन्निपातदकोदरं । कृच्छ्रं यथोत्तरम्—

कासश्वासारुचियुतं नानावर्णसिराततम्।
तोयपूर्णदृतिस्पर्शशब्दप्रक्षोभवेपथु।
दकोदरं महत् स्निग्धं स्थिरमावृत्तनाभि तत्।

शोथाधिकारः।

निजशोथस्य सामान्यहेतुमाह—

सामान्यहेतुः शोफानां दोषजानां विशेषतः।
व्याधिकर्म्मोपवासादिक्षीणस्य भजतो द्रुतम्।
अतिमात्रमथान्यस्य गुर्व्वम्लस्निग्धशीतलम्।
लवणक्षारतीक्ष्णोष्णं शाकाम्बु स्वप्नजागरम्।
मृद् ग्राम्यमांसवल्लूरमजीर्णश्रममैथुनम्।
पदातिर्मार्गगमनं यानेन क्षोभिणामपि।
श्वासकासातिसारार्शोजठरप्रदरज्वराः।
विसूच्यलसकच्छर्द्दिगर्भवीसर्पपाण्डुताः।
अन्ये च मिथ्योपक्रान्ता स्ते दोषा वक्षसि स्थिताः।
ऊर्द्धं शोफमधो वस्तौ मध्ये कुर्व्वन्ति मध्यगाः।
सर्व्वाङ्गगाः सर्व्वगतं प्रत्यङ्गेषु तदाश्रयाः।

संप्राप्तिमाह—

रक्तपित्तकफान् वायुर्दुष्टोदुष्टान् बहिःसिराः।
नीत्वा रुद्धगतिस्तैर्हि कुर्य्यात्त्वङ्मांससंश्रयं।
उत्सेधं संहतं शोथं तमाहुर्निचयादतः।

संख्यामाह—

सर्वं हेतुविशेषैस्तु रूपभेदान्नवात्मकं।
दोषैः पृथग्द्वयैः सर्व्वैरभिघाताद्विषादपि।

पूर्वरूपमाह—

तत्पूर्व्वरूपं दवथुः सिरायामोऽङ्गगौरवं।

सामान्यलक्षणमाह—

सगौरवं स्यादनवस्थितत्वं सोत्सेधमुष्माय सिरातनुत्वं।
सलोमहर्षश्च विवर्णता च सामान्यलिङ्गं श्वयथोःप्रदिष्टम्।

वातजशोथमाह—

वाताच्छोफश्चलोरुक्षः स्वरोरोमारुणासितः।
सङ्कोचस्पन्दहर्षार्त्तितोदभेदप्रसुप्तिमान्।
क्षिप्रोत्थानशमः शीघ्रमुन्नमेत् पीड़ितस्तनुः।
स्निग्धोष्णमर्द्दनैः शाम्येद्गात्रमल्पो दिवा महान्।

पित्तशोथमाह—

त्वक् च सर्षपलिप्तेव तस्मिं श्चिमचिमायते।
पीतरक्तासिताभासः पित्तादाताम्ररोमकृत्।
शीघ्रानुसारप्रशमो मध्ये प्राग्जायते तनुः।
सतृड़्दाहज्वरस्वेदद्रवक्लेदमदभ्रमः।
शीताभिलाषी विड़्भेदी गन्धी स्पर्शासहो मृदुः।

कफशोथमाह—

कण्डूमान् पाण्डुरोमत्वक कठिनः शीतलोगुरुः।
स्निग्धः श्लक्ष्णः स्थिरःस्त्यानो निद्राछर्द्यग्निसादकृत्।

आक्रान्तो नोन्नमेत् कृच्छ्रशमजन्मा निशाबलः।
स्रवेन्नासृक् चिरात् पिच्छां कुशशस्त्रादिविक्षतः।
स्पर्शोष्णाकाङ्क्षी च कफात्—

द्वन्द्वसंसर्गजानामतिदेशेन लिङ्गमाह—

निदानाकृतिसंसर्गात् श्वयथुः स्याद्द्विदोषजः।
सर्व्वाकृतिः सन्निपाताच्छोथो व्यामिश्रलक्षणः।

अभिघातजं शोथमाह—

अभिघातेन शस्त्रादिच्छेदभेदक्षतादिभि।
हिमानिलोदध्यनिलै र्भल्लातकपिकच्छुजैः।
रसैः शूकैश्च संस्पर्शाच्छ्वयथुः स्याद्विसर्पवान्।
भृशोष्मलोहिताभासः प्रायशः पित्तलक्षणः।

विषजशोथमाह—

विषजः सविषप्राणिपरिसर्पणमूत्रणात्।
दंष्ट्रादन्तनखाघातादविषप्राणिनामपि।
विण्मूत्रशुक्रोपहतमलवद्वस्त्रसङ्करात्।
विषवृक्षानिलस्पर्शात् गरयोगावचूर्णनात्।
मृदुश्चलोऽवलम्बी च शीघ्रो दाहरुजाकरः।

दोषस्थानभेदेन शोथस्थानभेदमाह—

दोषाः श्वयथुमूर्द्धं हि कुर्व्वन्त्यामाशयस्थिताः।
पक्वाशयस्था मध्येतु वर्च्चःस्थानगतास्त्वधः।
कृत्स्नदेहमनुप्राप्ताः कुर्य्युः सर्व्वसरं तथा।

असाध्यलक्षणमाह—

यो मध्यदेशे श्वयथुः स कष्टः सर्व्वगश्च यः ।
अर्द्धाङ्गे रिष्टभूतः स्याद् यश्चोर्द्धं परिसर्पति ।
श्वासः पिपासा छर्द्दिश्च दौर्व्बल्यं ज्वर एव च ।
यस्य चान्ने रुचिर्नास्ति श्वयथुं तं विवर्ज्जयेत् ।
अनन्योपद्रवक्ृतः शोथः पादसमुत्थितः ।
पुरुषं हन्ति नारीञ्च मुखजो गुदजो द्वयं ।
नवोऽनुपद्रवः शोथः साध्योऽसाध्यः पुरेरितः ।
विवर्ज्जयेत् कुक्ष्युदराश्रितञ्च तथा गले मर्म्मनि संश्रितञ्च ।
स्थलःखरश्चापि भवेद्विवर्ज्यो यश्चापि वालस्थविराबलानां ।

वृद्ध्यधिकारः ।

संप्राप्तिमाह—

क्रुद्धोऽनूर्द्धगति र्वायुः शोथशूलकरश्चरन् ।
मुष्कौ वङ्क्षणतः प्राप्य फलकोषाभिवाहिनीः ।
प्रपीड्य धमनीर्वृद्धिं करोति फलकोषयोः ।

संख्यामाह—

दोषास्रमेदोमूत्रान्त्रैः स वृद्धिः सप्तधा गदः ।

मूत्रान्त्रवृद्धीर्वातजत्वमाह—

मूत्रान्त्रजावप्यनिलाद्धेतुभेदस्तु केवलं ।

वातवृद्धिमाह—

वातपूर्णदृतिस्पर्शी रूक्षो वातादहेतुरुक्।

पित्तवृद्धिमाह—

पक्वोदुम्बरसङ्काशः पित्ताद्दाहोष्मपाकवान्।

कफवृद्धिमाह—

कफाच्छीतो गुरुः स्निग्धः कण्डूमान् कठिनोऽल्परुक्।

रक्तजवृद्धिमाह—

कृष्णस्फोटावृतः पित्तवृद्धिलिङ्गश्च रक्तजः।

मेदोवृद्धिमाह—

कफवन्मेदसा वृद्धिः मृदुस्तालफलोपमः।

मूत्रवृद्धिमाह—

मूत्रधारणशीलस्य मूत्रजः स तु गच्छतः।
अम्भोभिः पूर्णदृतिवत् क्षोभं याति सरुङ्मृदुः।
मूत्रकृच्छ्र मधः स्याच्च चालयन् फलकोषयोः।

अन्त्रवृद्धिनिदानमाह—

वातकोपिभिराहारैः शीततोयावगाहनैः।
धारणेरणभाराध्वविषमाङ्गप्रवर्त्तनैः।

तस्याः संप्राप्तिमाह—

क्षोभनैः क्षोभितोऽन्यैश्च क्षुद्रान्त्रावयवं यदा।
पवनो द्विगुणीकृत्य स्वनिवेशादधो नयेत्।
कुर्य्याद्वङ्क्षणसन्धिस्थो ग्रन्थ्याभं श्वयथुं तदा।

कालान्तरेण वङ्क्षणसन्धिस्थः क्षुद्रान्त्रावयवः फलकोषं गच्छतीति दर्शयन्नाह—

उपेक्षमाणस्य च मुष्कवृद्धिमाध्मान-रुक्-स्तम्भवतीं स वायुः ।
प्रपीड़ितोऽन्तः स्वनवान् प्रयाति प्रध्मापयन्नेति पुनश्च मुक्तः ।

प्राप्तफलकोषाया वृद्धेरसाध्यत्वमाह—

अन्त्रवृद्धिरसाध्योऽयं वातवृद्धिसमाकृतिः ।

व्रध्नस्य निदानपूर्व्विकां संप्राप्तिं रूपञ्चाह—

अत्यभिष्यन्दिगुर्व्वन्नसेवनान्निचयं गतः ।
करोति ग्रन्थिवत् शोथं दोषो वङ्क्षणसन्धिषु ।
ज्वरशूलाङ्गसादाढ्यं तं व्रध्नमिति निर्द्दिशेत् ।

गलगण्डाद्यधिकारः ।

गलगण्डस्य निरुक्तिमाह—

निबद्धः श्वयथुर्यस्य मुष्कवल्लम्बते गले ।
महान् वा यदि वा ह्रस्वो गलगण्डं तमादिशेत् ।

संप्राप्तिमाह—

वातः कफश्चापि गले प्रदुष्टो मन्ये तु संश्रित्य तथैव मेदः ।
कुर्व्वन्ति गण्डं क्रमशः स्वलिङ्गैः समन्वितं तं गलगण्डमाहुः ।

वातजमाह—

तोदान्वितः कृष्णसिरावनद्धः श्यावोऽरुणो वा पवनात्मकस्तु ।
मेदोऽन्वितश्चोपचितश्च कालाद्भवेत् प्रदिग्धे च गले रुजश्च ।

पारुष्ययुक्तश्चिरवृद्धपाको यदृच्छया पाकमियात् कदाचित् ।
वैरस्य मास्यस्य च तस्य जन्तोर्भवेत्तथा तालुगलप्रशोषः ।

कफजमाह—

स्थिरः सवर्णो गुरुरुग्रकण्डूः शीतोमहांश्चापि कफात्मकस्तु ।
चिराभिवृद्धिं भजते चिराद्वा प्रपच्यते मन्दरुजः कदाचित् ।
माधुर्य्यमास्यस्य च तस्य जन्तोर्भवेत्तथा तालुगलप्रलेपः ।

मेदोजमाह—

स्निग्धोगुरुः पाण्डरनिष्टगन्धो मेदोभवः कण्डूयुतोऽल्परुक्च ।
प्रलम्बतेऽलावुवदल्पमूलो देहानुरूपक्षयवृद्धियुक्तः ।
स्निग्धास्यता तस्य भवेच्च जन्तोर्गलेऽनुशब्दं कुरुते च नित्यं ।

असाध्यत्वमाह—

कृच्छ्राच्छ्वसन्तं मृदुसर्व्वगात्रं संवत्सरातीत मरोचकार्त्तं ।
क्षीणञ्च वैद्यो गलगण्डयुक्तं भिन्नस्वरञ्चापि विवर्ज्जयेच्च ।

गण्डमालामाह—

कर्कन्धुकोलामलकप्रमाणैः कक्षांसमन्यागलवङ्क्षणेषु ।
मेदःकफाभ्यां चिरमन्दपाकैः स्याद्गण्डमाला वहुभिश्च गण्डैः ।

अपचीमाह—

तं ग्रन्थिभिश्चामलकास्थिमात्रैर्मत्स्याण्डजालप्रतिमैस्तथान्यै ।
रनन्यवर्णैरुपचीयमानं चयप्रकर्षादपचीं वदन्ति ।
कण्डूयुतास्तेऽल्परुजः प्रभिन्नाः ।

स्रवन्ति नश्यन्ति भवन्ति चान्ये।
मेदः कफाभ्यां खलु रोग एष।
सुदुस्तरो वर्षगणानुवन्धः।

ग्रन्थिमाह—

वातादयो मांसमसृक् प्रदुष्टाः संदुष्य मेदश्च तथा शिराश्च।
वृत्तोन्नतं विग्रथितञ्च शोथं कुर्व्वन्त्यतो ग्रन्थिरिति प्रदिष्टः।

वातग्रन्थिमाह—

आयम्यते वृश्चयति तुद्यते च प्रत्यस्यते मथ्यति भिद्यते च।
कृष्णोमृदुर्व्वस्ति रिवाततश्च भिन्नः स्रवेच्चानिलजोऽस्रमच्छं।

पित्तग्रन्थिमाह—

दंदह्यते धूप्यति वृश्चयते च पापच्यते प्रज्वलतीव चापि।
रक्तः सपीतोप्यथवापि पित्ताद् भिन्नः स्रवेदुष्णमतीव चास्रं।

कफग्रन्थिमाह—

शीतोऽविवर्णोऽल्परुजोऽतिकण्डूः पाषाणवत् संहननोपपन्नः।
चिराभिवृद्धश्च कफप्रकोपाद्भिन्नः स्रवेच्छुक्लघनञ्च पूयं।

मेदोग्रन्थिमाह—

शरीरवृद्धिक्षयवृद्धिहानिः स्निग्धो महान् कण्डूयुतोऽरुजश्च।
मेदःकृतो गच्छति चात्रभिन्ने पिण्याकसर्पिःप्रतिमन्तु मेदः

शिराजग्रन्थेः संप्राप्तिमाह—

व्यायामजातैरबलस्य तैस्तैराक्षिप्य वायुस्तु शिराप्रतानं।
संकुच्य संपीड्य विशोष्य चापि ग्रन्थिं करोत्युन्नतमाशु वृत्तं।

कृच्छ्रसाध्यत्व मसाध्यत्वञ्चाह—

ग्रन्थिः शिराजः स तु कृच्छ्रसाध्यो भवेद्यदि स्यात् सरुजश्चलश्च।
स चारुजश्चाप्यचलो महांश्च मर्म्मोत्थितश्चापि विवर्ज्जनीयः॥

अर्व्वुदमाह—

गात्रप्रदेशे क्वचिदेव दोषाः संमूर्च्छिता मांसमसृक् प्रदूष्य।
वृत्तं स्थिरं मन्दरुजं महान्त मनल्पमूलं चिरवृद्ध्यपाकं।
कुर्व्वन्ति मांसोच्छ्रयमत्यगाधं तदर्व्वुदं शास्त्रविदो वदन्ति।

शोणितजं मांसजञ्च विहाय चतुर्णामर्व्वुदानां लक्षण मतिदिशन्नाह—

वातेन पित्तेन कफेन चापि रक्तेन मांसेन च मेदसा वा।
तज्जायते तस्य च लक्षणानि ग्रन्थेः समानानि तदा भवन्ति।

रक्तार्व्वुदस्य संप्राप्तिलक्षणासाध्यत्वान्याह—

दोषः प्रदुष्टो रुधिरं शिराश्च सङ्कुच्य संपिण्ड्य ततस्त्वपाकं।
सास्रावमुन्नह्यति मांसपिण्डं मांसाङ्कुरै राचित माशुवृद्धं।
करोत्यजस्रं रुधिरप्रवृत्ति मसाध्यमेतद्रुधिरात्मकन्तु।
रक्तक्षयोपद्रवपीड़ितत्वात् पाण्डुर्भवेदर्व्वुदपीड़ितस्तु।

मांसार्व्वुदस्य संप्राप्तिलक्षणासाध्यत्वान्याह—

मुष्टिप्रहारादिभिरर्द्दितेऽङ्गे मांसं प्रदुष्टं जनयेद्धि शोथं।
अवेदनं स्निग्धमनन्यवर्णमपाकमश्मोपम मप्रचाल्यं।
प्रदुष्टमांसस्य नरस्य गाढ़मेतद्भवेन्मांसपरायणस्य।
मांसार्व्वुद न्त्वेतदसाध्यमुक्तं

साध्येष्वप्यसाध्यप्रकारानाह—

साध्येष्वपीमानि तु वर्ज्जयेच्च।
संप्रस्रुतं मर्म्मणि यच्च यात स्रोतःसु वा यच्च भवेदच. ल्यं

अध्यर्बुदमाह—

यज्जायतेऽन्यत् खलु पूर्व्वजाते ज्ञेयं तदध्यर्व्बुदमर्बुदज्ञैः।
यद्द्वन्द्वजातं युगपत् क्रमाद्वा द्विरर्व्बुदं तच्च भवेदसाध्यं।

अर्व्बुदानां पाकाभावे हेतुमाह—

न पाकमायान्ति कफाधिकत्वात् मेदो बहुत्वाच्च विशेषतस्तु।
दोषस्थिरत्वात् ग्रथनाच्च तेषां सर्व्वार्व्बुदान्येव निसर्गतस्तु।

श्लीपदाधिकारः।

संप्राप्तिपूर्व्विकां निरुक्तिमाह—

यः सज्वरो वङ्क्षणजो भृशार्त्तिः शोथो नृणां पादगतः क्रमेण।
तत् श्लीपदं स्यात् करकर्णनेत्रशिश्नौष्ठनासास्वपि केचिदाहुः।

वातजमाह—

वातजं कृष्णरूक्षञ्च स्फुटितं तीव्रवेदनं।
अनिमित्तरुजञ्चैव बहुशोज्वर एव च।

पित्तजमाह—

पित्तजं पीतसङ्काशं दाहज्वरयुतं मृदुः।

श्लेष्मजमाह—

श्लैष्मिकं स्निग्धवर्णञ्च श्वेतं पाण्डु गुरु स्थिरं।

असाध्यलक्षणमाह—

वल्मीकमिव सञ्जातं कण्टकैरुपचीयते ।
अब्दात्मकं महत्तच्च वर्ज्जनीयं विशेषतः ।

त्रिष्वपि श्लीपदेषु कफप्राधान्यमाह—

त्रीण्यप्येतानि जानीयात् श्लीपदानि कफोच्छ्रयात् ।
गुरुत्वञ्च महत्त्वञ्च यस्मान्नास्ति कफं विना ।

श्लीपदसम्भवहेतुं देशमाह—

पुराणोदकभूयिष्ठा सर्व्वर्त्तुषु च शीतलाः ।
ये देशा स्तेषु जायन्ते श्लीपदानि विशेषतः ।

अपरमसाध्यलक्षणमाह—

यच्छ्लेष्मलाहारविहार जातं पुंसः प्रकृत्यापि कफात्मकस्य ।
सास्राव मत्युन्नतसर्व्वलिङ्गं सकण्डुरं श्लेष्मयुतं विवर्ज्ज्यं ।

विद्रध्यधिकारः ।

संप्राप्ति पूर्व्विकां निरुक्तिमाह—

त्वग्रक्तमांसमेदांसि संदूष्यास्थिसमाश्रिताः ।
दोषाः शोथं शनै र्घोरं जनयन्त्युच्छ्रिता भृशं ।
महामूलं रुजावन्तं वृत्तं वाप्यथवाऽऽयतं ।
स वै शीघ्रविदाहित्वाद्विद्रधीत्यभियते ।

षड्विधत्वं विभजते—

पृथग्दोषैः समस्तैश्च क्षतेनाप्यसृजा तथा।
षसामपि हि तेषान्तु लक्षणं सं प्रवक्ष्यते।

वातजमाह—

कृष्णोऽरुणो वा विषमो भृशमत्यर्थवेदनः।
चित्रोत्थानप्रपाकश्च विद्रधिर्वातसम्भवः।

पित्तजमाह—

पक्वोडुम्बरसङ्काशः श्यावो वा ज्वरदाहवान्।
क्षिप्रोत्थानप्रपाकश्च विद्रधिः पित्तसम्भवः।

कफजमाह—

शरावसदृशः पाण्डुः शीतः स्निग्धोऽल्पवेदनः।
चिरोत्थानप्रपाकश्च सकण्डुश्च कफोत्थितः।

पक्वानां स्रावलक्षणमाह—

तनुपीतसिताश्चैषां मस्रावाः क्रमशः स्मृताः।

सन्निपातजमाह—

नानावर्णरुजास्रावो घाटालो विषमो महान्।
विषमं पच्यते चापि विद्रधिः सान्निपातिकः।

आगन्तुविद्रधे र्निदानसंप्राप्तिलक्षणान्याह—

तै स्तैर्भावैरभिहते क्षते वाऽपथ्यकारिणः।
क्षतोष्मा वायुविसृतं सरक्तं पित्तमीरयेत्।

ज्वरस्तृष्णा च दाहश्च जायते तस्य देहिनः ।
आगन्तु विद्रधिर्ज्ञेय पित्तविद्रधिलक्षणः ।

रक्तविद्रधिमाह—

कृष्णस्फोटावृतः श्याव स्तीव्रदाहरुजाज्वरः ।
पित्तविद्रधिलिङ्गस्तु रक्तविद्रधि रुच्यते ।

अन्तर्विद्रधे र्निदानं संप्राप्तिञ्चाह—

गुर्व्वसात्म्यविरुद्धान्न शुष्कसंक्लिन्नभोजनात् ।
अतिव्यवायाव्यायामवेगाघातविदाहिभिः ।
पृथक् सम्भूय वा दोषाःकुपिता गुल्मरूपिणं ।
वल्मीकवत्समुन्नद्ध मन्तःकुर्व्वन्ति विद्रधिं ।

तस्याधिष्ठानमाह—

गुदे वस्तिमुखे नाभ्यां कुक्षौ वङ्क्षणयोस्तथा ।
वृक्कयोः प्लीह्नि यकृति हृदि वा क्लोम्नि वाप्यथ ।

तस्य सामान्यलिङ्ग मतिदेशेनाह—

तेषां मुक्तानि लिङ्गानि वाह्यविद्रधिलक्षणैः ।

अधिष्ठानविशेषेण लिङ्गविशेषमाह—

अधिष्ठानविशेषेण लिङ्गं शृणु विशेषतः ।
'गुदे' वातनिरोधश्च 'वस्तौ' कृच्छ्राल्पमूत्रता ।
'नाभ्यां' हिक्का तथाऽऽटोपः 'कुक्षौ' मारुतकोपनं ।
कटीपृष्ठग्रहस्तीव्रो 'वङ्क्षणोत्थे' तु विद्रधौ ।
'वृक्कयोः' पार्श्वसङ्कोचः 'प्लीह्नि' उच्छ्वासावरोधनं ।

सर्व्वाङ्गप्रग्रहस्तीव्रो 'हृदि' कासश्च जायते ।
श्वासो 'यकृति' हिक्का च 'क्लोम्नि' पिपीयते पयः ।

स्रावनिर्गममार्गमाह—

नाभेरुपरिजाः पक्का यान्त्यूर्द्ध मितरे त्वधः ।

साध्यत्वादिकमाह—

अधःस्रुतेषु जीवेत्तु स्रुतेष्वूर्द्ध्वं न जीवति ।
हृन्नाभिवस्तिवर्ज्ज्या ये तेषु भिन्नेषु वाह्यतः ।
जीवेत् कदाचित् पुरुषो नेतरेषु कदाचन ।

आर्त्तवजं मक्कल्लसंज्ञकं विद्रधिमाह—

स्त्रीणामपप्रजातानां प्रजातानां यथाहितैः ।
दाहज्वरकरो घोरो जायते रक्तविद्रधिः ।
अपि सम्यक् प्रजाताना मसृक् कायादनिःसृतम् ।
रक्तजंविद्रधिं विद्यात् कुक्षौ मक्कल्लसंज्ञितं ।
सप्ताहान्नोपशान्तश्चेत् ततोऽसौ संप्रपच्यते ।

स्तनविद्रधिमाह—

एवमेव स्तनसिरा विवृताः प्राप्य योषिताम् ।
सूतानां गर्भिणीनां वा सम्भवेच्छ्वयथु र्घनः ।
स्तने सदुग्धेऽदुग्धे वा वाह्यविद्रधिलक्षणः ।
साध्या विद्रधयः पञ्च विवर्ज्ज्यः सान्निपातिकः ।
आमो वा यदि वा पक्को महान् वा यदि चेतरः ।
सर्व्वो मर्म्मोत्थितश्चापि विद्रधिः कष्ट उच्यते ।

आमपक्वविदग्धत्वं तेषां शोथवदादिशेत्।
आध्मात बद्धनिष्यन्दं छर्द्दिहिक्काटषान्वितं।
रुजाश्वाससमायुक्तं विद्रधि नाशयेन्नरं।

व्रणशोथाधिकारः।

व्रणशोथमाह—

एकदेशोत्थितः शोथो व्रणानां पूर्व्वलक्षणं। (क)
षड्‌विधः स्यात् पृथक् सर्व्वरक्तागन्तुनिमित्तजः।

संख्यामाह—

शोथाः षड़ेते विज्ञेयाः प्रागुक्तैः शोथलक्षणैः। (ख)
विशेषः कथ्यते चैषां पक्वापक्वादिनिश्चये।

(क) **प्रपूर्त्तिः**—शोफसमुत्थाना ग्रन्थिविद्रध्यलजीप्रभृतयः प्रायेण व्याधयोऽभिधास्यम्येऽनेकाकृतय स्तैं विलक्षणः पृथुर्ग्रथितः समो विषमो वा त्वङ्मांसस्थायी दोषसङ्घातः शरीरैकदेशोत्थितः शोफ इत्युच्यते।

(ख) **प्रपूर्त्तिः**—दोषरूपव्यञ्जनै र्व्रणस्य लक्षणानि व्याख्यास्यामः। तत्र 'वातशोफो' ऽरुणः कृष्णो वा परुषो मृदुरनवस्थितास्तोदादयश्चात्र वेदनाविशेषा भवन्ति। 'पित्तशोफः' पीतोमृदुः सरक्तो वा शीघ्रानुसारी चोषादयश्चात्र वेदनाविशेषा भवन्ति। 'श्लेष्मशोफः' पाण्डुः शुक्लो वा कठिनः शीतः स्निग्धो मन्दानुसारी कण्ड्वादयश्चात्र वेदनाविशेषा भवन्ति। सर्व्ववर्णवेदनः सन्निपातजः। पित्तवच्छोणितजोऽतिकृष्णश्च। पित्तरक्तलक्षण आगन्तुर्लोहितावभासश्च।

वातादिभेदेन विशेषलक्षणमाह—

विषमं पच्यते वातात् पित्तोत्थश्चाचिराच्चिरं ।
कफजः पित्तवच्छोथो रक्तागन्तुसमुद्भवः ।

आमलक्षणमाह—

मन्दोष्मताल्पशोथत्वं काठिन्यं त्वक्सवर्णता ।
मन्दवेदनता चैतत् शोथानामामलक्षणं ।

पच्यमानलक्षणमाह—

दह्यते दहनेनेव क्षारेणेव च पच्यते ।
पिपीलिकागणेनेव दश्यते छिद्यते तथा ।
भिद्यते चैव शस्त्रेण दण्डेनेव च ताड्यते ।
पीड्यते पाणिनेवान्तः सूचीभिरिव तुद्यते ।
सोषाचोषो विवर्णः स्यादङ्गुल्येवावघट्यते ।
आसने शयने स्थाने शान्तिं वृश्चिकविद्धवत् ।
न गच्छेदाततः शोथो भवेदाध्मातवस्तिवत् ।
ज्वरतृष्णारुचिश्चैव पच्यमानस्य लक्षणं ।

पक्वलक्षणमाह—

वेदनोपशमः शोथो लोहितोऽल्पो न चोन्नतः ।
प्रादुर्भावो बलीनाञ्च तोदः कण्डूर्मुहुर्मुहुः ।
उपद्रवानां प्रशमो निम्नता स्फुटनं त्वचां ।
वस्ताविवाम्बसञ्चारः स्याच्छोथेऽङ्गुलिपीड़िते ।
पूयस्य पीड़यत्येक मन्तमन्ते च पीड़िते ।
भक्ताकाङ्क्षा भवेच्चैतच्छोथानां पक्वलक्षणं ।

पाककाले सर्व्वदोषसम्बन्धमाह—

नर्त्तेऽनिलाद्रुङ् न विना च पित्तं पाकः कफञ्चापि विना न पूयः ।
तस्माद्धि सर्व्वे परिपाककाले पचन्ति शोथां स्त्रय एव दोषाः ।

अविनिःसृतस्य पूयस्य दोषमाह—

कक्षं समाश्रित्य यथैव वह्निः वाय्वारितः संदहति प्रसह्य ।
तथैव पूयोऽप्य विनिःसृता हि मांसं सिराः स्नायु च खादतीह ।

आमच्छेदादिदोषमाह—

यश्छिनत्त्याममज्ञानात् यो वा पक्कमुपेक्षते ।
श्वपचाविव मन्तव्यौ तावनिश्चितकारिणौ ।
आमं विदह्यमानञ्च सम्यक् पक्कञ्च यो भिषक् ।
जानीयात् स भवेद्वैद्यः शेषा स्तस्करवृत्तयः ।

शारीरव्रणाधिकारः ।

शारीरागन्तुव्रणावाह—

द्विधा व्रणः स विज्ञेयः शारीरागन्तुभेदतः ।
दोषैराद्यस्तयोरन्यः शस्त्रादिक्षतसम्भवः ।

वातजव्रणमाह—

स्तब्धः कठिनसंस्पर्शो मन्दस्रावो महारुजः ।
तुद्यते स्फुरति श्यावो व्रणो मारुतसम्भवः ।

पित्तजव्रणमाह—

तृष्णामोहज्वरक्लेददाहदुष्ट्यवदारणैः ।
व्रणं पित्तकृतं विद्याद्गन्धैः स्रावैश्च पूतिकैः ।

श्लेष्मजव्रणमाह—

बहुपिच्छो गुरुः स्निग्धः स्तिमितो मन्दवेदनः ।
पाण्डुवर्णोऽल्पसंक्लेदश्चिरपाकी कफव्रणः ।

रक्तजव्रणमाह—

रक्तो रक्तस्रुतीरक्तात्

द्वन्द्वजसन्निपातजावाह—

द्वित्रिजः स्यात्तदन्वयैः ।

साध्यत्वादिलक्षणमाह—

त्वङ्मांसजः सुखे देशे तरुणस्यानुपद्रवः ।
धीमतोऽभिनवः काले सुखे साध्यः सुखं व्रणः ।
गुणैरन्यतमैर्हीनस्ततः कृच्छ्रो व्रणः स्मृतः ।
सर्वैर्विहीनो विज्ञेय स्त्वसाध्यो भूर्य्युपद्रवः ।

दुष्टव्रणलक्षणमाह—

पूतिः पूयातिदुष्टासृक् स्राव्युत्सङ्गो चिरस्थितिः ।
दुष्टो व्रणोऽतिगन्धादिः शुद्धलिङ्गविपर्य्ययः ।

शुद्धव्रणलक्षणमाह—

जिह्वातलाभोऽति मृदुः श्लक्ष्णः स्निग्धोऽल्पवेदनः ।
सुव्यवस्थो निरास्रावः शुद्धो व्रण इति स्मृतः ।

रुह्यमानव्रणलक्षणमाह—

कपोतवर्णप्रतिमा यस्यान्ताः क्लेदवर्ज्जिताः ।
स्थिराश्च पिड़कावन्तो रोहतीति तमादिशेत् ।

सम्यग्रूढ़व्रणलक्षणमाह—

रूढ़वर्त्मानमग्रन्थिमशून मरुजं व्रणं ।
त्वक्सवर्णं समतलं सम्यग्रूढ़ं विनिर्द्दिशेत् ।

व्याधिविशेषेण व्रणस्य कृच्छ्रसाध्यत्वमाह—

कुष्ठीनां विषजुष्टानां शोषिणां मधुमेहिनां ।
व्रणाः कृच्छ्रेण सिध्यन्ति येषाञ्चापि व्रणे व्रणाः ।

दोषजस्य स्रावविशेषेणासाध्यत्वमाह—

वसां मेदोऽथमज्जानं मस्तुलुङ्गञ्च यः स्रवेत् ।
आगन्तुजो व्रणः सिध्येन्न सिध्येद्दोषसम्भवः ।

अरिष्टरूपां गन्धविकृतिमाह—

मद्यागुर्व्वाज्यसुमनःपद्मचन्दनचम्पकैः ।
सगन्धा दिव्यगन्धाश्च मुमूर्षूणां व्रणाः स्मृताः ।

असाध्यलक्षणमाह—

ये च मर्म्मस्वसंभूता भवन्त्यत्यर्थवेदनाः ।
दह्यते चान्तरत्यर्थं वहिः शीताश्च ये व्रणाः ।
दह्यन्ते वहिरत्यर्थं भवन्त्यन्तश्च शीतलाः ।
प्राणमांसक्षयश्वासकासारोचकपीड़िताः ।
प्रवृद्धपूयरुधिरा व्रणा येषाञ्च मर्म्मसु ।

क्रियाभिः सम्यगारब्धा न सिध्यन्ति च ये व्रणाः ।
वर्ज्जयेदपि तान् वैद्यः संरक्षन्नात्मनो यशः ।

आगन्तुव्रणाधिकारः ।

आगन्तुव्रणमाह—

नानाधारमुखैः शस्त्रैर्नानास्थाननिपातितैः ।
भवन्ति नानाकृतयो व्रणास्तांस्तान्निबोध मे ।

तस्य भेदानाह—

छिन्नं भिन्नं तथा विद्धं क्षतं पिच्चित मेव वा ।
घृष्ट माहु स्तथा षष्ठं तेषां वक्ष्यामि लक्षणं ।

छिन्नलक्षणमाह—

तिर्य्यक् छिन्नऋजुर्व्वापि यो व्रण स्त्वायतो भवेत् ।
गात्रस्य पातनं तद्धि छिन्न मित्यभिधीयते ।

भिन्नलक्षणमाह—

शक्तिदन्तेषुखड्गाग्रविषाणैराशयो हतः ।
यत् किञ्चित् प्रस्रवेत्तद्धि भिन्नलक्षणमुच्यते ।

आशयानां सामान्यभिन्नलक्षणमाह—

स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च ।
हृदुण्डुकःफुपफुसश्च कोष्ठ इत्यभिधीयते ।

तस्मिन् भिन्ने रक्तपूर्णे ज्वरो दाहश्च जायते।
मूत्रमार्गगुदास्येभ्यो रक्तं घ्राणाच्च गच्छति।
मूर्च्छाश्वासतृषाध्मान मभक्तच्छन्द एव च।
विण्मूत्रवातसङ्गश्च स्वेदास्रावोऽक्षिरक्तता।
लोहगन्धित्वमास्यस्य गात्रदौर्गन्ध्य मेव च।
हृच्छूलं पार्श्वयोश्चापि

विशिष्टलक्षणमाह—

विशेषश्चात्र मे शृणु।
आमाशयस्थे रुधिरे रुधिरं छर्दयत्यपि।
आध्मानमतिमात्रञ्च शूलञ्च भृशदारुणं।
पक्वाशयगते चापि रुजा गौरव मेव च।
अधःकाये विशेषेण शीतता च भवेदिह।

विद्धलक्षणमाह—

सूक्ष्मास्यशल्याभिहतं यदङ्गन्त्वाशयं विना।
उत्तुण्डितं निर्गतं वा तद्विद्धमिति निर्द्दिशेत्।

क्षतलक्षणमाह—

नातिछिन्नं नातिभिन्न मुभयोर्लक्षणान्वितं।
विषमं व्रणमङ्गे यत् तत्क्षतन्त्वभिधीयते।

पिच्चितलक्षणमाह—

प्रहारपीड़नाभ्यान्तु यदङ्गं पृथुतां गतं।
सास्थि तत् पिच्चितं विद्यान्मज्जरक्तपरिप्लुतं।

घृष्टलक्षणमाह—

घर्षणादभिघाताद्वा यदङ्गं विगतत्वचं ।
ऊषास्रावान्वितं तच्च घृष्टमित्यभिधीयते ।

कोष्ठभेदमाह—

श्यावं सशोथं पीड़काचितञ्च मुहुर्मुहुः शोणितवाहिनञ्च ।
मृदून्नतं वुद्बुदतुल्यमांसं व्रणं सशल्यं सरुजं वदन्ति ।
त्वचोऽतीत्य शिरादीनि भित्त्वा वा परिहृत्य वा ।
कोष्ठे प्रतिष्ठितं शल्यं कुर्य्यादुक्तानुपद्रवान् ।

असाध्यकोष्ठभेदलक्षणमाह—

तत्रान्त्रर्लोहितं पाण्डु शीतपादकराननं ।
शीतोच्छ्वासं रक्तनेत्रमानद्धञ्च विवर्ज्जयेत् ।

मांससिरास्नाय्वस्थिसन्धिमर्म्मसु विक्षतेषु सामान्यलिङ्गमाह—

भ्रमः प्रलापः पतनं प्रमोहो विचेष्टनं ग्लानिरथोष्णता च ।
स्रस्ताङ्गता मूर्च्छनमूर्द्धवात स्तीव्रारुजा वातकृताश्च तास्ताः ।
मांसोदकाभं रुधिरञ्च गच्छेत् सर्व्वेन्द्रियार्थोपरम स्तथैव ।
दशार्द्धसंख्येष्वथ विक्षतेषु सामान्यतो मर्म्मसु लिङ्गमुक्तं ।

अमर्म्मरूपाणां सिरादीनां विद्धलक्षणमाह—

सुरेन्द्रगोपप्रतिमं प्रभूतं रक्तं स्रवेत्तत् क्षतजश्च वायुः ।
करोति रोगान् विविधान् यथोक्तान्
शिरासु विद्धास्वथवा क्षतासु ।
कौब्ज्यं शरीरावयवावसादः क्रियास्वशक्तिस्तुमुला रुजश्च ।
चिराद्व्रणोरोहति यस्य चापि तं स्नायुविद्धं पुरुषं व्यवस्येत् ।

शोषाभिवृद्धिस्तुमुला रुजश्च वक्षश्चयः सर्व्वत एव शोथः ।
क्षतेषु सन्धिष्वचलाचलेषु स्यात् सर्व्वकर्म्मोपरमश्च लिङ्गं ।
घोरा रुजो यस्य निशादिनेषु सर्व्वास्ववस्थासु च नैति शान्तिं ।
भिषग्विपश्चिद्विदितार्थसूत्र स्तमस्थिविद्धं पुरुषं व्यवसेत् ।

मर्म्मरूपाणां शिरादीनां विद्धलक्षण मतिदेशेनाह—

यथास्व मेतानि विभावयेच्च लिङ्गानि मर्म्मस्वभिताड़ितेषु ।

मांसमर्म्मणो विद्धस्य लक्षणमाह—

पाण्डुर्व्विवर्णः स्पर्शितं न वेत्ति
यो मांसमर्म्मण्यभिपीड़ितः स्यात् ।

सर्व्वव्रणानामुपद्रवानाह—

विसर्पः पक्षघातश्च शिरास्तम्भोऽपतानकः ।
मोहोन्मादव्रणरुजो ज्वरस्तृष्णाहनुग्रहः ।
कासश्छर्द्दिरतीसारो हिक्का श्वासः सवेपथुः ।
षोड़शोपद्रवाः प्रोक्ता व्रणानां व्रणचिन्तकैः ।

भग्नाधिकारः ।

अव्रणं भग्नमाह—

भग्नं समासाद्द्विविधं हुताश ! काण्डे च सन्धौ च हि तत्र सन्धौ ।
उत्पिष्टविश्लिष्टविवर्त्तितञ्च तिर्य्यग्गतं क्षिप्तमधश्च षट् च ।

सन्धिभग्नस्य सामान्यलिङ्गमाह—

प्रसारणाकुञ्चनवर्त्तनोग्रा रुक्स्पर्शविद्वेषणमेतदुक्तं ।
सामान्यतः सन्धिगतस्य लिङ्गं ।

उत्पिष्टादिलक्षणमाह—

उत्पिष्टसन्धेः श्वयथुः समन्तात् विशेषतो रात्रिभवा रुजा च।
विश्लिष्टजे तौ च रुजा च नित्यं विवर्त्तिते पार्श्वरुजश्च तीव्रः।
तिर्य्यग्गते तीव्ररुजो भवन्ति।
क्षिप्तेऽति शूलं विषमत्वमस्थ्नोः।
क्षिप्ते त्वधो रुग्विघटश्च सन्धेः।

काण्डभग्नमाह—

काण्डे त्वतः कर्कटकाश्वकर्ण विचूर्णितं पिच्चितमस्थिकच्छिका।
काण्डेषु भग्नं ह्यतिपातितञ्च मज्जागतञ्च स्फुटितञ्च वक्रं।
छिन्नं द्विधा द्वादशधापि काण्डे स्रस्ताङ्गता शोथरुजातिवृद्धिः।
संपीड्यमाने भवतीह शब्दः स्पर्शासहं स्पन्दनतोदशूलाः।
सर्व्वास्ववस्थासु न शर्म्मलाभो भग्नस्य काण्डे खलु चिह्न मेतत्।

काण्डभग्नस्य द्वादशप्रकारादप्यधिकत्वमाह—

भग्नन्तु काण्डे बहुधा प्रयाति समासतो नामभिरेव तुल्यम्।

कष्टसाध्यतामाह—

अल्पाशिनोऽनात्मवतो जन्तो र्वातात्मकस्य च।
उपद्रवैर्वा जुष्टस्य भग्नं कृच्छ्रेण सिध्यति।

असाध्यतामाह—

भिन्नं कपालं कट्यान्तु सन्धिमुक्तं तथा च्युतं।
जघनं प्रतिपिष्टञ्च वर्ज्जयेद्धि विचक्षणः।
असंश्लिष्टकपालञ्च ललाटे चूर्णितञ्च यत्।
भग्नं स्तनान्तरे पृष्ठे शङ्खे मूर्द्ध्नि च वर्ज्जयेत्।

अनवधानतः सर्व्वेषामसाध्यत्वमाह—

सम्यक्सन्धितमप्यस्थि दुर्निक्षेपनिवन्धनात्।
संक्षोभाद्वापि यद्गच्छेद्विक्रियां तच्च वर्ज्जयेत्।

अस्थिविशेषेण भग्नविशेषमाह—

तरुणास्थीनि नम्यन्ते भिद्यन्ते नलकानि च।
कपालानि विभज्यन्ते स्फुटन्ति रुचकानि च।

नाड़ीव्रणाधिकारः।

नाड़ीव्रणस्य सम्भवं निरुक्तिञ्चाह—

यः शोथमाममतिपक्क मुपेक्षतेऽज्ञो
यो वा व्रणं प्रचुरपूयमसाधुवृत्तः।
अभ्यन्तरं प्रविशति प्रविदार्य्य तस्य
स्थानानि पूर्व्वविहितानि ततः स पूयः।
तस्यातिमात्रगमनाद्गतिरिष्यते तु
नाड़ीव यद्वहति तेन मता तु नाड़ी।

तस्य संख्यामाह—

दोषैस्त्रिभिर्भवति सा पृथगेकशश्च
संमूर्च्छितैरपि च शल्यनिमित्ततोऽन्या।

वातजामाह—

तत्रानिलात् परुषसूक्ष्ममुखी सशूला
फेनानुविद्धमधिकं स्रवति क्षपासु।

पित्तजामाह—

पित्तात्तृषाज्वरकरी परिदाहयुक्ता
पीतं स्रवत्यधिकमुष्ण महःसु चापि ।

कफजामाह—

ज्ञेया कफाद्बहुघनार्ज्जुनपिच्छिलास्रा
स्तब्धा सकण्डुररुजा रजनीप्रवृद्धा ।

त्रिदोषजामाह—

दाहज्वरश्वसनमूर्च्छनवक्त्रशोषा
यस्यां भवन्त्यभिहितानि च लक्षणानि ।
तामादिशेत् पवनपित्तकफप्रकोपाद्
घोरामसुक्षयकरीमिव कालरात्रिं ।

शल्यजामाह—

नष्टं कथञ्चिदनुमार्गमुदीरितेषु
स्थानेषु शल्यमचिरेण गतिं करोति ।
सा फेनिलं मथितमुष्णमसृग्विमिश्रं
स्रावं करोति सहसा सरुजा च नित्यं ।

असाध्यत्वादिकमाह—

नाड़ी त्रिदोषप्रभवा न सिद्धे-
च्छेषाश्चतस्रः खलु यत्नसाध्याः ।

भगन्दराधिकारः ।

चेतं निर्वचनञ्चाह—

गुदस्य द्व्यङ्गुले चेत्रे पार्श्वतः पीड़कार्त्तिकृत् ।
भिन्ना भगन्दरो ज्ञेयः स च पञ्चविधो मतः ।

शतपोनकस्य निदानं लक्षणञ्चाह—

कषाय रुक्षैस्त्वतिकोपितोऽनिल स्त्वपानदेशे पीड़कां करोति यां ।
उपेक्षणात् पाकमुपैति दारुणं रुजा च भिन्नारुणफेनवाहिनी ।
तत्रागमो मूत्रपुरीषरेतसां व्रणैरनेकैः शतपोनकं वदेत् ।

उष्ट्रग्रीवस्य निदानं लक्षणञ्चाह—

प्रकोपनैः पित्तमतिप्रकोपितं करोति रक्तां पीड़कां गुदाश्रितां ।
तदाशुपाकाद्धिमपूतिवाहिनीं भगन्दरन्तूष्ट्रशिरोधरं वदेत् ।

परिस्रावीलक्षणमाह—

कण्डूयनोघनस्रावी कठिनो मन्दवेदनः ।
श्वेतावभासः कफजः परिस्रावी भगन्दरः ।

शम्बूकावर्त्त लक्षणमाह—

बहुवर्णरुजास्रावा पिड़का गोस्तनोपमा ।
शम्बूकावर्त्तवन्नाड़ी शम्बूकावर्त्तकोमतः ।

उन्मार्गि भगन्दरमाह—

क्षतान्नतिः पायुगता विवर्द्धते
ह्युपेक्षणात् स्युः क्रिमयो विदार्य्य ते ।

प्रकुर्व्वते मार्गमनेकधा मुखै
र्व्रणैस्तदुन्मार्गि-भगन्दरं वदेत् ।

सर्व्वेषां दुःसाध्यत्वासाध्यत्वमाह—

घोराः साधयितुं दुखाः सर्व्वं एव भगन्दराः ।
तेष्वसाध्यस्त्रिदोषोत्थः क्षतजश्च विशेषतः ।

अवस्थाविशेषेऽसाध्यत्वमाह—

वातमूत्रपुरीषाणि क्रिमयः शुक्रमेव च ।
भगन्दरात् स्रवन्तस्तु नाशयन्ति तमातुरं ।

उपदंशाधिकारः ।

निदानमाह—

हस्ताभिघातान्नखदन्तपातादधावनादत्युपसेवनाद्वा ।
योनिप्रदोषाच्च भवन्ति शिश्ने पञ्चोपदंशा विविधापचारैः ।

वातजमाह—

सतोदभेदस्फुरणैः सकृष्णैः स्फोटैर्व्यवस्येत् पवनोपदंशं ।

पित्तजमाह—

पीतैर्बहुक्लेदयुतैः सदाहैः पित्तेन

रक्तजमाह—

रक्तात् पिशितावभासैः ।
स्फोटैः सकृष्णै रुधिरं स्रवन्तं रक्तात्मकं पित्तसमानलिङ्गम् ।

कफजमाह—

सकण्डुरैः शोथयुतैर्महद्भिः शुक्लै र्घनैः स्रावयुतैः कफेन ।

त्रिदोषजमाह—

नानाविधस्रावरुजोपपन्नं असाध्यमाहुस्त्रिमलोपदंशम् ।

असाध्यलक्षणमाह—

विशीर्णमांसं क्रिमिभि: प्रजग्धं मुष्कावशेषं परिवर्ज्जयेच्च ।

सञ्जातमात्रे चिकित्साकरणार्थमाह—

संजातमात्रे न करोति मूढ़: क्रियां नरो यो विषये प्रसक्त: ।
कालेन शोथक्रिमिदाहपाकै र्विशीर्णशिश्नो म्रियते स तेन ।

लिङ्गवर्त्तिमाह—

अङ्कुरैरिव संघातैरुपर्युपरिसंस्थितै: ।
क्रमेण जायते वर्त्तिस्ताम्रचूड़शिखोपमा ।
कोषस्याभ्यन्तरे सन्धौ सर्व्वसन्धिगतापि वा ।
अवेदना पिच्छिला च दुश्चिकित्सा त्रिदोषजा ।
लिङ्गवर्त्तिरभिख्याता लिङ्गार्श इति चापरे ।

कुष्ठाधिकार: ।*

निदानमाह—

विरोधीन्यन्नपानानि द्रवस्निग्धगुरूणि च ।
भजतामागतां छर्द्दिं वेगांश्चान्यान् प्रतिघ्नतां ।

---

* सप्तमहाकुष्ठान्येकादशक्षुद्रकुष्ठान्येवमष्टादश कुष्ठानि भवन्ति। कुष्ठानां महत्व-क्षुद्रत्वनिर्द्देशे मतभेदो दृश्यते आचार्य्यानां तथाच—सुश्रुतोक्त-महाकुष्ठानि यथा—(१) अरुणं (२) औदुम्बरं (३) ऋष्यजिह्वं (४) कपालं (५) काकणकं (६) पुण्डरीकं (७) दद्रु: ॥ सुश्रुतोक्त-क्षुद्रकुष्ठानि यथा—(१) स्थूलारुष्कं (२) महाकुष्ठं (३) एककुष्ठं

व्यायामरति सन्ताप मतिभुक्ता निषेविणां ।
घर्म्मश्रमभयार्त्तानां द्रुतं शीताम्बुसेविनां ।
अजीर्णाध्यशिनाञ्चैव पञ्चकर्म्मापचारिणां ।
नवान्नदधिमत्स्यातिलवणाम्लनिषेविणां ।
माषमूलकपिष्टान्नतिलक्षीरगुड़ाशिनां ।
व्यवायञ्चाप्यजीर्णेऽन्ने निद्राञ्च भजतां दिवा ॥
विप्रान् गुरून् धर्षयतां पापं कर्म्मच कुर्व्वतां ।

संप्राप्तिमाह—

वातादयस्त्रयो दुष्टा स्त्वग्रक्तं मांसमम्बु च ।
दूषयन्ति सथीकृत्य शिथरन्तस्ततो बहिः ।
त्वचः कुर्व्वन्ति वैवर्ण्यं दुष्टाः कुष्ठमुशन्ति तम् ।

---

(४) चर्म्मदलं (५) विसर्पः (६) परिसर्पः (७) सिध्म (८) विचर्च्चिका (९) किटिमं (१०) पामा (११) रकसा ॥ चरकोक्त-महाकुष्ठानि यथा—(१) कापालं (२) औदुम्ब (३) मण्डलं (४) ऋष्यजिह्वं (५) पुण्डरीकं (६) सिध्म (७) काकणं ॥ चरकोक्त-क्षुद्रकुष्ठानि यथा—(१) एककुष्ठं (२) चर्म्माख्यं (३) किटिमं (४) वैपादिकं (६) दद्रु-मण्डलं (७) चर्म्मदलं (८) पामा [कच्छूः] (९) विस्फोटः (१०) शतारु (११) विच-र्च्चिका ॥ वाग्भटोक्त महाकुष्ठानि यथा—(१) कापालं (२) औदुम्बरं (३) दद्रुः (४) काकणं (५) पुण्डरीकं (६) ऋष्यजिह्वं ॥ वाग्भटोक्त-क्षुद्रकुष्ठानि यथा—(१) विच-र्च्चिका (२) एककुष्ठं (३) किटिमं (४) सिध्म (५) अलसं (६) विपादिका (७) अरुषि (८) विस्फोटः (९) पामा (१०) चर्म्मदलं ॥ उत्तरोत्तरधात्वनुप्रवेशकारित्वं नास्तीति दृष्टा वाग्भटेन श्वितस्य कुष्ठत्वं नाङ्गीकृतं । दद्रुसिध्मपामाविचर्च्चिकानामपि धात्ववगाहत्वं प्रायशो न दृश्यते । सुश्रुतेन तु पामाविचर्च्चिके क्षुद्ररोगाधिकारे पठिते । अत एते त्वग्विकारा एव ।

निरुक्तिमुखेन श्वित्रस्य बाह्यकुष्ठत्वं दर्शयति—

कालेनोपेक्षितं यस्मात् सर्व्वं कुष्णाति तद् वपुः।
प्रपद्य धातून् व्याप्यान्तः सर्व्वान् संक्लेद्य चावहेत्।
सस्वेदक्लेदसङ्कोथान् क्रिमीन् सूक्ष्मान् सुदारुणान्।
रोमत्वक्-स्नायुधमनी-तरुणास्थीनि यैः क्रमात्।
भक्षयेच्छ्वित्रमस्माच्च कुष्ठबाह्यमुदाहृतम्।

कुष्ठानां त्रिदोषजत्वेऽपि उल्वणदोषेण सप्तप्रकारतामाह—

कुष्ठानि सप्तधा दोषैः पृथग्द्वन्द्वैः समागतैः।
सर्व्वेष्वपि त्रिदोषेषु व्यपदेशोऽधिकत्वतः।

पूर्व्वरूपमाह—

अतिश्लक्ष्णखरस्पर्शस्वेदास्वेदविवर्णताः।
दाहः कण्डूस्त्वचि स्वापस्तोदः कोठोन्नतिर्भ्रमः।
व्रणानामधिकं शूलं शीघ्रोत्पत्तिश्चिरस्थितिः।
रूढ़ानामपि रूक्षत्वं निमित्तेऽल्पेऽतिकोपनं।
रोमहर्षोऽसृजः कार्ष्ण्यं कुष्ठलक्षणमग्रजं।

कापालकलक्षणमाह—

कृष्णारुणकपालाभं यद्रुक्षं परुषं तनु।
"कापालं" तोदबहुलं तत्कुष्ठं विषमं स्मृतं।

उदुम्बरलक्षणमाह—

रुग्दाहरागकण्डूभिः परीतं रोमपिञ्जरं।
उदुम्बरफलाभासं कुष्ठ"मौदुम्बरं" वदेत्।

मण्डललक्षणमाह—

श्वेतं रक्तं स्थिरं स्त्यानं स्निग्धमुत्सन्नमण्डलं।
कृच्छ्रमन्योन्यसंयुक्तं कुष्ठं "मण्डल" मुच्यते।
कर्कशं रक्तपर्य्यन्तमन्तः श्यावं सवेदनं।

ऋष्यजिह्वलक्षणमाह—

यदृष्यजिह्वसंस्थान "ऋष्यजिह्व" तदुच्यते।

पुण्डरीक लक्षणमाह—

सश्वेतं रक्तपर्य्यन्तं पुण्डरीकदलोपमं।
सोत्सेधञ्च सरागञ्च "पुण्डरीकं" प्रचक्षते।

सिध्मलक्षणमाह—

श्वेतं ताम्रं तनु च यद्रजो घृष्टं विमुञ्चति।
प्रायश्चोरसि तत् "सिध्म" मलावुकुसुमोपमं।

काकणलक्षणमाह—

यत् काकणन्तिकावर्णं सपाकं तीव्रवेदनं।
त्रिदोषलिङ्गं तत्कुष्ठं "काकणं" नैव सिध्यति।

एककुष्ठलक्षणमाह—

अस्वेदनं महावास्तु यन्मत्स्यशकलोपमं।
त "देककुष्ठं" चर्म्माख्यं बहुलं हस्तिचर्म्मवत्।

किटिमलक्षणमाह—

श्यावं किणखरस्पर्शं परुषं "किटिमं" स्मृतं।

वैपादिकलक्षणमाह—

"वैपादिकं" पाणिपादस्फुटनं तीव्रवेदनं।

अलसकलक्षणमाह—

कण्डूमद्भिः सरागैश्च गण्डै "रलसकं" चितं ।

दद्रुलक्षणमाह—

सकण्डू रागपिड़कं "दद्रुमण्डल" मुन्नतं ।

चर्म्मदललक्षणमाह—

रक्तं सशूलं कण्डूमत् सस्फोटं यद्दलत्यपि ।
त"च्चर्म्मदल"माख्यातं संस्पर्शासहमुच्यते ।

पामालक्षणमाह—

सूक्ष्मा वह्व्यः पीड़काः स्रावक्त्यः
"पामे"त्युक्ताः कण्डूमत्यः सदाहाः ।

कच्छुलक्षणमाह—

सैव स्फोटैस्तीव्रदाहैरुपेता
ज्ञेया पाण्योः कच्छुरुग्रा स्फिचोश्च ।

शतारुलक्षणमाह—

स्फोटाः श्यावारुणाभासा विस्फोटाः स्युस्तनुत्वचः ।
रक्तं श्यावं सदाहार्त्ति "शतारु" स्याद्बहुव्रणं ।

विचर्च्चिकालक्षणमाह—

सकण्डूः पिड़काः श्यावा बहुस्रावा "विचर्च्चिका" ॥

दोषत्रयनियतं कुष्ठलिङ्गमाह—

खरं श्यावारुणं रूक्षं वातकुष्ठं सवेदनं ।
पित्तात् प्रकुथितं दाहरागस्रावान्वितं मतं ।

कफात् क्लेदि घनं स्निग्धं सकण्डूशैत्यगौरवं।
द्विलिङ्गं द्वन्द्वजं कुष्ठं त्रिलिङ्गं सान्निपातिकं।

कालप्रकर्षात् वाह्यानामिव कुष्ठानां गम्भीरत्वे दृष्टान्तमाह—

यथा वनस्पतिर्जातः प्राप्य कालप्रकर्षणम्।
अन्तर्भूमिं विगाहेत मूलैर्वृष्टिविवर्द्धितैः।
एवं कुष्ठं समुत्पन्नं त्वचि कालप्रकर्षतः।
क्रमेण धातून् व्याप्नोति नरस्याप्रतिकारिणः।

त्वग्गतस्य लक्षणमाह—

त्वकस्थे वैवर्ण्यमङ्गेषु कुष्ठेरौक्ष्यञ्च जायते।
त्वक्स्वापो रोमहर्षश्च स्वेदस्यातिप्रवर्त्तनं।

रक्तगतस्य लक्षणमाह—

कण्डूर्विपूयकश्चैव कुष्ठे शोणितसंश्रिते।

मांसगतस्य लक्षणमाह—

वाहुल्यं वक्त्रशोषश्च कार्कश्यं पिड़कोद्गमः।
तोदः स्फोटः स्थिरत्वञ्च कुष्ठे मांससमाश्रिते।

मेदोगतस्य लक्षणमाह—

कौण्यं गतिक्षयोऽङ्गानां संभेदः क्षतसर्पणं।
मेदःस्थानगते लिङ्गं प्रागुक्तानि तथैव च।

मज्जगतस्य लक्षणमाह—

नासाभङ्गोऽक्षिरागश्च क्षतेषु क्रिमिसम्भवः।
स्वरोपघातश्च भवेदस्थिमज्जसमाश्रिते।

शुक्रागतस्य लक्षणमाह—

दम्पत्यो: कुष्ठबाहुल्याद्दुष्टशोणितशुक्रयो: ।
यदपत्यं तयोर्ज्जातं ज्ञेयं तदपि कुष्ठितं ।

साध्यादिभेदमाह—

साध्यं त्वग्रक्तमांसस्थं वातश्लेश्माधिकञ्च यत् ।
मेदसि द्वन्द्वजं याप्यं

असाध्यत्वमाह—

वर्ज्ज्यं मज्जास्थिसंश्रितं ।
क्रिमितृड्दाहमन्दाग्निसंयुक्तं यत् त्रिदोषजं ।
प्रभिन्नं प्रस्रुताङ्गञ्च रक्तनेत्रं हतस्वरं ।
पञ्चकर्म्मगुणातीतं कुष्ठं हन्तीह मानवं ।

कुष्ठेषु प्रधानदोषमाह—

वातेन कुष्ठं कापालं पित्तेनौदुम्बरं कफात् ।
मण्डलाख्यं विचर्च्चीञ्च ऋष्याख्यं वातपित्तजं ।
चर्म्मैककुष्ठं किटिमं सिध्मालसविपादिका: ।
वातश्लेष्मोद्भवा: श्लेष्मपित्ताद्दद्रुशतारुषी ।
पुण्डरीकं सविस्फोटं पामा चर्म्मदलं तथा ।
सर्व्वै:स्यात् काकणं

सप्तमहाकुष्ठान्याह—

पूर्व्वत्रिकं दद्रु सकाकणं ।
पुण्डरीकर्ष्यजिह्वे च महाकुष्ठानि सप्त तु ।

त्वग्दुष्टितुल्यत्वादत्रैव श्वित्रमाह—

कुष्ठैकसम्भवं श्वित्रं किलासं दारुणञ्च यत्।*
निर्द्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयं।

वातादिभेदेन तस्य लक्षणमाह—

वाताद्रुक्षारुणं पित्तात्ताम्रं कमलपत्रवत्।
सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु।

दोषभेदेन विशेषिधात्वाश्रयत्वं कृच्छ्रत्वञ्चाह क्रमादिति—

(सकण्डूरं) क्रमाद्रक्तमांसमेदःसु चादिशेत्।
वर्णैरेवेदृगुभयं कृच्छ्रं तच्चोत्तरोत्तरं।

असाध्यत्वमाह—

अशुक्लरोमबहुलमसंश्लिष्टमथो नवं।
अनग्निदग्धजं साध्यं श्वित्रं वर्ज्ज्यमतोऽन्यथा।
गुह्यपाणितलौष्ठेषु जातमप्यचिरन्तनं।
वर्ज्जनीयं विशेषेण किलासं सिद्धिमिच्छता।

कुष्ठप्रसङ्गेन अपरानपि संसर्गजान् रोगानाह—

प्रसङ्गाद्गात्रसंस्पर्शा न्निःश्वासात् सहभोजनात्।
एकशय्यासनाच्चैव वस्त्रमाल्यानुलेपनात्।
कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च।
औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरं।

---

* दारुणञ्चारुणं श्वित्रं किलासं नामभिस्त्रिभि। विज्ञेयं त्रिविधं—।

शीतपित्तोदर्द्दकोठाधिकारः ।

निदानं संप्राप्तिञ्चाह—

शीतमारुतसंस्पर्शात् प्रदुष्टौ कफमारुतौ ।
पित्तेन सह सम्भूय वहिरन्तर्व्विसर्पतः ।

पूर्व्वरूपमाह—

पिपासारुचिहृल्लासदेहसादाङ्गगौरवं ।
रक्तलोचनता तेषां पूर्व्वरूपस्य लक्षणं ।

उदर्द्दलक्षणमाह—

वरटीदष्टसंस्थानः शोथः संजायते वहिः ।
सकण्डूतोदवहुलश्छर्द्दिज्वरविदाहवान् ।
उदर्द्दमिति तं विद्याच्छीतपित्तमथापरे ।
वाताधिकं शीतपित्त मुदर्द्दश्च कफाधिकः ।

उदर्द्दस्य धर्म्मान्तरमाह—

सोत्सङ्गैश्च सरागैश्च कण्डूमद्भिश्च मण्डलैः ।
शैशिरः कफजो व्याधि रुदर्द्द इति कीर्त्तितः ।

कोठस्य निदानं लक्षणञ्चाह—

असम्यग्वमनोदीर्णपित्तश्लेष्मान्ननिग्रहैः ।
मण्डलानि सकण्डूनि रागवन्ति वहूनि च ।
उत्कोठः सानुवन्धश्च कोठ इत्यभिधीयते ।

अम्लपित्ताधिकारः ।

अम्लपित्तस्य निदानं लक्षणञ्चाह—

विरुद्धदुष्टाम्लविदाहिपित्तप्रकोपिपानान्नभुजो विदग्धं ।
पित्तं स्वहेतूपचितं पुरा यत्तदम्लपित्तं प्रवदन्ति सन्तः ।
अविपाकक्लमोत्क्लेशतिक्ताम्लोद्गारगौरवैः ।
हृत्कण्ठदाहारुचिभिश्चाम्लपित्तं वदेद्भिषक् ।

तस्य कदाचिदध ऊर्द्ध्वगमनभेदाद्विविधस्याधोगतिं तावदाह—

तृड्दाहमूर्च्छाभ्रममोहकारि प्रयात्यधो वा विविधप्रकारं ।
हृल्लासकोठानलसादहर्षस्वेदाङ्गपीतत्वकरं कदाचित् ।

ऊर्द्ध्वगतिमाह—

वान्तं हरित् पीतकनीलकृष्ण मारक्तरक्ताभ मतीव चाम्लं ।
मांसोदकाभन्त्वतिपिच्छिलाच्छं श्लेष्मानुजातं विविधं रसेन ।
भुक्ते विदग्धे त्वथवाप्यभुक्ते करोति तिक्ताम्लवमिं कदाचित् ।
उद्गारमेवंविधमेव कण्ठहृत्कुक्षिदाहं शिरसो रुजञ्च ।
करचरणदाहमौष्ण्यं महतीमरुचिं ज्वरञ्च कफपित्तं ।
जनयति कण्डूमण्डलपीड़काशतनिचितगात्ररोगनिचयं ।

साध्यत्वादिकमाह—

रोगोऽयमम्लपित्ताख्यो यत्नात् संसाध्यते नवः ।
चिरोत्थितो भवेद्याप्यः कृच्छ्रसाध्यः स कस्यचित् ।

अम्लपित्ते केवलानिलकफानिलकफभावानां संसर्गमाह—

सानिलं सानिलकफं सकफं तच्च लक्षयेत् ।
दोषलिङ्गेन मतिमान् भिषङ् मोहकरं हि तत् ।

वातसंसृष्टस्य लक्षणमाह—

कम्पप्रलापमूर्च्छाचिमिचिमिगात्रावसादशूलानि ।
तमसो दर्शनविभ्रमप्रमोहहर्षाण्यनिलकोपात् ।

कफानुगतस्य लक्षणमाह—

कफनिष्ठीवनगौरवं जड़तारुचिशीतसादवमिलेपाः ।
दहनबलसादकण्डू-निद्राः चिह्नं कफानुगते ।

वातश्लेष्मान्वितस्य लक्षण मतिदेशेनाह—

उभयमिदमेव चिह्नं मारुतकफसम्भवे भवत्यस्रे ।

श्लेष्मपित्तान्वितस्य लक्षणमाह—

तिक्ताम्लकटुकोद्गारहृत्कुक्षिकण्ठदाहकृत् ।
भ्रममूर्च्छारुचिच्छर्दिरालस्यञ्च शिरोरुजा ।
प्रसेको मुखमाधुर्य्यं श्लेष्मपित्तस्य लक्षणं ।

विसर्पाधिकारः ।

निदानपूर्विकां संख्यां निरुक्तिञ्चाह—

लवणाम्लकटूष्णादिसंसेवादोषकोपतः ।
विसर्पः सप्तधा ज्ञेयः सर्व्वतः परिसर्पणात् ।
पृथक्त्रयस्त्रिभिश्चैको विसर्पा द्वन्द्वजा स्त्रयः ।
वातिकः पैत्तिकश्चैव कफजः सान्निपातिकः ।
चत्वार एते विसर्पा वक्ष्यन्ते द्वन्द्वजा स्त्रयः ।
आग्नेयो वातपित्ताभ्यां ग्रन्थ्याख्यः कफवातजः ।

यस्तु कर्द्दमको घोरः स पित्तकफसम्भवः ।

सर्व्वेषामेव रक्तादिदूष्यचतुष्टयदोषत्रयजन्यत्वमाह—

रक्तं लसीका त्वङ्मांसं दूष्यं दोषास्त्रयोमलाः ।
विसर्पाणां समुत्पत्तौ विज्ञेयाः सप्तधातवः ।

वातजस्य निदानं लक्षणञ्चाह—

रूक्षोष्णैः केवलो वायुः पूरणैर्वा समाचितः ।
प्रदुष्टो दूषयन् दूष्यं विसर्पति यथाबलम् ।
तत्र वातात् स विसर्पो वातज्वरसमव्यथः ।
शोथस्फुरणनिस्तोदभेदायासार्त्तिहर्षवान् । (क)

पित्तजस्य निदानं लक्षणञ्चाह—

पित्तमुष्णोपचारादिविदाह्यम्लाशनैश्चितं ।
दूष्यं संदूष्य मार्गांश्च पूरयन् वै विसर्पति ।
पित्ताद् द्रुतगतिः पित्तज्वरलिङ्गोऽतिलोहितः । (ख)

कफजस्य निदानं लक्षणञ्चाह—

स्वाद्वम्ललवणस्निग्धगुर्व्वन्नस्वप्नसञ्चितः ।
कफः संदूषयन् दूष्यं कृच्छ्रमङ्गे विसर्पति ।

(क) प्रपूर्त्तिः—अत्रानुक्तानि कानिचित् लक्षणानि यथा—पिपासाकम्पज्वरारोचकाविपाकाक्षचक्षुषोराकुलत्वमस्त्रागमनं, पिपीलिकासञ्चार इव चाङ्गेषु यस्मिं'श्चावकाशे विसर्पोविसर्पति सोऽवकाशः श्यावारुणावभासः श्वयथुमान् ।

(ख) प्रपूर्त्तिः—अत्रानुक्तानि कानिचित् लक्षणानि यथा—स्वेदोऽतिमात्रमन्तर्दाहः, प्रलापः, शिरोरुक्, चक्षुषोराकुलत्वं, अस्वप्नमरतिर्भ्रमः, शीतवातवारितर्षोऽतिमात्रं, यस्मिं'श्चावकाशे विसर्पोऽनुसर्पति सोऽवकाशस्ताम्रहरितहारिद्रनीलकृष्णरक्तानां वर्णानामन्यतमं पश्यति ।

कफात् कण्डूयुतः स्निग्धः कफज्वरसमानरुक् । (ग)

त्रिदोषजस्य लक्षणमतिदेशेनाह—

सन्निपातसमुत्थश्च सर्व्वलिङ्गसमन्वितः ।

अग्निविसर्पमाह—

वातपित्ताज्ज्वरच्छर्द्दिमूर्च्छातीसारतृड्भ्रमैः ।
अस्थिभेदाग्निसदनतमकारोचकैर्युतः ।
करोति सर्व्वमङ्गञ्च दीप्ताङ्गारावकीर्णवत् ।
यं यं देशं विसर्पश्च विसर्पति भवेत् स सः ।
शान्ताङ्गारासितोनिलो रक्तो वाप्त च चीयते ।
अग्निदग्ध इव स्फोटैः शीघ्रगत्वात् द्रुतं स च ।
मर्म्मानुसारी विसर्पः स्याद्वातोऽतिवल स्ततः ।
व्यथतेऽङ्गं हरेत् संज्ञां निद्राञ्च श्वासमीरयेत् ।
हिक्काञ्च स गतोऽवस्था मीदृशीं लभते न वा ।
क्वचिच्छर्म्मारतिग्रस्तो भूमिशय्यासनादिषु ।
चेष्टमान स्ततः क्लिष्टो मनोदेहप्रमोहवान् ।
दुष्प्रवोधोऽश्नुते निद्रां सोऽग्निवीसर्प उच्यते ।

ग्रन्थिविसर्पमाह—

कफेन रुद्धः पवनो भित्त्वा तं वहुधा कफं ।
रक्तं वा वृद्धरक्तस्य त्वक्‌शिरास्नायुमांसगं ।

(ग) प्रपूर्त्तिः—अत्रानुक्तानि कानिचिल्लक्षणानि यथा—अग्निनाशो, दौर्ब्बल्यं, यस्मिं श्चावकाशे विसर्पति सोऽवकाशः श्वयथुमान् पाण्डुमान् नातिरक्तस्नेहः सुप्तिस्तम्भ-गौरवैरन्वितोऽल्पवेदनः ।

दूषयित्वा तु दीर्घानुवृत्तस्थूलखरात्मनां ।
ग्रन्थीनां कुरुते मालां सरक्तां तीव्ररुग्ज्वरां ।
श्वासकासातीसारास्यशोषहिक्कावमिभ्रमैः ।
मोहवैवर्ण्यमूर्च्छाङ्गभङ्गाग्निसदनैर्युतां ।
इत्ययं ग्रन्थिवीसर्पः कफमारुतकोपजः ।

कर्द्दमविसर्पमाह—

कफपित्ताज्ज्वरःस्तम्भो निद्रा तन्द्रा शिरोरुजा ।
अङ्गावसादविक्षेपौ प्रलापारोचकभ्रमाः ।
मूर्च्छाग्निहानिर्भेदोऽस्थ्नां पिपासेन्द्रियगौरवं ।
आमोपवेशनं लेपः स्रोतसां स च सर्पति ।
प्रायेणामाशयं गृह्णन्नेकदेशं न चातिरुक् ।
पिड़कैरवकीर्णोऽतिपीतलोहितपाण्डुरैः ।
स्निग्धोऽसितो मेचकाभो मलिनः शोथवान् गुरुः ।
गम्भीरपाकः प्राज्योष्मा स्पृष्टः क्लिन्नोऽवदीर्य्यते ।
पङ्कवच्छीर्णमांसश्च स्पष्टस्नायुसिरागणः ।
शवगन्धी च विसर्पः कर्द्दमाख्य मुषन्ति तम् ।

क्षतविसर्पमाह—

वाह्यहेतोः क्षतात् क्रुद्धः सरक्तपित्तमोरयन् ।
विसर्पं मारुतः कुर्य्यात् कुलत्थसदृशैश्चितं ।
स्फोटैः शोथज्वररुजादाहाढ्यं श्यावशोणितं ।
ज्वरातीसारौ वमथुस्त्वङ्मांसदरणं क्लमः ।
अरोचकाविपाकौ च विसर्पाणामुपद्रवाः ।

साध्यत्वादिकमाह—

सिध्यन्ति वातकफपित्तकृता विसर्पाः
सर्व्वात्मकः क्षतकृतश्च न सिद्धिमेति।
पित्तात्मकोऽञ्जनवपुश्च भवेदसाध्यः
कृच्छ्राश्च मर्म्मसु भवन्ति हि सर्व्व एव।

विस्फोटाधिकारः।

निदानमाह—

कट्वम्लतीक्ष्णोष्णविदाहिरूक्षक्षारैरजीर्णाध्यशनातपैश्च।
तथर्त्तुदोषेण विपर्य्ययेण कुप्यन्ति दोषाः पवनादयस्तु।

संप्राप्तिपूर्वरूपञ्चाह—

त्वच माश्रित्य ते रक्तमांसास्थीनि प्रदूष्य च।
घोरान् कुर्व्वन्ति विस्फोटान् सर्व्वान् ज्वरपुरःसरान्।

विस्फोटस्वरूपमाह—

अग्निदग्धनिभाः स्फोटाः सज्वरा रक्तपित्तजाः।
क्वचित् सर्व्वत्र वा देहे विस्फोटा इति ते स्मृताः।

वातविस्फोटलक्षणमाह—

शिरोरुक् शूलभूयिष्ठं ज्वरस्तृट् पर्व्वभेदनं।
सकृष्णवर्णता चेति वातविस्फोटलक्षणं।

पित्तविस्फोटलक्षणमाह—

ज्वरदाहरुजास्रावपाकतृष्णाभिरन्वितं।
पीतलोहितवर्णञ्च पित्तविस्फोटलक्षणं।

कफविस्फोटलक्षणमाह—

छर्द्यरोचकजाड्यानि कण्डूकाठिन्यपाण्डुताः ।
अवेदनश्चिरात्पाकी स विस्फोटः कफात्मकः ।

वातपित्तजस्य लक्षणमाह—

वातपित्तकृतो यस्तु कुरुते तीव्रवेदनां ।

कफवातजस्य लक्षणमाह—

कण्डूस्तैमित्यगुरुभिर्जानीयात् कफवातिकं ।

कफपित्तजस्य लक्षणमाह—

कण्डुर्दाहो ज्वरश्छर्दिरेतैस्तु कफपैत्तिकः ।

त्रिदोषजस्य लक्षणमसाध्यत्वञ्चाह—

मध्ये निम्नोन्नतोऽन्ते च कठिनोऽल्पप्रपाकवान् ।
दाहरागतृषामोहच्छर्दिमूर्च्छारुजाज्वराः ।
प्रलापो वेपथुस्तन्द्रा सोऽसाध्यः स्यात् त्रिदोषजः ।

रक्तजस्य लक्षणमसाध्यत्वञ्चाह—

रक्ता रक्तसमुत्थाना गुञ्जाविद्रुमसन्निभाः ।
वेदितव्यास्तु रक्तेन पैत्तिकेन च हेतुना ।
न ते सिद्धिं समायान्ति सिद्धैर्योगशतैरपि ।

साध्यत्वादिकमाह—

एकदोषोत्थितः साध्यः कृच्छ्रसाध्यो द्विदोषजः ।
सर्व्वदोषोत्थितो घोरस्त्वसाध्यो भूर्य्युपद्रवः ।

मसूरिकाधिकार: ।

निदानपूर्विकां संप्राप्तिं निरुक्तिञ्चाह—

कट्वम्ललवणक्षारविरुद्धाध्यशनाशनैः ।
दुष्टनिष्पावशाकाद्यैः प्रदुष्टपवनोदकैः ।
क्रूरग्रहेक्षणाच्चापि देशे दोषाः समुद्धताः ।
जनयन्ति शरीरेऽस्मिन् दुष्टरक्तेन सङ्गताः ।
मसूराकृतिसंस्थानाः पिड़काः स्युर्मसूरिकाः ।

पूर्वरूपमाह—

तासां पूर्व्वं ज्वरः कण्डूर्गात्रभङ्गोऽरतिर्भ्रमः ।
त्वचि शोथः सवैवर्ण्यो नेत्ररागश्च जायते ।

वातजामाह—

स्फोटाः श्यावारुणा रूक्षा स्तीव्रवेदनयान्विताः ।
कठिनाश्चिरपाकाश्च भवन्त्यनिलसम्भवाः ।
सन्ध्यस्थिपर्व्वणां भेदः कासः कम्पोऽरतिःक्लमः ।
शोषस्ताल्वोष्ठजिह्वानां तृष्णा चारुचिसंयुताः ।

पित्तजामाह—

रक्ताःपीताःसिताःस्फोटाः सदाहास्तीव्रवेदनाः ।
भवन्त्यचिरपाकाश्च पित्तकोपसमुद्भवाः ।
विड्भेदश्चाङ्गमर्दश्च दाहस्तृष्णारुचिस्तथा ।
मुखपाकोऽक्षिरागश्च ज्वरस्तीव्रः सुदारुणः ।

रक्तजामाह—

रक्तजायां भवन्त्येते विकाराः पित्तलक्षणाः ।

कफजामाह—

कफप्रसेकस्तैमित्यं शिरोरुग् गात्रगौरवं ।
हृल्लासः सारुचिर्निद्रा तन्द्रालस्यसमन्विताः ।
श्वेताः स्निग्धा भृशं स्थूलाः कण्डूरा मन्दवेदनाः ।
मसूरिकाः कफोत्थाश्च चिरपाकाः प्रकीर्त्तिताः ।

त्रिदोषजामाह—

नीलाश्चिपिटविस्तीर्णा मध्ये निम्ना महारुजाः ।
चिरपाकाः पूतिस्रावाः प्रभूताः सर्व्वदोषजाः ।
कण्ठरोधारुचिस्तम्भप्रलापारतिसङ्गताः ।
दुश्चिकित्साः समुद्दिष्टाः पिड़काश्चर्म्मसंज्ञिताः ।

मसूरिकाभेदं रोमान्तिकामाह—

रोमकूपोन्नतिसमा रागिण्यः कफपित्तजाः ।
कासारोचकसंयुक्ता रोमान्त्यो ज्वरपूर्व्विकाः ।

मसूरिकाभेदं शीतलामाह—

देव्या शीतलयाक्रान्ता मसूर्य्येव हि शीतला ।
ज्वरयेच्च यथा भूताधिष्ठितो विषमज्वरः ।

शीतलायाः सप्तभेदानाह—

सा च सप्तविधा ख्याता तासां भेदान् प्रचक्ष्महे ।
ज्वरपूर्व्वा वृहत् स्फोटैः शीतला 'वृहती' भवेत् ।
सप्ताहान्निःसरत्येव सप्ताहात् पूर्णतां व्रजेत् ।

ततस्तृतीये सप्ताहे शुष्यति स्खलति स्वयम्।
वातश्लेष्मसमुद्भूता 'कोद्रवा' कोद्रवाकृतिः।
तां कश्चित् प्राह पक्वेति सा तु पाकं न गच्छति।
जलशूकवदङ्गानि सा विध्यति विशेषतः।
सप्ताहाद्वा दशाहाद्वा शान्तिं याति विनौषधं।
उष्मणा तृष्णजारूपा सकण्डूः स्पर्शनप्रिया।
नाम्ना 'पाणिसहा' ख्याता सप्ताहाच्छुष्यति स्वयं।
चतुर्थी सर्षपाकारा पीतसर्षपवर्णिणी।
नाम्ना 'सर्षपिका' ज्ञेयाऽभ्यङ्गमत्र विवर्ज्जयेत्।
किञ्चिदुष्णनिमित्तेन जायते 'राजिकाकृतिः'।
एषा भवति वालानां सुखं शुष्यति च स्वयम्।
कोठवज्जायते षष्ठी 'लोहितोन्नतमण्डला'।
ज्वरपूर्वा व्यथायुक्ता ज्वरस्तिष्ठेद्दिनत्रयम्।
स्फोटानां मिलनादेषा वहुस्फोटापि दृश्यते।
एकस्फोटे च कृष्णा च बोद्धव्या 'चर्म्मजाभिधा'।
एताः सप्तापि बोद्धव्याः शीतलादेव्यधिष्ठिताः।
काश्चिद्विनापि यत्नेन सुखं सिध्यन्ति शीतलाः।
दृष्टाः कष्टतराः काश्चित् काश्चित् सिध्यन्ति वा न वा।
काश्चिन्नैव तु सिध्यन्ति यत्नतोऽपि चिकित्सिताः।

रसादिसप्तधातुगतमसूरिकालिङ्गमाह—

तोयवुद्‌वुदसङ्काशा 'त्वग्‌गतास्तु' मसूरिकाः।
स्वल्पदोषाः प्रजायन्ते भिन्नास्तोयं स्रवन्ति च।

'रक्तस्था' लोहिताकाराः शीघ्रपाका स्तनुत्वचः ।
साध्या नात्यर्थदुष्टाश्च भिन्ना रक्तं स्रवन्ति च ।
'मांसस्थाः' कठिनाः स्निग्धाश्चिरपाका घनत्वचः ।
गात्रशूलारतिकण्डूतृष्णाज्वरसमन्विताः ।
'मेदोजा' मण्डलाकारा मृदवः किञ्चिदुन्नताः ।
घोरज्वरपरीताश्च स्थूलाः स्निग्धाः सवेदनाः ।
संमोहारतिसंतापाः कश्चिदाभ्यो विनिस्तरेत् ।
क्षुद्रा गात्रसमा रूक्षाश्चिपिटाः किञ्चिदुन्नताः ।
'मज्जोत्था' भृशसंमोहवेदनारतिसंयुताः ।
छिन्दन्ति मर्म्मधामानि प्राणानाशु हरन्ति हि ।
भ्रमरेणैव विद्धानि कुर्व्वन्त्यस्थीनि सर्व्वतः ।
पक्वाभाः पीड़काः स्निग्धाः सूक्ष्माश्चात्यर्थवेदनाः ।
स्तैमित्यारतिसंमोहदाहोन्मादसमन्विताः ।
'शुक्रजायां' मसूर्य्यान्तु लक्षणानि भवन्ति हि ।
निर्द्दिष्टं केवलं चिह्नं दृश्यते न तु जीवितं ।

दूष्यदुष्टौ दोषसम्बन्धमाह—

दोषमिश्रास्तु सप्तैता द्रष्टव्या दोषलक्षणैः ।

सुखसाध्यत्वमाह—

त्वग्गता रक्तजाश्चैव पित्तजाः श्लेष्मजा स्तथा ।
श्लेष्मपित्तकृताश्चैव सुखसाध्या मसूरिकाः

कृच्छ्रसाध्यत्वादिकमाह—

वातजा वातपित्तोत्थाः श्लेष्मवातकृताश्च याः ।

कृच्छ्रसाध्या मता स्तस्मात् यत्नात्ता उपाचरेत् ।
असाध्याः सन्निपातोत्था स्तासां वक्ष्यामि लक्षणं ।

मसूरिकावर्णमाह—

प्रवालसदृशाः काश्चित् काश्चिज्जम्बूफलोपमाः ।
लोहजालनिभाः काश्चिदतसीफलसन्निभाः ।

अनुक्तवर्णसंग्रहार्थमाह—

आसां बहुविधा वर्णा जायन्ते दोषभेदतः ।

सर्वमसूरिकाया आवस्थिकं लिङ्गमाह—

कासो हिक्का प्रमोहश्च ज्वरस्तीव्रः सुदारुणः ।
प्रलापश्चारतिर्मूर्च्छा तृष्णा दाहोऽतिघूर्णता ।
मुखेन प्रस्रवेद्रक्तं तथा घ्राणेन चक्षुषा ।
कण्ठे घुर्घुरकं कृत्वा श्वसित्यत्यर्थवेदनं ।
मसूरिकाभिभूतस्य यस्यैतानि भिषग्वरः ।
लक्षणानि च दृश्यन्ते न दद्यादत्र भेषजं ।

सामान्येनासाध्यत्वमाह—

मसूरिकाभिभुतो यो भृशं घ्राणेन निश्वसेत् ।
स भृशं त्यजति प्राणान् तृष्णार्त्तो वायुदूषितः ।

मसूरिकाया उपद्रवमाह—

मसूरिकान्ते शोथः स्यात् कूर्परे मणिबन्धके ।
तथांसफलके चापि दुश्चिकित्स्यः सुदारुणः ।

स्नायुकाधिकार: ।

स्नायुकमाह—

शाखासु कुपितोदोष: शोथं कृत्वा विसर्पवत् ।
भिनत्ति तत्क्षते तत्र सोष्म स्नायुं विशोष्य च ।
कुर्य्यात्तन्तुनिभं जीवं वृत्तं श्वेतद्युतिं वहि: ।
शनै: शनै: क्षताद्याति छेदात् कोपमुपैति च ।
तत्पाताच्छोथशान्ति: स्यात् पुन:स्थानान्तरे भवेत् ।
स स्नायुकेति विख्यात: क्रियोक्तात्र विसर्पवत् ।

प्रमादाच्छेदे दोषमाह—

वाह्वोर्यदि प्रकादेन क्रुध्यते जङ्घयोरपि ।
सङ्कोचं खञ्जतां चैव छिन्नतखु: करोत्यसौ ।

वातादिभेदेनाष्टविधं स्नायुकमाह—

वातेन श्यावरूक्ष: सरुगथ दहनान्नीलपीत: सदाहो-
ऽथ श्वेत: श्लेष्मणा स्यात् पृथुगरिमयुतोऽथ द्विदोषो द्विलिङ्गी ।
रक्तेनारक्तकान्ति: समधिकदहनोऽथाखिलै: सर्व्वलिङ्गो ।
रोगोऽसावष्टधेत्थं मुनिभिरभिहित: स्नायुकस्तन्तुकीट: ।

फिरङ्गाधिकार: ।

निरुक्तिनिदानादिकमाह—

फिरङ्गसंज्ञके देशे वाहुल्येनैव यद्भवेत् ।
तस्मात् फिरङ्ग इत्युक्तो व्याधिर्व्याधिविशारदै: ।

गन्धरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवम् ।
फिरङ्गिणोऽङ्गसंसर्गात् फिरङ्गिन्या प्रसङ्गतः ।
व्याधिरागन्तुजो ह्येष दोषाणामत्र संक्रमः ।
भवेत्तल्लक्षयेत्तेषां लक्षणैर्भिषजाम्बरः ।

फिरङ्गस्य भेदानाह—

फिरङ्गस्त्रिविधोज्ञेयो वाह्य आभ्यन्तरस्तथा ।
वहिरन्तर्भवश्चापि तेषां लिङ्गानि च ब्रुवे ।

वाह्यस्य लक्षणमाह—

तत्र वाह्यफिरङ्गस्याद्विस्फोटसदृशोऽल्परुक् ।
स्फुटितो व्रणवद्वैद्यैः सुखसाध्योऽपि सो मतः ।

आभ्यन्तरस्य लक्षणमाह—

सन्धिष्वाभ्यन्तरः स स्यादामवात इव व्यथाम् ।
शोफं च जनयेदेष कष्टसाध्यो बुधैः स्मृतः ।

उपद्रवमाह—

कार्श्यं वलक्षयो नासाभङ्गो वह्नेश्च मन्दता ।
अस्थिशोषोऽस्थिवक्रत्वं फिरङ्गोपद्रवा अमी ।

साध्यत्वादिकमाह—

वहिर्भवो भवेत् साध्यो नवीनो निरुपद्रवः ।
आभ्यन्तरस्तु कष्टेन साध्यः स्यादयमामयः ।
वहिरन्तर्भवश्चापि क्षीणस्योपद्रवैर्युतः ।
व्याप्तो व्याधिरसाध्योऽयमित्याहुर्मुनयः पुरा ।

शुक्रदोषाधिकारः ।

व्यवायं शुक्रायत्तमिति दर्शयन्नाह—

बीजं यस्माद् व्यवायेषु हर्षयोनिसमुत्थितम् ।
शुक्रं पौरुष मित्युक्तं तस्माद्वच्यमि तच्छृणु ।

बीजदृष्टान्तेन शुक्रदोषमाह—

यथा बीजमकालाम्बुकृमिकीटाग्निदूषितम् ।
न विरोहति सन्दुष्टं तथा शुक्रं शरीरिणाम् ।

निदानं संप्राप्तिञ्चाह—

अतिव्यवायाद् व्यायामादसात्म्यानाञ्च सेवनात् ।
अकाले वा प्ययोनौ वा मैथुनं न च गच्छतः ।
रुक्षतिक्तकषायातिलवणाम्लोष्णसेवनात् ।
नारीनामरसज्ञानां सरणाज्जरया तथा ।
चिन्ताशोकादविस्रम्भाच्छस्त्रक्षाराग्निविभ्रमात् ।
भयात् क्रोधादभीचारात् व्याधिभिः कर्षितस्य च ।
वेगाघाताद् क्षयाच्चापि धातूनां सम्प्रदूषणात् ।
दोषाः पृथक् समस्ता वा प्राप्य रेतोवहाः सिराः ।
शुक्रं संदूषयत्याशु तद् वच्यामि विभागशः ।

शुक्रस्याष्टौ दोषानाह—

फेनिलं तनु रुक्षञ्च विवर्णं पूति पिच्छिलम् ।
अन्यधातूपसंसृष्ट मवसादि तथाष्टमम् ।

वातदुष्टशुक्रलक्षणमाह—

फेनिलं तनु रूक्षञ्च कृच्छ्रेणाल्पञ्च मारुतात् ।
भवत्युपहतं शुक्रं न तद् गर्भाय कल्पते ।

पित्तदुष्टशुक्रलक्षणमाह—

सनील मथवा पीत मत्युष्णं पूतिगन्धि च ।
दहल्लिङ्गं विनिर्याति शुक्रं पित्तेन दूषितम् ।

श्लेष्मदुष्टशुक्रलक्षणमाह—

श्लेष्मणा बद्धमार्गन्तु भवत्यत्यर्थपिच्छिलम् ।

शुक्रस्य रक्तोपसंसृष्टत्वं सहेतुकमाह—

स्त्रीणामत्यर्थगमनादभिघातात् क्षयादपि ।
शुक्रं प्रवर्त्तते जन्तोः प्रायेण रुधिरान्वयम् ।

शुक्रस्यावसादित्वं सहेतुकमाह—

वेगसन्धारणाच्छुक्रं वायुना विहतं पथि ।
कृच्छ्रेण याति ग्रथित मवसादि तथाष्टमम् ।
इति दोषाः समाख्याताः शुक्रस्याष्टौ सलक्षणाः ।

शुद्धशुक्रलक्षणमाह—

स्निग्धं घनं पिच्छिलञ्च मधुरञ्चाविदाहि च ।
रेतः शुद्धं विजानीयाच्छ्वेतं स्फटिकसन्निभम् । (क)

(क) प्रवृत्तिः—यथाहि पुष्पमुकुलस्थो गन्धो न शक्यमिहास्तीति वक्तुं नैव नास्तीत्ययवास्ति सतां भावानामभिव्यक्तिरिति ज्ञात्वा केवलं सौक्ष्म्यान्नाभिव्यज्यते । स एव गन्धो विवृतपत्रकेशरैः कालान्तरेणाव्यक्तिं गच्छत्येवं वालानामपि वयःपरिणामात् शुक्र-प्रादुर्भावो भवति रोमराज्यादयश्च । सप्तमी शुक्रधरा नाम या सर्व्वप्राणिनां सर्व्वशरीर-

क्लैव्याधिकारः।

चतुर्विधं क्लैव्यमाह—

वीजध्वजोपघाताभ्यां जरया शुक्रसंक्षयात्।
क्लैव्यस्य सम्भवस्तस्य शृणु सामान्यलक्षणम्।

क्लैव्यसामान्यलक्षणमाह—

सङ्कल्पप्रवणो नित्यं प्रियां वश्यामपि स्त्रियम्।
न याति लिङ्गशैथिल्यात् कदाचिद् याति वा पुमान्।
श्वासार्त्तः स्विन्नगात्रश्च मोघसंकल्पचेष्टितः।
म्लानशिश्नश्च निर्व्वीजः स्यादेतत् क्लैव्यलक्षणम्।
सामान्यलक्षणं ह्येतद् विस्तरेण प्रवक्ष्यते।

वीजोपघातजस्य निदानं लक्षणञ्चाह—

शीतरूक्षाल्पसंक्लिष्टविरुद्धाजीर्णभोजनात्।
शोकचिन्ताभयत्रासात् स्त्रीणाञ्चात्यर्थसेवनात्।
अभीचारादविस्रम्भाद्रसादीनाञ्च संक्षयात्।
वातादीनाञ्च वैषम्यात्तथैवानशनाच्छ्रमात्।
नारीना मरसज्ञत्वात् पञ्चकर्म्मापचारतः।
वीजोपघातो भवति पाण्डुवर्णः सुदुर्व्वलः।
अल्पप्राणोऽल्पहर्षश्च प्रमदासु भवेन्नरः।

व्यापिणी। यथा पयसि सर्पिस्तु गूढश्चेक्षौ रसो यथा। शरीरेषु तथा शुक्रं नृणां विद्याद् भिषग्वरः। द्व्यङ्गुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाप्यधः। मूत्रस्रोतःपथाच्छुक्रं पुरुषस्य प्रवर्त्तते।

हृत्पाण्डुरोगतमककामलाश्रमपीड़ितः।
छर्द्यतिसारशूलार्त्तः कासज्वरनिपीड़ितः।
वीजोपघातजं क्लैव्यं —।

ध्वजभङ्गकृतस्य निदानं लक्षणञ्चाह—

ध्वजभङ्गकृतं शृणु।
अत्यम्ललवणक्षारविरुद्धाजीर्णभोजणात्।
अत्यम्बुपानाद्विषमपिष्टान्नगुरुभोजनात्।
दधिक्षीरानूपमांससेवनाद् व्याधिकर्षणात्।
कन्यानाञ्चैव गमनादयोनिगमनादपि।
दीर्घरोगां चिरोत्सृष्टां यथैव च रजःस्वलां।
दुर्गन्धां दुष्टयोनिञ्च तथैव च परिस्नुताम्।
ईदृशीं प्रमदां मोहात् यो गच्छेत् कामहर्षितः।
चतुष्पदाभिगमनाच्छेफसश्चाभिघाततः।
अधावनाद्वा मेढ्रस्य शस्त्रदन्तनखक्षतात्।
काष्ठप्रहारनिष्पेषं शूकानाञ्चातिसेवनात्।
रेतसश्च प्रतीघाताद्ध्वजभङ्गः प्रवर्त्तते।

जरासम्भवं क्लैव्यमाह—

क्लैव्यं जरासम्भवं हि प्रवक्ष्याम्यथ तच्छृणु।
जघन्यमध्यप्रवरं वयस्त्रिविध मुच्यते।
अथ प्रवयसां शुक्रं प्रायशः क्षीयते नृणाम्।
रसादीनां संक्षयाच्च तथैवावृष्यसेवनात्।
वलवीर्य्येन्द्रियाणाञ्च क्रमेणैव परिक्षयात्।

परिच्चयादायुषश्चाप्यनाहाराच्छ्रमात् क्रमात् ।
जरासम्भवजं क्लैव्यं मित्येतैर्हेतुभिर्नृणाम् ।
जायते तेन सोऽत्यर्थं क्षीण धातुः सुदुर्ब्बलः ।
विवर्णो विह्वलो दीनः चिप्रं व्याधिमथाश्नुते ।
एतज्जरासम्भवं हि ।

चयजं क्लैव्यमाह—

चतुर्थं चयजं शृणु— ।
अतिप्रचिन्तनाच्चैव शोकात् क्रोधाद्भयादपि ।
ईर्षोत्कण्ठादथोद्वेगात् सदा विशति यो नरः ।
कृशो वा सेवते रुचमन्नपान मथौषधम् ।
दुर्ब्बल-प्रकृतिश्चैव निराहारो भवेद् यदि ।
असात्म्यभोजनाच्चापि हृदये यो व्यवस्थितः ।
रसः प्रधानधातुर्हि चीयेताशु नरस्ततः ।
रक्तादयश्च चीयन्ते धातवस्तस्य देहिनः ।
शुक्रावसानास्तेभ्यो हि शुक्रं धाम परं मतम् ।
चेतसो वातिहर्षेण व्यवायं सेवते तु यः ।
शुक्रन्तु चीयते तस्य ततः प्राप्नोति स चयम् ।
घोरं व्याधिमवाप्नोति मरणं वा स गच्छति ।
शुक्रं तस्माद्विशेषेण रच्यमारोग्यमिच्छता ।
एतन्निदानलिङ्गाभ्यामुक्तं क्लैव्यं चतुर्विधम् । (क)

(क) प्रपूर्त्तिः—अन्यत्र सप्तविधं क्लैव्यमुक्तम् तथाच तद्ग्रन्थः—क्लीवं स्यात् सुरताशक्तस्तद्भावः क्लैव्य मुच्यते । तच्च सप्तविधं प्रोक्तं निदानं तस्य कथ्यते ।

असाध्यत्वमाह—

केचित् क्लैव्ये त्वसाध्ये द्वे ध्वजभङ्गक्षयोद्भवे।
वदन्ति शेफसश्छेदाद् वृषणोत्पाटनेन वा।
मातापित्रोर्वीजदोषादशुभैश्चारतात्मनः।
गर्भस्थस्य यदा दोषाः प्राप्य रेतोवहाः सिराः।
शोषयन्त्यास्तु तन्नाशाद्रेतश्चाप्युपहन्यते।
तत्र सम्पूर्णसर्व्वाङ्गः स भवत्यपुमान् पुमान्।
एते त्वसाध्या व्याख्याताः सन्निपातसमुच्छ्रयात्। (ख)

अथ क्षुद्ररोगाधिकारः।

अजगल्लिका लक्षणमाह—

स्निग्धाः सवर्णा ग्रथिता निरुजा मुद्गसन्निभाः।
कफवातोत्थिता ज्ञेया वालानामजगल्लिका।

भावैरहर्षैस्तु रिरंसोर्मनसि क्षते। ध्वजः पतत्यतो नृणां क्लैव्यं समुपजायते। द्वेष्य-स्त्रीसंप्रयोगाच्च क्लैव्यं तन्मानसं स्मृतम्। कटुकाम्लोष्णलवणैरतिमात्रोपसेवितैः। पित्ता च्छुक्रक्षयोद्दिष्टः क्लैव्यं तस्मात् प्रजायते। अतिव्यवायशीलो यो नच वाजीक्रियारतः ध्वजभङ्गमवाप्नोति स शुक्रक्षयहेतुकम्। महता मेढ्ररोगेण चतुर्थी क्लीवता भवेत्। वीर्य्यवाहिसिराच्छेदान्मेहनानुन्नतिर्भवेत्। वलिनः क्षुब्धमनसो निरोधाद् ब्रह्मचर्य्यतः षष्ठं क्लैव्यंस्मृतं तत्तु शुक्रस्तम्भनिमित्तकम्। जन्म प्रभृति यत् क्लैव्यं सहजं तद्धि सप्तमम्॥

(ख) प्रपूर्त्तिः—वृहच्छरीरा वलिनः सन्ति नारीषु दुर्व्वलाः। सन्ति चाल्पाशुषः स्त्रीषु वलवन्तो वहुप्रजाः। प्रकृत्या चावलाः सन्ति सन्ति चामयदुर्व्वलाः। नराश्चटकवत् केचित् व्रजन्ति वहुशः स्त्रियम्। गजवच्च प्रसिञ्चन्ति केचिन्न वहुगामिनः। कामयोगवलाः केचित् केचिदभ्यसनध्रुवाः। केचित् प्रयत्नैर्वाह्यन्ते वृषाः केचित् स्वभावतः।

यवप्रख्यामाह—

यवाकारा सुकठिना ग्रथिता मांससंश्रिता ।
पड़िका कफवाताभ्यां यवप्रख्येति सोच्यते ।

अन्वालजीमाह—

घनामवक्रां पिड़का मुन्नतां परिमण्डलां ।
अन्वालजीमल्पपूयां तां विद्यात् कफवातजां ।

विवृतामाह—

विवृतास्यां महादाहां पक्वोडुम्बरसन्निभां ।
विवृतामिति तां विद्यात् पित्तोत्थां परिमण्डलाम् ।

कच्छपिकालक्षणमाह—

ग्रथिताः पञ्च वा षड् वा दारुणाः कच्छपोपमा ।
कफानिलाभ्यां पोड़का ज्ञेया कच्छपिका बुधैः ।

वल्मीकलक्षणमाह—

ग्रीवांसकक्षाकरपाददेशे सन्धौ गले या त्रिभिरेव दोषैः ।
ग्रन्थिः स वल्मीकवदक्रियाणां जातः क्रमेणैव गतः प्रवृद्धिं ।
मुखैरनेकैः स्रुतितोदवद्भिर्विसर्पवत् सर्पति चोन्नताग्रैः ।
वल्मीकमाहुर्भिषजो विकारं निष्प्रत्यनीकं चिरजं विशेषात् ।

इन्द्रविद्धमाह—

पद्मकर्णिकवन्मध्ये पिड़काभिः समाचितां ।
इन्द्रविद्धान्तु तां विद्याद्वातपित्तोत्थितां भिषक् ।

गर्द्दभिकामाह—

मण्डलं वृत्तमुत्सन्नं सरक्तं पिड़काचितम्।
रुजाकरीं गर्द्दभिकां तां विद्याद्वातपित्तजां।

पाषाणगर्द्दभलक्षणमाह—

वातश्लेष्मसमुद्भूतः श्वयथुर्हनुसन्धिजः।
स्थिरो मन्दरुजः स्निग्धो ज्ञेयः पाषाणगर्द्दभः।

पनसिकामाह—

कर्णस्याभ्यन्तरे जातां पिड़कामुग्रवेदनां।
स्थिरां पनसिकां तान्तु विद्याद् वातकफोत्थिताम्।

जालगर्द्दभलक्षणमाह—

विसर्पवत् सर्पति यः शोथस्तनुरपाकवान्।
दाहज्वरकरः पित्तात् स ज्ञेयो जालगर्द्दभः।

इरिवेल्लिकामाह—

पिड़कामुत्तमाङ्गस्थां वृत्तामुग्ररुजाज्वरां।
सर्व्वात्मिकां सर्व्वलिङ्गां जानीयादिरिवेल्लिकां।

कक्षालक्षणमाह—

बाहुपार्श्वांसकक्षेषु कृष्णस्फोटां सवेदनां।
पित्तप्रकोपसम्भूतां कक्षामित्यभिनिर्द्दिशेत्।

गन्धमालामाह—

एकामेतादृशीं दृष्ट्वा पिड़कां स्फोटसन्निभां।
त्वग्गतां पित्तकोपेन गन्धमालां प्रचक्षते।

अग्निरोहिणी लक्षणमाह—

कक्षभागेषु ये स्फोटा जायन्ते मांसदारुणाः ।
अन्तर्दाहज्वरकरा दीप्तपावकसन्निभाः ।
सप्ताहाद्वादशाहाद्वा पक्षाद्वा हन्ति मानवं ।
तामग्निरोहिणीं विद्यादसाध्यां सर्व्वदोषजां ।

चिप्पलक्षणमाह—

नखमांसमधिष्ठाय वायु पित्तञ्च देहिनां ।
कुर्व्वते दाहपाकौच तं व्याधिं चिप्पमादिशेत् ।

कुनखमाह—

तदेवाल्पतरैर्दोषैः परुषं कुनखं वदेत् ।

अनुशयीलक्षणमाह—

गम्भीरामल्पसंरम्भां सवर्णामुपरिस्थितां ।
पादस्यानुशयीं तान्तु विद्यादन्तःप्रपाकिनीम् ।

विदारीलक्षणमाह—

विदारीकन्दवद्वृत्तां कक्षावंक्षणसन्धिषु ।
विदारिका भवेद्रक्ता सर्व्वजा सर्व्वलक्षणा ।

शर्कराव्वुर्दमाह—

प्राप्यमांससिरस्नायूः श्लेष्माभेद स्तथानिलः ।
ग्रन्थिं करोत्यसौ भिन्नो मधुसर्पिर्वसानिभं ।
स्रवत्यास्रावमनिल स्तत्र वृद्धिं पुनर्गतः ।
मांसं संशोष्य ग्रथितां शर्करां जनयेत्ततः ।
दुर्गन्धि क्लिन्नमत्यर्थं नानावर्णं ततः सिराः ।
स्रवन्ति रक्तं सहसा तं विद्याच्छर्कराव्वुर्दं ।

पाददरीमाह—

परिक्रमणशीलस्य वायुरत्यर्थरूक्षयोः।
पादयोः कुरुते दारीं पाददारीं तमादिशेत्।

कदरमाह—

शर्करोन्मथिते पादे क्षते वा कण्टकादिभिः।
ग्रन्थिः कोलवदुत्सन्नो जायते कदरं हि तत्।

अलसमाह—

क्लिन्नाङ्गुल्यन्तरौ पादौ कण्डूदाहरुजान्वितौ।
दुष्टकर्दमसंस्पर्शादलसं तं विभावयेत्।

इन्द्रलुप्तलक्षणमाह—

रोमकूपानुगं पित्तं वातेन सह मूर्च्छितं।
प्राच्यावयति रोमाणि ततः श्लेष्मा सशोणितः।
रुणद्धि रोमकूपांस्तु ततोऽन्येषामसम्भवः।
तदिन्द्रलुप्तं खालित्यं रुह्येति च विभाव्यते।

दारुणलक्षणमाह—

दारुणा कण्डूरा रूक्षा केशभूमिः प्रपाट्यते।
कफमारुतकोपेन विद्याद्दारुणकन्तुतं।

अरूंषिकामाह—

अरूंषि वहुवक्त्राणि वहुक्लेदीनि मूर्द्ध्नि तु।
कफासृक्-क्रिमिकोपेन नृणां विद्यादरूंषिकां।

पलितमाह—

क्रोधशोकश्रमकृतः शरीरोष्मा शिरोगतः।
पित्तञ्च केशान् पचति पलितं तेन जायते।

युवानपीड़कालक्षणमाह—

शाल्मलीकण्टकप्रख्याः कफमारुतरक्तजाः।
युवानपीड़का यूनां विज्ञेया मुखदूषिकाः।

पद्मिनीकण्टकमाह—

कण्टकै राचितं वृत्तं मण्डलं पाण्डुकण्डुरं।
पद्मिनीकण्टकप्रख्यै स्तदाख्यं कफवातजं।

जतुमणिमाह—

समसुत्सन्नमरुजं मण्डलं कफरक्तजं।
सहजं लक्ष्म चैकेषां लक्ष्यो जतुमणिस्तु सः।

मषकलिङ्गमाह—

आवेदनं स्थिरञ्चैव यस्मिन् गात्रे प्रदृश्यते।
माषवत् कृष्णमुत्सन्न मनिलान्माषकन्तु तत्।

तिलकालकलक्षणमाह—

कृष्णानि तिलमात्राणि नीरुजानि समानि च।
वातपित्तकफोद्रेकात् तान् विद्यात्तिलकालकान्।

न्यच्छलक्षणमाह—

महद्वा यदि वा चाल्पं श्यावं वा यदि वाऽसितं।
नीरुजं मण्डलं गात्रे न्यच्छमित्यभिधीयते।

व्यङ्गलिङ्गमाह—

क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः।
मुखमागात्य सहसा मण्डलं विसृजत्यतः।
नीरुजं तनुकं श्यावं मुखव्यङ्गं तमादिशेत्।

नीलिकामाह—

कृष्णमेवंगुणं गात्रे मुखे वा नीलिकां विदुः ।

परिवर्त्तिकामाह—

मर्द्दनात् पीड़नाद्वापि तथैवाप्यभिघाततः ।
मेढ्रचर्म्म यदा वायुर्भजति सर्व्वतश्चरन् ।
तदा वातोपसृष्टत्वात् तच्चर्म्म परिवर्त्तते ।
मणेरधस्तात् कोषश्च ग्रन्थिरूपेण लम्बते ।
सरुजां वातसम्भूतां तां विद्यात् परिवर्त्तिकां ।
सकण्डूः कठिना वापि सैव श्लेष्मसमुत्थिता ।

अवपाटिकामाह—

अल्पीयःखां यदा हर्षाद्बलाद्गच्छेत् स्त्रियं नरः ।
हस्ताभिघातादथवा चर्म्मण्युद्वर्त्तिते बलात् ।
यस्यावपाट्यते चर्म्म तां विद्यादवपाटिकां ।

निरुद्धप्रकाशमाह—

वातोपसृष्टे मेढ्रे वै चर्म्म संश्रयते मणिं ।
मणिश्चर्म्मोपनद्धस्तु मूत्रस्रोतो रुणद्धि च ।
निरुद्धप्रकाशे तस्मिन् मन्दधार मवेदनं ।
मूत्रं प्रवर्त्तते जन्तोर्म्मणिर्व्विव्रियते न च ।
निरुद्धप्रकाशं विद्यात् सरुजं वातसम्भवं ।

सन्निरुद्धगुदमाह—

वेग सन्धारणाद्वायुर्व्विहतो गुदसंश्रितः ।

निरुणद्धि महास्रोतः सूक्ष्मद्वारं करोति च।
मार्गस्य सौक्ष्म्यात् कृच्छ्रेण पुरीषं तस्य गच्छति।
सन्निरुद्धगुदं व्याधि मेतत् विद्यात् सुदारुणं।

अहिपूतनमाह—

शकृन्मूत्रसमायुक्तेऽधौतेऽपाने शिशोर्भवेत्।
स्विन्ने वाऽस्नाप्यमाने वा कण्डू रक्तकफोद्भवा।
कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते।
एकीभूतं व्रणै र्घोरं तं विद्यादहिपूतनम्।

वृषणकच्छूमाह—

स्नानोत्सादनहीनस्य मलो वृषणसंस्थितः।
यदा प्रक्लिद्यते स्वेदात् कण्डूं जनयते तदा।
कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते।
प्राहुर्वृषणकच्छूं तां श्लेष्मरक्तप्रकोपजां।

गुदभ्रंशमाह—

प्रवाहणातिसाराभ्यां निर्गच्छति गुदं वहिः।
रूक्षदुर्व्वलदेहस्य गुदभ्रंशं तमादिशेत्।

वराहदंष्ट्रलिङ्गमाह—

सदाहो रक्तपर्य्यन्त स्त्वक्-पाकी तीव्रवेदनः।
कण्डूमान् ज्वरकारी च स स्याच्छूकरदंष्ट्रकः।

समाप्तश्चायं रोगविनिश्चयः।